URDAS'ALAKṢAṆĪ

EDITED BY
N. SANTANAM AIYAR

The Adyar Library Series No. 38

GENERAL EDITOR :

G. SRINIVASA MURTI, B.A., B.L., M.B. & C.M., VAIDYARATNA

Director, Adyar Library

CATURDAS'ALAKṢAṆĪ

OF

GADĀDHARA

WITH THREE COMMENTARIES

Vol. I

LAKṢAṆAS 1 & 2

चतुर्दशलक्षणी

गादाधरी

व्याख्यानत्रययुता

द्वितीयलक्षणान्ता

शिरोमणिबिरुदभाजा वेदान्तसाहित्यविशारदेन

पण्डित-सन्तानशर्मणा

संशोधिता

प्रथमः सम्पुटः

अड्यार् ग्रन्थालयः

अड्यार्

१९४२

SBN 7229-7264-4
ISBN 0-8356-7264-6

Printed by
C. Subbarayudu,
At The Vasanta Press,
Adyar, Madras

PREFACE

THE present book is the first instalment of a series of *Nyāya* works which the Adyar Library proposes to publish in its series. This volume contains the first two *lakṣaṇas* of that portion of Gadādhara's work called the *Caturdaśalakṣaṇī*, which means the fourteen definitions. The commentary on the work of Gadādhara for the portion by Kṛṣṇambhaṭṭa, the commentary called *Nyāyaratna* by Raghunātha and the commentary by Paṭṭābhirāma are also added in this volume. Of these three commentaries, only the first two have been available in print till now, and that only in Telugu script. The third commentary, that of Paṭṭāhirāma, is now printed for the first time.

The two systems of Indian Philosophy, the *Nyāya* and the *Vaiśeṣika*, developed on parallel lines until they merged into a single system. The *Nyāya* system tried an analysis of the Universe as thought content, in order to arrive at the truth of the Universe. It started with postulating the means of knowledge, the objects of knowledge and fourteen other topics that have a bearing on this analysis. Thus they postulated sixteen topics or *padārthas*. The *Vaiśeṣika* system attempted an analysis of the Universe as denotations of words and

they postulated seven divisions of the Universe like substances, qualities and actions. The synthesis came when thinkers began to deal with the seven divisions of the Universe, as understood through the four means of knowledge. This stage marks the beginning of what may be called the *navya* or later *Nyāya.*

Gaṅges'opādhyāya's *Tattvacintāmaṇi* is the basic work in this new phase of the development of *Nyāya-Vais'eṣika* system in India. Raghunāthas'iromaṇi's *Dīdhiti* is the most outstanding commentary on this work and Gadādhara has written a commentary on this commentary of Raghunāthas'iromaṇi on the *Tattva-cintāmaṇi* of Gaṅges'opādhyāya. The relevant portion of Gadādhara's commentary is the basic text in this volume and it is now published with its three commentaries. The corresponding portions from the *Tattva-cintāmaṇi* and the *Dīdhiti* are also added at the end of the book.

The edition of these later works has been undertaken by Paṇḍit Santanam Aiyar, who is a scholar of eminence in South India. He has selected the proper readings where there are different readings available, either in manuscripts or in printed editions or in different commentaries. He has also added his own notes here and there, to elucidate certain special points. He has made use of all the material available till now in print and also the manuscripts that are available in Madras. The present volume contains only the first two of the fourteen *lakṣaṇas.* The remaining portions, especially such portions that are widely taught in the higher courses

in *Nyāya* in the Universities and in Sanskrit Colleges, will appear in due course. Other sections of the work of Gadādhara, dealing with *Hetvābhāsa* are also under preparation. The portion dealing with the *Sāmānya-nirukti* and *Satpratipakṣa* with the commentary of Kṛṣṇambhaṭṭa has already been prepared for the press. The commentary of Kṛṣṇambhaṭṭa for these portions is not available in print till now.

Although in the higher courses of studies in Sanskrit within the Arts Faculties of the various Universities, the ***navya nyāya*** with its complicated dialectics forms only a minor portion, yet in the corresponding courses of higher studies which represent the traditional mode of learning conducted by the various Unversities and the Sanskrit Colleges, the *Nyāya* works occuppy a very important and prominent position. Students undergoing such courses have to learn considerable portions of the works of Gadādhara and Jagadīs'a. Handy editions of such works are not available. There are various commentaries on the works of Gadādhara. But many of them have not till now been printed, and the few printed works are available only in Telugu script. Since teachers depend mainly on manuscripts and memory for such commentaries, alterations in the readings increase. As such no apology is needed when the Adyar Library has launched upon such a scheme of publishing some of the important portions of such later *Nyāya* texts. It has been found that the number of students who take up *Nyāya* for such higher courses is fairly large and consequently the

Library has the additional satisfaction that the publication will be helpful for a very wide public.

The work of Gadādhara and its three commentaries have been printed separately in this edition instead of the commentaries being printed below the pages with the work of Gadādhara on the top. If small portions of each of the four works appear together on the pages, there is the disadvantage of the end of a commentary on a particular page being followed by the subsequent portion only with a page or two intervening, while there is the advantage of the commentaries on a portion appearing of the same page with the original above, which will facilitate comparison. But in a *S'āstraic* work, a commentary does not elucidate the words of the original; it only elucidates or discusses the points raised in the original. From this point of view, each of the commentaries is an independent work and in the presentation adopted in this edition, such a distinct nature for each work is brought out prominently. Having regard to the nature of the training which the students using the work ordinarily receive, the constant presence of the original is not a necessity when using any particular portion of a commentary. It is for these reasons that the different works have been printed as distinct units, one after the other.

The importance of this particular phase of the *Nyāya* philosophy, represented by the works of Gadādhara now undertaken for publication by the Library, has not been adequately recognized by the modern scholars. There is a tendency to ignore it as mere verbal

jugglery having no intellectual value, and as leading to no practical purpose. It must be admitted that the literature in this field is too difficult for any one to grasp without a specialized training. The mode of expression is extremely technical and the language is very artificial. The number of persons who are really proficient in this field of Indian Philosophical literature is extremely small and is dwindling gradually. If the traditional mode of interpretation of the texts is not given proper encouragement, there is every likelihood of the whole wealth represented by this literature falling into disuse and extinction. And this is a danger from which it is the duty of every institution that has taken upon itself the difficult task of preserving and encouraging the various aspects of ancient Indian culture, to keep the literature safe.

The *Upaniṣads*, the astronomy of Āryabhaṭa, the original works in the *Vedānta* of the later days and the grammar of Pāṇini are some aspects of Indian culture in which we find man's intellect rising up to elevations seldom reached in the history of any nation. To this class must be added the contribution of Gadādhara and other writers on *Nyāya* in the medieval times. If modern thinkers cannot understand and appreciate their contributions, the intellectual dwarfness of modern man is solely responsible for it.

Philosophy has two sides. One is that of thought and the other is that of expression and communication. The thoughts of one man cannot be directly grasped by another man. Man's thought is a unit. This unit

has to be conveyed from one person to another person through a medium that is a series, namely, language. The exact relation between the series of sounds, which we call language, and the ideas must be defined precisely. The necessity for such precise definition increases when the ideas become finer and more abstract. In ordinary human relations, the words of one person are understood by another person with sufficient precision. But in philosophical discussions there are more cases of mutual misunderstanding than of understanding; the result is that explanations and elucidations result in worse confusion, and discussions and conclusions land the parties in further and more complicated problems.

The *Nyāya* philosophy deals essentially with the process of inference, which is the process of knowing a Particular from a Universal through another Particular. There are the three terms, the major, the minor and the middle terms. One has to be very definite regarding the exact relation between the subject and the predicate that constitutes a Universal relation. One has to determine the circumstances under which alone a middle term can function as valid in a syllogism. There must also be the determination of the exact import of a proposition through an examination of the real significance of the various elements in a sentence, namely the words with their parts of stems and suffixes. What is called *navya* or later *Nyāya* deals with this aspect of philosophical disputation. Understood from this point of view, there is a great importance attached

to this field of Sanskrit Philosophical literature, an importance that is not lesser than the contribution of the great Ācāryas, though the importance of the former is only as an aid in elucidating and understanding the teachings of the Ācāryas. In a later volume in this series, I will take the opportunity to make a survey of the literature bearing on this aspect of *navya Nyāya.*

The Book is in five parts. The first part contains the commentary of Gadādhara. The remaining three parts contain the three commentaries on the work of Gadādhara. The fifth and last part contains the text of the *Tattvacintāmaṇi* and its commentary by Raghunāthaśiromaṇi, on which it is that Gadādhara has written his commentary. Detailed contents for the work of Gadādhara and its three commentaries are given in Sanskrit. The general scheme is given below :

On behalf of the Adyar Library I express my appreciation of the difficult task which the editor, Paṇḍit Santanam Aiyar, has accomplished in preparing the material for the present volume and I thank him for this great contribution to the literary activities of the Adyar Library. It is also my pleasant duty to thank the Vasanta Press for having printed the work with their usual excellence, in spite of certain special difficulties in printing such a work in which the same letter appears many times even in a single line.

Adyar Library, C. KUNHAN RAJA
December 1942

विषयसूचिका

पुटाङ्काः

गादाधरी

कृष्णम्भट्टीयम्

पुटाङ्काः

न्यायरत्नम्

ABBREVIATIONS

रा Notes as found in Adyar Library MS. 19. E. 49.

ज Jāgādis'ī, Chowkhamba Sanskrit Series, Nos. 101, 102, Devanāgarī, 1908.

स्व Notes by the Editor.

क Vyadhikaraṇadharmāvacchinnābhāvaprakaraṇam, Chowkhamba Sanskrit Series, Nos. 187, 201 and 217; Devanāgarī, 1927.

कृ Krishnambhaṭṭi, Mysore Edition, Telugu Script, Vidya Tarangīni Press, 1890.

र Nyāyaratnam, Mysore Edition, Telugu Script, Vidya Tarangīni Press, 1894.

अ Adyar Library MS. 19. E. 49, 41. D. 80.

ग Oriental Library MS. R. 860.

मै Caturdas'alakṣaṇī, Mysore Edition, Telugu Script, 1890.

CORRECTIONS

PAGE	LINE	READ
१	३	साध्याभाववद्वृत्तित्वस्य
५	९	दुर्वारत्वात्
,,	१२	सफलम्
७	१	पन्नस्यैव
९	११	भावीय
१०	१	घटाद्यभाव
१३	१	दुर्वारैवेति
,,	१७	अफलमिति
१९	१०	धूमादिप्रकार
२०	६	च्छिन्नसंयो
२१	२२	स्व०
२६	२४	स्व
३१	१७	एकधैव
३३	२१	अनुपादेय
४२	२४	व्यधिकरण:
५३	२२	लक्षणघटकतेति
९६	२१	तद्व्यक्ति
१०४	१५	तदभावस्य
११४	१६	साध्यतावच्छेदकव्याप्य
११६	९	सामान्याभावा
१५७	२०	स्व
१९६	६	प्रतियोगितायामपि

श्रीरस्तु

चतुर्दशलक्षणी

गादाधरी

अथ **समवायितये**ति मूलं [1]व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगम [2]एव संङ्गच्छते, तादृशाभावाभ्युपगमे सर्वत्र तादृशाभाववति हेतोर्वृत्तेरसम्भवः, साध्याभाववदवृत्तित्वस्य [3]तादृशाभावमादाय लक्षणसङ्गमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सौन्दलमतमवलम्ब्य लक्षणकर्तुरीदृशाशङ्का न सङ्गच्छते इति चेत्—अत्रोपाध्यायानु[4]यायिनः—केवलान्वयिनि साध्याभावाप्रसिद्धिनि[5]बन्धनस्य दोषस्य उद्भावितत्वात् साध्याभावस्य कथंचित्[6]प्रसिद्धत्वात् लक्षणस्य निर्दोषतेत्यभिमानेन

[1] व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगम—अ; प्रतियोगिताविशिष्टाभावत्वमेव—व्यधिकरणधर्मावच्छिन्नाभावत्वम्—वै०; स्वाधिकरणनिरूपितवृत्तित्वाभाववद्धर्मावच्छिन्नप्रतियोगिताकत्वस्वाधिकरणनिरूपितवृत्तितानवच्छेदकीभूतधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वान्यतरसम्बन्धेनेति—स्व.

[2] "एव" शब्दो नास्ति—अ.

[3] "व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक" इत्यर्थः—रा.

[4] उपाध्याय मतानुयायिनः—अ.

[5] निबन्धनदोषस्य—अ.

[6] प्रसिद्धावेव—अ; कृष्णम्भट्टैः "प्रसिद्धावेव" इति प्रतीकधारणात् अयं पाठः प्रामाणिकः—स्व.

इयमाशङ्का ; तादृशाभिमानमेव निराकरिष्यत्यग्रे तर्हीति ग्रन्थेन, व्यधिकरणधर्मावच्छिन्नाभावोपगमेऽपि यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते, तथा व्याप्तिलक्षणेऽपि[1] तादृशसाध्याभाव एव निवेश्यः, अन्यथा असम्भवस्य अतिव्याप्तेर्वा [2]प्रसक्तेः [3]व्याप्तेः अव्यभिचाररूपतानुपपत्तेश्चेति पुनरप्रसिद्धिनिबन्धनाव्याप्तिः केवलान्वयिस्थल इति हि तदर्थः,[4] नचैवं[5] तत्तद्वह्नित्वावच्छिन्नाभावव्यावर्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेण साध्याभावस्य निवेशनीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्न[6]तदभावस्य अतादृशत्वात् तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का ?, साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याशङ्काबीजत्वे के[7]वलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्न[8]प्रतियोगिताकस्य विशिष्टाभावरूपस्य तादृशाभावस्य स प्रसिद्धिसम्भवेन सौन्दलमतावलम्बनस्य निर्बीजत्वापातादिति वाच्यम्, महानसीयवह्नित्वाद्यवच्छिन्नाभाववा[9]रणाय साध्यतावच्छेदकापर्याप्ति[10]स्वसमानाधिकरणधर्म-

[1] " अपि " शब्दो नास्ति—अ.

[2] " पूर्वोक्तरीत्या " बोध्यम्—रा.

[3] कूटघटितरीत्या परिष्कारे दोषान्तरमाह—रा.

[4] ग्रन्थार्थः—रा.

[5] नचैवमपि—अ.

[6] वाच्यत्वाभावस्य—अ.

[7] केवलान्वयिसाध्यके—अ.

[8] प्रतियोगिताकाभावस्य—अ.

[9] व्यावर्तनाय—अ.

[10] व्यधिकरणधर्मावच्छिन्नाभावसंग्रहाय भेदप्रतियोगिभूतप्रतियोगितावच्छेदकतायां यथा समानाधिकरणधर्मवृत्तित्वं निवेश्यते तथा तत्स्थाने अव्यासज्यवृत्तिधर्मनिष्ठत्वं निवेश्य व्यासज्यवृत्तिधर्मावच्छिन्नाभाव एव संगृह्यतां तावतैव साध्याभावप्रसिद्धिसंभवात्, समानाधिकरणत्वस्याव्यावर्तकतया स्वसमानाधिकरणधर्मनिष्ठतादृशावच्छेदकताका या या प्रतियो-

निष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताकाभाव एव निवेश्य इत्यभि-[1]मानेन आशङ्कासङ्गतेः, प्रमेयत्वादिना प्रमेयमात्रं यत्र साध्यतावच्छेदकम्, तत्र प्रमेयत्वादिविशिष्टप्रमेयापर्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धम्, स्वसमानाधिकरणवृत्तिताद्दशावच्छेदकतानिरूपकप्रतियोगिताभिन्नं च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामा[2]त्रमेव ; यत्र याद्दशं साध्यतावच्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्वसमानाधिकरणधर्मावच्छिन्नत्वो-भयाभाववत्प्रतियोगितानिवेशाभिप्रायको वा अयं ग्रन्थः इत्याहुः । [3]नचैवं प्रमेयत्वावच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षण-समन्वयसम्भवात् दीधितिकृतां तत्र गगनत्व घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेय-सामान्याभावपर्यन्तानुसरणप्रयासो व्यर्थ इति वाच्यम् ; महानसीयवह्नित्वाद्य-वच्छिन्नाभाववारणाय साध्यतावच्छेदकस[4]मनियतप्रतियोगिताकः सा[5]ध्यता-वच्छेदकापर्याप्तसाध्यनिष्ठधर्मवृत्त्यवच्छेदकताकान्यप्रतियोगिताको वाऽभावो

गिताः तत्तद्भेदकूटस्यैव त्वया निवेशनीयतया तदपेक्षया व्यासज्यवृत्तिधर्मनिष्ठताद्दशावच्छेद-कताकप्रतियोगितासामान्यभेदस्यैकस्य निवेशे लाघवाच्च । न चैवमपि ताद्दशोभयाभाववति हेतोः सत्वादव्याप्तिरिति वाच्यम्, व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वेऽपि तद्दोष-तौल्यात् सौन्दलमतावलम्बनबीजं पुनः मृग्यमित्याक्षेपो गीर्वाणगुरुणापि निवारयितुं न शक्यते ।—रा.

[1] प्रायेण—अ.

[2] न चैवं वह्निमान् धूमादित्यादौ घटत्वेन पटाभावस्यापि साध्याभावत्वापत्तिरिति वाच्यम्, इष्टत्वात्, प्रतियोगितायां साध्यनिष्ठत्वं वा विशेषणमिति बोध्यम् ।—रा.

[3] एताद्दशग्रन्थस्याशङ्काबीजत्वे तस्य न्यूनतैव नास्ति, तत्परिहाराय दीधितिकृतां ताद्दशायासो व्यर्थ इत्याशङ्कते—न चैवमिति ।—रा.

[4] एतदभिप्रायेणैव गगनत्वेन प्रमेयसामान्याभावकथनं, न तु परकल्प इत्यवधेयम् ।—रा.

[5] लाघवादाह—"साध्यतेत्यादि"—एतत्कल्पे गगनत्वेन प्रमेयसामान्याभावस्य ताद्दशत्वेपि न क्षतिः ।—रा.

निवेश्यः, [1]तदभिप्रायेणैव तैस्तथाविधाभावानुसरणात्। न च घटत्वपटत्वोभयावच्छिन्नाभावप्रतियोगितावच्छेदकता साध्यवृत्तिधर्मनिष्ठैव, घटत्वपटत्वयोः प्रत्येकं साध्यनिष्ठत्वादिति कथमसौ लक्षणघटकः? इति वाच्यम्; "साध्यवृत्तिधर्मनिष्ठे" त्यनेन [2]यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत् तत्त्वस्य विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात्।

वस्तुतो वृत्तिमद्वृत्तयो यावन्तस्साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव **साध्याभाववदवृत्तित्वमि**त्यस्यार्थ इत्यभिप्रायकतया **अथे**त्यादिग्रन्थः सार्वभौमैर्व्याख्यातः; दीधितिकृतामपि तादृशग्रन्थस्य एतदभिप्रायकत्वमेवानुमतम् कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेप्यापाततः सम्भवदुक्तिकतयैव[3] शङ्कितुरभिप्रायविषयत्वौचित्यात्[4] व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य **प्रतियोग्यवृत्तिश्चे**त्याद्यवतारण[5]मनुचितमित्यभिप्रेत्यैव चाग्रे तल्लक्षणमाक्षेप्यमिति न सन्दर्भविरोधः। **यत्समानाधिकरणा** इत्यादि लक्षणाभिप्रायकता चात्र न युज्यते, तादृशव्याप्तेस्साध्याभाववदवृत्तित्वरूपत्वाप्रसक्तेरुक्त[6]लक्षणपरिष्कारासम्भवात्। व्यभिचारशरीरे च साध्यतावच्छेदकावच्छिन्नसाध्या-

[1] इति क्रमेण आशङ्काकृतेरभिप्रायेणेत्यर्थः।—रा.

[2] यद्विशिष्टाधिकरणं साध्यम्—अ; यद्यपि एतत्पाटे गगनत्वेन प्रमेयसामान्याभावसङ्ग्रहो न भवति, तथापि "यद्विशिष्टाधिकरणं वृत्तिमत्साध्यमि"ति विवक्षया न कोऽपि दोषः इति पाटद्वयमपि साधु—स्व.

[3] सम्भवदुक्तिकतयैव तस्याशङ्कितुः—अ.

[4] अनुमतमित्यनेन संबन्धः—रा.

[5] इत्यादि ग्रन्थावतरणमनुचितम्।—अ.

[6] मूलोक्त।—रा.

भावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेन [1]साध्याभाववदवृत्तित्वाभावस्य व्याप्तित्वे निराकृते च साध्याभाववदवृत्तित्वपदार्थस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन [2]यदित्यादि निर्दोषलक्षणमवलम्ब्य [3]**प्रतियोगी** त्यादेः स्वयमवतरणीयत्वात् । न च (सा[4]ध्याभाववदवृत्तित्वाभावस्य व्यभिचारत्वानभ्युपगमेऽपि) साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवदवृत्तित्वस्य व्यभिचारत्वसम्भवादुक्तव्याप्तेरव्यभिचाररूपत्वमक्षतमेवेति वाच्यम्, तस्य व्यभिचारपदार्थत्वे **नचैव** मित्यादिदर्शितायाः ज्ञेयत्वे वाच्यत्वव्यभिचारित्वव्यवहारापत्तेर्दुर्वारत्वात्, तस्यापि व्यधिकरणधर्मावच्छिन्नतादृशाभाववदवृत्तित्वेनोक्तलक्षणवत्त्वादिति सर्वमनाकुलम् ।

एवं च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुधावनं ग्रन्थकृतां सफलम्, घटत्वावच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादिति ध्येयम् ।

ननु वाच्यत्वं पदशक्तिः, सा च तत्तत्पदबोद्धव्यत्वप्रकारिका भगवदिच्छैव, न तु पदार्थान्तरम्, अपसिद्धान्तत्वात्; तथा च समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु, उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्? न च भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेः [5]घटादिपदावाच्यत्वानुपपत्तिः, घटादाविव पटादावपि घटादिपदबोद्धव्यत्वप्रकारिकाया भगवदिच्छायाः

[1] अव्यभिचारपदार्थरूपसाध्याभाववदवृत्तित्वाभावस्य ।—अ.

[2] यत्समानाधिकरणा इत्यादि ।—अ.

[3] प्रतियोग्यवृत्तिश्चेत्यादेः ।—अ.

[4] (. . .) एतच्चिह्नान्तर्गतपाठो प्रामादिकः—रा.

[5] घटादिपदवाच्यत्वापत्तिः—अ ; अयं पाटः ऋजुः—स्व.

विषयतासम्बन्धेन सत्वात् तदिच्छाया एकत्वादिति वाच्यम्; यद्धर्म्यंशे यस्य प्रकारता तस्यैव धर्मिणो विशेष्यतासम्बन्धेन तद्धर्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेः घटादिपदबोध्यतया भगवदिच्छाया अनवगाहनात्, तत्र विशेष्यतासम्बन्धेन तद्बोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः ।

न चैवं विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेषणांशे समवायित्वाभावात् तेन रूपेण विशिष्टाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमव्याहतमेवेति वाच्यम्, यतो विशिष्टाभावप्रतियोगिता न विशेषणान्तर्भावेन पर्याप्ता, अपि तु विशेष्यांशमात्रे अवच्छिद्यते पुनरियं विशेषणेन, प्रतियोगिताया अव्यासज्यवृत्तित्वात्; तथा च विशेष्यवृत्तेः समवायित्वस्य कथं प्रतियोगिताव्यधिकरणत्वमिति । न च प्रतियोगितायाः व्यासज्यवृत्तित्वानुपगमे सर्वत्र घटत्वेन घटपटोभयं नास्तीति प्रतीतिः कथमुपपद्यताम्? घटादिमति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्वेन तद्विषयाभावादिति अभावविशेषीयप्रतियोगित्वमवश्यमेव व्यासज्यवृत्त्युपेयम्, तथासति तत्र प्रतियोगितापर्याप्त्यधिकरणस्य उभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासम्भवात्, यद्धर्मावच्छिन्ने प्रतियोगितायाः पर्याप्तिः प्रतियोगितावच्छेदकविशिष्टस्य तदवच्छिन्नस्यैव अभावविरोधितया न तादृशाभावस्य सार्वत्रिकत्वानुपपत्तिरिति वाच्यम्; प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि तत्र एकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनोः घटत्वघटपटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात् तादृशाभावस्य विरुद्धघटत्वपटत्वाद्युभयावच्छिन्नाभाववत् केवलान्वयित्वोपपत्तेः । यद्यपि घटपटौ न स्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेन पर्याप्तम्, तथापि तत्र द्वित्व-

धर्मितावच्छेदकतापन्नस्यैव घटत्वादेः अवच्छेदकता प्रतीयते, अत्र स्वातन्त्र्येणापि इति भेदः। आस्तां वा उभयाभावप्रतियोगितायाः गत्यन्तराभावात् व्यासज्यवृत्तित्वम्, तथापि विशिष्टाभावप्रतियोगितायाः तथात्वमप्रामाणिकमेव, दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेरित्यत आह—दीधितौ **वाच्यत्वं यथे**ति। **तथाग्रे वक्ष्यत** इति।

अयमाशयः—वाच्यत्वं शक्तिविषयत्वम्, न तु शक्तिः धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापत्तेः; विषयत्वं च पदार्थान्तरमिति प्राचीननैयायिकैकदेशिसिद्धान्तः, तस्य च समवायो न सम्बन्धः, अपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेति एकदेशिमतानुयायितया मणिकारलेखनसङ्गतिरिति।

घटादिसमवायितयेति। तथा च वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि नासङ्गतिरिति भावः। यथाश्रुतपरतयैवोपपत्तेः समवायिपदस्य विशेषपरतया व्याख्यानमनुचितमिति **आहु**रित्यनेनास्वरसः सूचितः। ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धेस्सम्भवेऽपि प्रमेयत्वादिना प्रमेयसामान्यसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुवारैव, प्रमेयसामान्यावृत्तिधर्मस्याप्रसिद्ध्याव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तस्य असम्भवादित्यत आह—[1]**प्रमेयसाध्यकेचे**ति।

[1] संबन्धसामान्येन यत्र प्रमेयसामान्यस्य साध्यता तत्रैवाभावप्रसिद्ध्यर्थमिदं न तु स्वरूपादिसंबन्धमात्रेण साध्यतास्थले, तथा सति "वह्नित्वेन निर्वह्नौ" इत्यस्यासाङ्गत्यापत्तेः, साध्यतावच्छेदकतादृशसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्य वह्निमत्यपि प्रसिद्धेः संयोगादिना साध्यत्वेतु तादृशसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकप्रमेयाभावस्यैव गुणादौ प्रसिद्धेः वह्नित्वेनेत्यस्यासाङ्गत्यापत्तेः न च संयोगेन प्रमेयसामान्यसाध्यक द्रव्यत्वादिहेतुकस्थले एतादृशसंबन्धावच्छिन्नाभावस्य गुणादौ प्रसिद्धावपि कूटघटितलक्षणे सत्तावान् जातेरित्यादावव्याप्तिवारणाय उपात्तस्याभावे हेतुसामानाधिकरण्यविशेष-

भावत्वेनेति । अभावत्वेनेति । अभावानां भावानामित्युभयत्रैवाभाव इत्यग्रिमस्य सम्बन्धः/अभावत्वभावत्वाभ्यां भावाभावयोरभावौ समनियततया अभिन्नाविति तत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यमित्येतादृशाभावोऽपि कूटघटनया परिष्करणीयसाध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटको भविष्यतीत्यभिप्रायः । न च यदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके च तादृशाभावाप्रसिद्धिः, निखिलव्यधिकरणधर्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगित्वात्, किञ्चिद्विशिष्टस्वाभावादेरपि वह्न्याद्यभावप्रतियोगित्वात् इति तत्तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकतेति वाच्यम्, समनैयत्यशरीरे व्यापकतायाः तदभावप्रतियोगितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नायाः निवेशनेनानुपपत्त्यभावात् ।

ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकता चेत्[1]समनैयत्यशरीरे निवेश्यते तदाव्यधिकरणधर्मावच्छिन्नयोर्भावाभाववृत्तिप्रतियोगित्वयोः द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदक-

णस्य तत्रासत्वात् वह्नित्वेनाद्युक्तिरितिवाच्यम्, तथासति गुणत्वेन तादृशसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्य सर्वत्र प्रसिद्धत्वात् तत्परित्यागे बीजाभावः, हेतुसामानाधिकरण्यार्थमभावत्वेनभावाभावप्रसिद्धिकथनेऽपि भावत्वेनाभावाभावकथनेन संदर्भविरोधाच्च संयोगेनाभावाभावस्यैव केवलान्वयित्वात । इदमवधेयं संबन्धसामान्येन साध्यताभिप्रायेऽपि ईश्वरीयज्ञानत्वहेतुकस्थलेऽपि संबन्धसामान्येनाभावस्य हेतुसामानाधिकरण्यासंभवात विषयिता संबन्धेन साध्यतानुसरणं " विरुद्धे "त्यवतरणे संदर्भविरुद्धमिति संयोगसाध्यतावच्छेदकस्थलाभिप्रायकत्वमेव पूर्वाभावानां भट्टाचार्याभिमतं गुणत्वेन प्रमेयसामान्याभावस्य यादृच्छिकमनभिधानं भावत्वेनाभावाभावप्रदर्शनन्तु अनुपदं वक्ष्यमाणाभावाभावत्वेनाभावाभावसजातीयतयेति ।—रा.

[1] चेत्कदाचित् समनैयत्यशरीरे—अ.

तया नोक्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्यतः अभावान्तरमाह—**वह्नित्वेनेति**। **प्रमेयमात्रस्य अभाव** इत्यग्रेतनेनान्वयः। वह्नित्वेन प्रमेयं नास्तीति प्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात् प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भावः। यदि च—तत्र वह्निर्नास्तीति प्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामान्याधिकरण्येन भासत इत्युपेयते। युक्तं चैतत्; अन्यथा प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे वह्निः नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगिताया वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्मावच्छिन्नवह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना वह्न्याद्यभावीयवह्निमात्रनिष्ठप्रतियोगितामादाय वह्निमान् प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेः इत्युच्यते? तदा तादृशाभावस्य नोक्तरूपतेत्याशंक्याभावान्तरम् अनुसरति—**अवृत्तिमात्रेति**। [1]गगनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयते, अवच्छेदकैक्ये असति बाधके प्रतियोगिताया अप्यैक्यस्वीकारात् गगनभिन्ननिष्ठप्रतियोगिताया गगनवृत्तित्वेऽपि गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽवृत्तित्वेन गगनत्वेन गगनभिन्नाभावस्य केवलान्वयित्वोपपत्तेः। [2]वह्नित्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगितायाश्च वह्निनिष्ठतादृशप्रतियोगित्वाभेदे वह्न्यादिमति

[1] गगनत्वेन प्रमेयं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितायाः निखिलप्रमेयवृत्तित्वे युक्तिमाह "गगनं नास्ति" इत्यादिना—रा.

[2] वह्नित्वेन प्रतियोगितायाः निखिलप्रमेयवृत्तित्वे बाधकमाह "वह्नित्वावच्छिन्नेति" —रा.

वह्नित्वादिना घटाद्यभावसत्वानुपपत्त्या[1] उक्तरीत्या एकप्रतियोगितापत्त्यसम्भवः, एवं च गगनत्वावच्छिन्नैव प्रमेयत्वसमनियतप्रतियोगिता प्रसिद्ध्यतीति भावः। उक्तविशेषलाभायैव अवृत्तिमात्रवृत्तित्वकीर्तनम्।

नन्वेवमपि यत्र विषयितासम्बन्धेन प्रमेयसामान्यं साध्यम् ईश्वरज्ञानत्वादिकं हेतुः तत्र सत्तावान् जातेरित्यादौ साध्याभावकूटवति हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिध्या अव्याप्तेर्वारणायोपादेयसाधनसामानाधिकरण्यरूपविशेषणाक्रान्तसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगिताकाभावाप्रसिद्धिः गगनादेरपि विषयितासम्बन्धेन ईश्वरज्ञानादि सम्बद्धत्वात् तादृशसम्बन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासम्भवात् इत्यतः अभावान्तरमाह—**विरुद्धे**ति। येन सम्बन्धेन घटत्वपटत्वाद्योर्विरोधः, तत्सम्बन्धावच्छिन्नतदुभयनिष्ठप्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थः। प्रतियोगितावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनोऽप्रसिद्ध्या विरोधिविरहेणाभावस्य केवलान्वयितेत्यवधेयम्। इदमुपलक्षणम्— व्यधिकरणधर्मावच्छिन्नाभाववादिनां प्रतियोगितावच्छेदकतावच्छेदकरूपेणेव तादृशसम्बन्धेनाप्यवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात समवायादिसम्बन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम्। अत्यन्ताभावस्येव अन्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् प्रमेयसामान्यस्य यत्र तादात्म्येन साध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा प्रमेयसामान्यभेदो लक्षणघटकः, प्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथेत्यवधेयम्।

इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम्॥

[1] "असंभव" इत्यनेनान्वयः—रा.

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचाराभावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य घटकतया अप्रसिद्धिनिबन्धनाव्याप्तेः दुरुद्धरतयैव वादिनो निवृत्तेः व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरग्रन्थानुत्थितिरित्यतः ताद्दशग्रन्थमवतारयति—**नन्वित्या**दिना । **पारिभाषिक**मिति । तान्त्रिकसङ्केतरूपपरिभाषया व्याप्तिप्रतिपादकम्, न तु योगेनेत्यर्थः । **अव्यभिचरितत्वम्**—अव्यभिचरितत्वपदम् । [1]अथवा **पारिभाषिकमव्यभिचरितत्वम्**—परिभाषया अव्यभिचरितत्वपदप्रतिपाद्यम्; व्याप्यत्वमिति शेषः; न तु योगेन तत्पदलभ्यमित्यर्थः, तथाच व्यभिचारघटकसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न क्षतिरिति भावः ।

यदिति । यत्पदं यद्धर्मावच्छिन्नपरम्, अग्रे तत्पदमपि तद्धर्मावच्छिन्नपरम्; स च धर्मो हेतुतावच्छेदकीभूतधूमत्वादिः, सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको घटत्वादिना वह्न्यभावादिरेव, तस्य च प्रतियोगिसामानाधिकरण्यमावश्यकमिति लक्षणसमन्वयः ।

व्यभिचारिणि—व्यभिचारनिरूपकाधिकरणीभूतहेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावादिरपि, तस्य च प्रतियोगिसामानाधिकरण्याभावात् ताद्दशाभावस्य प्रतियोग्यधिकरणे कालिकसम्बन्धेन वृत्तावपि विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्य विरहात्

[1] अत्राव्यभिचरितत्वशब्दस्याव्यभिचरितत्वपदे शक्त्यभावात् निरूढलक्षणा वाच्या सापि न सम्भवति, शब्दकारकक्रियाविशेषसमभिव्यवहार एव पदानां स्वार्थकतायाः तान्त्रिकाभिप्रेतत्वादाहाथवेति ।—रा.

नातिव्याप्तिः; अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिकमादायाव्याप्तेर्वारणाय हेतुसामानाधिकरण्यमभावविशेषणम्, अभाववृत्तौ सम्बन्धभेदानिवेशेन वह्निमान् धूमादित्यादौ वह्नित्वादिना वह्न्याद्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसमन्वयसम्भवात् न तत्राव्याप्तेर्वारणं तत्फलमितिध्येयम्। अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे[1] सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः, अतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकविशिष्टत्वनिवेशः। यद्यपि अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिः, अभावे साध्यतावच्छेदकविशिष्ट[2]साध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते। धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य धूमाद्यभावस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणीयतया अयोगोलकान्तर्भावेन तादृशाभावस्यातथात्वान्नातिव्याप्तिः, **स्वविशिष्टहेत्वधिकरणे**त्यत्र यत्पदेनैव हेतोरुपादेयतया **तत्त्व**मित्यत्र तत्पदेन तस्यैव परामर्शात् व्याप्तेर्हेतुनिष्ठत्वोपपत्तिरिति; तथापि कपिसंयोगाभाववान् जातित्वादित्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या सत्तावान्[3] आत्मत्वादित्यादौ सत्ताधिकरणकाले[4] कालिकसम्बन्धेन

[1] "अष्टकान्यत्वे सति"।—अ।

[2] "अष्टद्रव्यातिरिक्तद्रव्यत्ववान्—आत्मत्वात्" इत्यादिसंग्रहाय विशिष्टसाध्यनिवेशः। —रा.

[3] "प्रतियोगिवैयाधिकरण्याघटितव्यापकत्वनिवेशेत्वाह"।—रा.

[4] साध्याधिकरणनिरूपितवृत्तित्वस्य दैशिकविशेषणतया विवक्षणे तु नायं दोषः; इत्थं च स्वविशिष्टत्वमपि न देयम्।—रा.

वर्तमानस्य सत्ताभावस्य तदप्रसिद्ध्या अव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तम् ।

यत्तु अयमात्मा ज्ञानादित्यादौ आत्मत्वत्वादिना आत्मत्वादेरभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिः, तस्यापि प्रतियोग्यधिकरणीभूते आत्मादावेकज्ञानविषयत्वस्वाश्रयाश्रयत्वादिरूपपरम्परासंबन्धेन वर्तमानतया प्रतियोगिसमानाधिकरणत्वादिति सामानाधिकरण्यान्तविशेषणमनर्थकमिति[1] ; तन्न ; एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात् । नचैवमपि **यदभावो व्यभिचारविरोधी**त्युपाधिलक्षणे [2]इहोपाधिर्नेहोपाधि[3]रिति प्रतीतिव्यवहारानुरोधेनाव्याप्यत्वस्य सम्बन्धताया ग्रन्थकृतैव स्वीकृतत्वात् तेन [4]सम्बन्धेनैवात्मवृत्तेरात्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यमक्षतमेवेति वाच्यम् ; अव्याप्यत्वादेस्सम्बन्धतायां विवादेन यदभावपदस्य यदव्याप्यत्वाद्यभावपरतामभ्युपगम्यापि ग्रन्थकृता तादृशलक्षणव्याख्यानात् तत्सम्बन्धताया अप्रामाणिकताभिप्रायेणैवात्र **यत्समानाधिकरणा** इत्युपादानात् । यावत्पदासत्वे **साध्यतावच्छेदके**त्यादिविशेषणस्य व्यावृत्तिर्नसङ्गच्छते, यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवात् ; अतश्चरमोक्तस्यापि तत्पदव्यावृत्तिं प्रथमतो दर्शयति— **सर्वत्रे**ति । **तथात्वात्—**

[1] "अफलमिति"—अ । कृष्णम्भट्टैस्तु "अनर्थकमिति" पाठमनुसृत्य व्याख्यातम् इति ज्ञेयम् ।—स्व.

[2] "इह हेतावुपाधिः"—अ । अयं ऋजुः पाठः—स्व । "हेतावुपाधिरित्यत्र साध्यव्यापकसाधनाव्यापकस्य सम्बन्धसामान्येनाभावो विषय इति वक्तुं न युक्तं, सद्हेतुस्थले तादृशोपाधेरसिद्धेः किंतु साध्यव्यापकस्य अव्याप्यतासंबन्धावच्छिन्नाभावः"—रा ।

[3] "नेह हेतावुपाधिः"—अ । अयं पाठो ऋजुः—स्व ।

[4] "आत्मभिन्नम् आत्मनः" इत्यादौ आत्मत्वाभावस्योपाधितया आत्मरूपहेतौ तादृशप्रतीत्याद्यनुरोधेन तादृशोपाध्यभाववन्निरूपितहेतुतावच्छेदकीभूततादात्म्यसंबन्धावच्छिन्नसंबन्धित्वरूपव्यभिचारस्यापि संबन्धत्वमावश्यकमिति भावः—रा ।

प्रतियोगिसमानाधिकरणत्वात्। तथाच यावत्पदादाने व्यभिचारिमात्रे एव अतिव्याप्तिरिति भावः।

यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्वत्र तादृशाभावस्य तथात्वकथनमसङ्गतम्, तथापि यावत्पदानुपादाने अतिव्याप्तिरेव, नाव्याप्तिः इत्येतत्सूचनाय **सर्वत्रे**त्युक्तम्। अथवा; **सर्वत्र**—सर्वाधिकरणावच्छेदेन, तथाच विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम्। ननु **यावत्प**दानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयः, तद्व्याप्यत्वं च स्वव्यापकतत्कत्वम्; अतो नानवस्था; वह्निमान् धूमादित्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्न्याद्यभावमादायैव लक्षणसङ्गतिः, इत्थंच धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसम्भवः, तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात्, एवं सति हेतुसमानाधिकरणत्वविशेषणमनर्थकमिति चेत्, तदपि तर्हि त्यज्यतामित्याशङ्कापरिहाराय तथाविधाभावनिवेशनेऽपि यत्रातिव्याप्तिस्तत्र **यावत्पदस्य** व्यावृत्तिमाह—**अत एवेति**। **अत एव**—यावत्पदोपादानादेव। **द्वित्वावच्छिन्नाभावस्य**—भूतत्वमूर्तत्वोभयत्वावच्छिन्नाभावस्य। **प्रतियोगिसामानाधिकरण्येऽपि**—मनसि अभावविशिष्टहेत्वधिकरणे मूर्तत्वरूपप्रतियोगिसामानाधिकरण्येऽपि। तथाच यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकरणतया अतिव्याप्तिः स्यादिति भावः।

यावत्पदसत्वे यादृशाभावमादायातिव्याप्तिवारणं तादृशाभावं दर्शयति—**भूतत्वमनोन्यत्वाभावस्येति**। भूतत्वाभावस्य मनोन्यत्वाभावस्य

चेत्यर्थः । **अतथात्वात्**—प्रतियोग्यसमानाधिकरणत्वात् । यावत्पदेदत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यभावमादायाव्याप्तिस्स्यादिति यथोक्तविशेषणस्यैवोपादेयतया तादृशाभावयोरपि लक्षणघटकत्वादिति भावः । भूतत्वस्यबहिरिन्द्रियग्राह्यविशेषगुणात्मकतया [1]प्रतियोगिस्वरूपाणां तन्निष्ठ प्रतियोगितानां चालिनीन्यायेन [2]उत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेनाखण्डव्याप्यवृत्तिमनोभेदाभावानुधावनम् । उक्तरीत्या अत एवेत्यादिग्रन्थावतारात् प्रथमतो वाच्यत्वाभावमादाय सर्वत्रैव व्यभिचारिण्यतिव्याप्तेर्दर्शितत्वात् साध्याभावमादाय व्यभिचारिविशेषे अतिव्याप्तिप्रदर्शनं संदर्भविरुद्धमित्याशङ्कानवकाशः ।

केचित्तु—यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्ये अतिव्याप्तिर्विश्राम्यतु, साध्याभावमादायापि क्वचिदतिव्याप्तिस्स्यात्, साच यावत्पदोपादानात् न भवतीत्यभिप्रायकतया न सन्दर्भविरुद्धमित्याहुः ।

परे तु—ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभावनिवेशनैवोपपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावनिवेशनमफलम्, तादृशप्रतियोगिताकत्वविशेषणव्यावर्तनीयस्य तत्तद्वह्न्याद्यभावस्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेनोक्तविशेषणेनापि व्या-

[1] इदं च चालिनीन्यायेन तादृशाभावप्रतियोगितावच्छेदकत्वे हेतुः—रा । सामान्याभावीयप्रतियोगिता प्रतियोगितदभावोभयस्वरूपा विशेषाभावीयप्रतियोगिता च केवलप्रतियोगिस्वरूपा इति प्राचीनमतं ज्ञेयम्—स्व ।

[2] प्रतियोगिताया अतिरिक्तत्वेत्वाह "उत्पत्ती"ति—रा ।

वर्तनसंभवात् अत आह—**अत एवेति**। यत एव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वमुपात्तम्, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे, तत एवेत्यर्थः। **भूतत्वेति**। साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ भूतत्वाभावमनोन्यत्वाभावप्रतियोगिताया उभयत्वाव्यापकत्वेन उभयत्वावच्छिन्नाभावादेरेव लक्षणघटकतया अतिव्याप्तिः स्यात्, यथोक्तविशेषणाक्रान्ताभावनिवेशे च भूतत्वमनोन्यत्वाद्यभावानामपि लक्षणघटकतया नातिव्याप्तिरितिभावः। न च साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतुसमानाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः, [1][साध्यतावच्छेदकव्यापकताया लक्षणे निवेशे] तादृशव्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशासम्भवात् प्रतियोगितावच्छेदकसम्बन्धेन तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम्; प्रतियोगितावच्छेदकसम्बन्धेन तत्सामानाधिकरण्यनिवेशेऽपि वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणस्य वह्नित्वव्यापकप्रतियोगिताकस्य पर्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं पर्वतान्तर्भावेन नास्तीत्यव्याप्त्यापत्त्या[2] तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासम्भवात् साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यमगत्या वाच्यम्, तथा च मनोभिन्नभेदस्य[3] तेन सम्बन्धेन मूर्तत्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यति-

[1] [ ] "साध्यतावच्छेदकावच्छिन्नव्यापकताया लक्षणेऽनिवेशे" (अ) (क)।

[2] इदमुपलक्षणं संबन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय सर्वत्र लक्षणासम्भवोऽपि बोध्यः। अत्र समवायसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाव्याप्तिसंभवे तादृशभेदपर्यन्तानुधावनं व्यर्थमिति मन्तव्यम्—रा।

[3] "मनोभिन्नभेदस्यापि"—अ।

१घटत्वाभाववान् मेयत्वात् इत्यादौ पूर्वक्षणवृत्तित्वविशिष्ट
स्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय-

व्याप्तेः। साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्य[1]-माणस्थलान्तरेऽप्यतिव्याप्तिस्स्यादिति तु नास्माकं[2] दोषः इत्यभिप्राय इति व्याचक्रुः ;—

तत्तु न समीचीनतया प्रतिभाति, साध्यतावच्छेदकेत्यादिविशेषण-व्यावृत्तेः पश्चाद्वक्ष्यमाणतया, तदुत्तरमेव साध्यतावच्छेदकावच्छिन्नेत्यादि-विशेषणस्थले[3] साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविशेषणं किन्नोपात्तमि-त्याकांक्षोदयात् आदावेव तादृशविशेषणपरित्यागबीजकथनस्यासङ्गतत्वादिति।

गोत्वाद्यभावस्येति। प्रतियोग्यसामानाधिकरण्यादित्यर्थकेनातथा-त्वादित्यनेनान्वयः; तथा च साध्यतावच्छेदकेत्याद्यनुपादाने[4] असंभव इति भावः। यद्यपि गोत्वाभावादेरपि पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रति-योगिसामानाधिकरण्यं पर्वतादावप्यस्ति, तथापि व्यापकताया लक्षणाघटकत्वे साध्यतावच्छेदकसम्बन्धेन[5] [6]भावरूपप्रतियोगिसामानाधिकरण्यं धूमवान् वह्ने-

[1] "वक्ष्यमाणेति" दलान्तरेऽपीति दीधितिव्याख्यानावसरे गदाधरभट्टाचार्यैः वक्ष्य-माणघटत्वाभाववान् मेयत्वादित्यादावित्यर्थः—रा ; गदाधरेण धूमत्वप्रकारकप्रमाविशेष्य-तावान् वह्नेरित्यादौ नास्माकं दोष इति। प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामा-नाधिकरण्यस्वीकारपक्षे तद्दोषस्याविशिष्टत्वादिति भावः। तद्वारणप्रकारश्च भावरूपप्रतियोगि-सामानाधिकरण्यविवक्षया ; न चैवं घटत्वाभाववान् पटत्वादित्यादौ यावदन्तर्गतव्यधिकरण-धर्मावच्छिन्नसाध्याभावस्यातथात्वादव्याप्तिरिति वाच्यम् ; साध्यतावच्छेदकव्यापक-प्रतियोगितायां भावनिष्ठत्वनिवेशात्। इत्थं च घटावृत्तित्वावच्छिन्नाभावमादाय लक्षणसम-न्वयः। आकाशाभाववान् मेयत्वादित्यादौ घटत्वपटत्वाभ्यां प्रमेयसामान्याभावमादाय लक्षणसमन्वयः इयं च प्राचीनटिप्पणीति ज्ञेया—अ.

[2] "नास्माकमेव दोषः"—मै ; एतत्पाठमनुसृत्य कृष्णम्भट्टीये प्रतीकधारणम्, न्यायरत्ने "नास्माकं दोषः" इति पाठमनुसृत्य इति ज्ञेयम्—स्व.

[3] "स्थाने"—अ.

[4] अनुपादाने च—अ.

[5] न्यायरत्ने तु "साध्यतावच्छेदकसंबन्धेन" इतिपाठः प्रामादिकः इत्युक्तमिति ध्येयम् कृष्णंभट्टीये तादृशपाठः क्वचित् इति—स्व.

[6] अत्र साध्यतावच्छेदकसंबन्धेनेत्यनेनैव "धूमवान् वह्ने"रित्यादौ अतिव्याप्तिवारणेऽपि "धूमप्रकारकप्रमाविशेष्यतावान् वह्ने"रित्यादौ अतिव्याप्तिवारणाय भावरूपेत्युक्तमिति ध्येयम्—रा.

रित्यादौ धूमाभावादेः पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेर्वारणायावश्यं विवक्षणीयम्, तथा चायमसम्भव इति भावः। साध्यप्रतियोगिकाभावनिवेशेऽपि गोत्वाद्यभावमादायासम्भवस्य वारणसम्भवात् **तत्तत्साध्यव्यक्त्यभावस्येति**। अस्य च "नानाव्यक्तिसाधकके" इत्यादिः, तथा च साध्याभावनिवेशेऽपि वह्निमान् धूमादित्यादावव्याप्तिस्स्यादिति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वञ्च, साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वम्। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ [1][विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वाद्यभावीयप्रतियोगिताया न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वम्, सत्तावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्वात् अतो विशिष्टसत्ताद्यभाव एव लक्षणघटकः, तस्य[2] च गुणादौ] सत्तादिरूपप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः, अतः साध्यतावच्छेदकावच्छिन्नत्वोपादानम्। तथा च सति द्रव्यत्वाभावप्रतियोगिताया अपि विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशाभावानां च गुणादावतथात्वान्नातिव्याप्तिः; [3]यत्किंचिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वाभावादिकमादायाव्याप्तिर्बोध्या।

साध्यवत्त्वं च साध्यतावच्छेदकसंबन्धेन बोध्यम्, अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः कालिक-

[1] [ ] एतच्चिह्नमध्यस्थः नव्यः पाठः इत्युक्तम्—रा; तत्स्थाने "सत्ताव्यापकतावच्छेदकप्रतियोगिताकविशिष्टसत्ताद्यभावस्य" इति पाठः—अ.

[2] (अ) पुस्तके नव्यपाठत्वेन उक्तात्रपि कृष्णंभट्टीये तस्येत्यस्यार्थवर्णनं दृश्यते—स्व.

[3] यत्किंचित् पदं साध्यतावच्छेदकपरं तद्घटकपरं वा, प्रकृते गुणकर्मान्यत्ववैशिष्ट्यावच्छिन्नव्यापकतामादायातिव्याप्तेरभावादिति भावः—रा.

विशेषणताविषयितादिसंबन्धेन धूमाधिकरणकालज्ञानादौ संयोगादिसंबन्धेन स्वावच्छिन्नाभावसत्वात् न केनापि संबन्धेन व्यापकतावच्छेदकत्वमिति केवलान्वयिवाच्यत्वादिनिष्ठप्रतियोगितैव स्वरूपादिसम्बन्धघटितव्यापकतावच्छेदिका स्यादित्यतिव्याप्तिः । [1]न च संबन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयविषयतासंबन्धावच्छिन्नप्रतियोगितानवच्छेदिका या प्रमानिष्ठप्रतियोगिता तन्निरूपकप्रमाभावस्य च न विवक्षणीयसाध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्संबन्धेन स्वविशिष्टयावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यं, साध्यतावच्छेदकसंयोगादिसंबन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसम्बन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धस्यापि घटकतया तेन संबन्धेनायोगोलकादौ प्रतियोगिनोऽसत्त्वादिति वाच्यम्; यतो विषयताया विषयतात्वेनैव सम्बन्धता प्रामाणिकी, न तु तथाविधविशेष्यतात्वेनेति[2] । परन्त्वेतादृशदिशा समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतावेवातिव्याप्तिवारणं सम्भवति, तत्र ज्ञानाभावस्य सम्बन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य, साध्यतावच्छेदकसंबन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहादिति । न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयसंबन्धसामान्यावच्छिन्नप्रतियोगितायां धूमाद्यभावीय-

[1] यद्यपि वक्ष्यमाणरीत्या धूमवन्निरूपितविशेषणतादिना वाच्यत्वाद्यभावस्यापि प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिरिति शङ्कापि संभवति, धूमवन्निरूपितविशेषणतात्वस्य क्वचिदपि अनुल्लेखात् न तादृरूप्येण संबन्धताशङ्कापि इत्यतो नचेत्यादिना शङ्कते—रा.

[2] विशेषरूपेण संसर्गतास्वीकारे अतिव्याप्त्यभावात् अभावे यावत्त्वविशेषणं निरर्थकमिति न्यायरत्ने—स्व.

संबन्धसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकं संयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन धूमादेः यत्किञ्चित्संबन्धेन धूमादिमति अभावसत्वेऽपि संबन्धत्वरूपव्यापकधर्मावच्छिन्नसंयोगादिसंबन्धावच्छिन्नप्रतियोगिताकतदभावासत्वात्; तथा च धूमाद्यभावस्यापि लक्षणघटकतया तस्य च साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिरिति वाच्यम्, संबन्धत्वेन संबन्धानां अभावप्रतियोगितावच्छेदकसंबन्धत्वे मानाभावात्, तेन रूपेण संबन्धानां व्यापकताघटकत्वासम्भवात्।

वस्तुतस्तु प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः [1]स्वातन्त्र्येण निवेशस्य [2]प्रतिक्षेप्यत्वात् ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिरस्त्येव[3]। वस्तुतस्तु संयोगसमवायादिसाधारणानुगतसंबन्धत्वस्य [4]कथञ्चित् सुवचत्वेऽपि तेन रूपेण संयोगादीनां सम्बन्धतया भानस्य [5]निर्युक्तिकतया, व्यापकताशरीरे लाघवानुरोधात् साध्यप्रकारेणाधिकरणनिवेशे साध्यसम्बन्धोऽपि विशिष्य संसर्गतया निवेश्यः, तथा च विशिष्य साध्यतावच्छेदकसम्बन्धनिवेशनमावश्यकमिति ध्येयम्। यत्किंचित्संबन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विषयितासंबन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगिताया अपि व्यापकतावच्छेदकतया तादृशाभावस्य लक्षणघटकत्वे

[1] "प्रतियोग्यधिकरणतानियामकसंबन्धघटकत्वेन"—रा.

[2] "संबन्धभेदनिबन्धनो दोष" इत्यादि दीधितिव्याख्यानावसरे—रा.

[3] "एतेन जन्यमात्रस्य कालोपाधित्वानुपगमे अयोगोलकादौ धूमाद्यसत्वात् संबन्धसामान्येन धूमादिकं प्रति विशेषणताविशेषेणायोगोलकान्यत्वादिरेव व्यापकः तेन संबन्धेन प्रतियोगिमद्वृत्तित्वविरहात् 'धूमवान् वह्नेः' इत्यादौ नातिव्याप्तिसंभवः इत्यलं प्रथमव्यापकताशरीरे संबन्धविशेषनिवेशनेति परास्तम्" क्वाचित्कपाठः इति—अ.

[4] "अखण्डोपाधित्वमुपेत्य" "अन्यतमत्वादि"—रा.

[5] संबन्धेन घटो नास्ति इति प्रत्ययाभावादिति भावः—रा.

तस्य च पर्वतादौ प्रतियोगिसामानाधिकरण्यविरहादसम्भवो बोध्य इति साध्यतावच्छेदकसम्बन्ध एव संसर्गतया विशिष्य निवेश्यः। साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे सर्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतोऽवच्छेदकगर्भता। तादृशाभावप्रतियोगितानच्छेदकत्वं च तादृशप्रतियोगितायां समानाधिकरणं सत् यदवच्छेदकं तदन्यत्वम्; अन्यथा व्यतिरेकिप्रतियोगितामात्रस्यैव व्यधिकरणधर्मतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्वपटत्वोभयाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिव्याप्तिप्रसङ्गात्।

यत्तु साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वनिवेशे नैव सर्वसामञ्जस्ये निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलम्; वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्यभावप्रतियोगिनां वह्न्यादीनां चालिनीन्यायेन[1] साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्, व्यभिचारिणि व्यभिचारनिरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारणसम्भवाच्च। न च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यम्, व्यापकतावच्छेदकताघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वस्याधिकस्य[2] निवेशनीयतया एतन्मते तदनिवेशेन लाघवात्, तन्मते तदनिवेशे सर्वासामेव प्रतियोगितानां [3]साध्यवन्निष्ठो

[1] चालिनीभ्रामणे तत्स्थतण्डुलादीनां तच्छिद्रद्वारा सर्वेषां यथा पतनम्, एवं क्वचित् स्थितवस्तूनां सर्वेषां लक्षणबहिर्भावः

[2] "अधिकस्य" इति नास्ति—अ.

[3] साध्यवन्निष्ठो यः इति नास्ति—अ.

यो विषयितादिसम्बन्धेन स्वावच्छिन्नस्याभावः तत्प्रतियोगितावच्छेदकतया व्यापकतावच्छेदकप्रतियोगिताया एव अप्रसिद्ध्यापत्तेः, भेदप्रतियोगिताव-च्छेदकतायां व्यापकताघटकसंबन्धावच्छिन्नत्वस्यैतन्मते निवेशवत् भवन्मते-ऽप्यभावप्रतियोगितायां तन्निवेशस्यावश्यकतया तदंशे [1]साम्यादिति;

तदसत्;—यतोऽनवच्छेदकप्रतियोगिकत्वं अनवच्छेदकनिष्ठप्रति-योगितानिरूपकत्वं, प्रतियोगितायां तन्निष्ठत्वं च स्वरूपसंबन्धेन वाच्यम्, अन्यथा वह्निमान् धूमादित्यादावपि विषयितासम्बन्धेन साध्यव्यापके प्रमेय-मित्याकारकविश्वविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावप्रतियोगिताया वृत्तेः तादृशाभावस्य लक्षणघटकत्वापातात्; विषयिताया वृत्त्यनियामकतया एतद्दोषानवकाश[2] इति चेत्? एवमपि "एतद्वह्निमान् एतद्धूमात्" "तद्रूप-वान् तद्रसात्" इत्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकसाध्यतत्समानाधिकरणकर्मादौ वर्तमानतया लक्षणघटकत्वापातः, तथा च व्यापकनिरूपितवृत्तौ स्वरूपसंबन्धावच्छिन्नत्वनिवेशस्यैतन्मतेऽप्यावश्य-कतया न लाघवावकाशः, विपरीतमेव गौरवमाधेयत्वांशनिवेशाधिक्येनेति। न च व्यापकनिष्ठप्रतियोगिताकत्वेनाभावो न निवेशनीयः, येनोक्तगौरवं स्यात्; अपि तु अनुयोगितासम्बन्धेन व्यापकविशेषित एव, तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेन अभावनिवेशापेक्षया लाघवम् [3]अक्षतमे-वेति वाच्यम्, प्रतियोगिविशेषणतापन्नधर्मावच्छिन्ननिरूपितत्वानवच्छिन्नानु-योगिताया अभावांशे प्रतियोगिसम्बन्धतया भाने पटादिमति घटत्वा-वच्छिन्नाभावविषयिण्या द्रव्यं नास्तीत्याकारकप्रतीतेरापत्तेः, तदवच्छिन्न-

[1] अन्योन्याभावस्याखण्डतया तदवच्छिन्ननिरूपितप्रतियोगितायाः संबधावच्छिन्नत्वे-नानिवेशात् अत्यन्ताभावत्वस्यापि अखण्डत्वे दोषः स्पष्ट एव इत्याशयः—रा.

[2] जलत्वाद्यभावप्रतियोगितायाः विषयितासंबन्धेन तत्र वृत्तित्वासंभवादित्याशयः—रा.

[3] प्रतियोगित्वाप्रवेशेन—रा.

निरूपितानुयोगिताया एव संसर्गतया भानोपगमात्; व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः सम्बन्धविधया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्याभावस्य[1] संबन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथंचित् प्रसिद्ध्या लक्षणसमन्वयेऽपि व्यभिचारिण्यतिव्याप्तिः,[2] व्यभिचारनिरूपकाधिकरणेऽपि कस्यचित् साध्यव्यापकस्य वृत्तेः, व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तेश्च । एवमनवच्छेदकपदेनावच्छेदकतापर्याप्त्यनधिकरणत्वमवश्यं वाच्यम् । अन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वात् लक्षणाघटकत्वापत्तेः, तथा च घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिः, वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकताया घटत्वविशिष्टपर्याप्ततया शुद्धघटस्य[3] तत्पर्याप्त्यनधिकरणत्वात् ।

अथ निरुक्तव्यापकतावच्छेदकताया निवेशे कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः, कपिसंयोगाभावादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभाव-प्रतियोगित्वावच्छेदकत्वात इत्यग्रिम[4]ग्रन्थविरोधः । न च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्वात् साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम्, प्रकृतव्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात् ।

[1] साध्यव्यापकाभावस्य—अ.

[2] इदमुपलक्षणं—यत्समानाधिकरणत्वस्य—स्वविशिष्टत्वस्य वैयर्थ्यं बोध्यम्—रा.

[3] अत्रपाठभेदः कृष्णंभट्टीये—स्व.

[4] तथा च व्यधिकरणधर्मवच्छिन्नाभावमादायलक्षणसमन्वयसंभवात् किं स्वविशिष्टहेत्वधिकरणावच्छेदनेति शेषः—रा.

अत्र केचित्;—व्यापकतालक्षणे अभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकम्, अन्यथा अभावे सम्बन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तिः यः स्वावच्छिन्नाभावः तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतया अतिव्याप्त्यापत्तेः . दैशिके[1] विशेषणतासम्बन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन सम्बन्धेन वृत्तेरप्रामाणिकतया वह्निमान् धूमादित्यादौ पर्वतत्वाद्यभावनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकतापत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात्; हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि तादृशसम्बन्धावच्छिन्नत्वनिवेशे नानास्थाने तादृशसम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितावच्छेदकतावारणाय सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वनिवेशेन च गौरवात् अभावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितम् . व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषासम्भवात्, एतन्मते अवच्छेदकतायां सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानिवेशात् अभावीयवृत्तौ सम्बन्धभेदानिवेशाच्च लाघवम्। प्रतियोगिवैयधिकरण्यं च न प्रतियोगिसमानाधिकरणभिन्नत्वम्, तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगिसमानाधिकरणतया अभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठप्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादायाव्याप्त्यापत्तेः; किन्तु प्रतियोग्यनधिकरणवृत्तित्वम्, तथा च प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावेत्यभावान्तार्थनिष्कर्षः।

[1] इदमुपलक्षणम् सद्धेतुमात्रे एव तादृशयावदभावान्तर्गतस्य तत्तद्व्यक्तिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्याभावादसंभवः—रा.

अत्र च व्यापकताघटकत्वेन अभिमतो यः सम्बन्धः तेन प्रतियोग्यनधिकरणत्वं वाच्यम्; तेन कालपरिमाणादिसाध्यकस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः। कालः [1]सर्ववान् कालपरिमाणादित्यादौ साध्यतावच्छेदककालिकसंबन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिध्द्या तादृशसंबन्धस्य व्यापकताघटकत्वासम्भवेऽपि न क्षतिः; तत्र समवायादिसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्। अथैवं दैशिकविशेषणतासंबन्धस्य क्वापि व्यापकताघटकत्वं न स्यात्, सर्वस्यैवाभावस्य पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनः तेन सम्बन्धेन साध्यवति वृत्तेः, तेन सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः। न च तादृशसंबन्धस्य व्यापकत्वाघटकत्वेऽपि क्षतिविरहः, सामान्यादि[2]मात्रवृत्तिसाध्यकस्थलेऽपि विषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वादिप्रकारकप्रमा[3]भावमादायैवोपपत्तिसम्भवात् इति वाच्यम्; तादृशसम्बन्धस्यातथात्वे तेन संबन्धेन कपिसंयोगाभावादिसाध्यकप्रमेयत्वादिहेतुकस्थले तन्निष्ठकपिसंयोगाद्यात्मकाभावीयप्रतियोगिताया व्यापकतावच्छेदकतानुपपत्त्या अग्रिमग्रन्थासङ्गतितादवस्थ्यमिति चेन्न;—लाघवानुरोधेन येन येन संबन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वमिति वक्तव्यम्; इत्थं च कपिसंयोगाभावादिसाध्यकस्थले

[1] अत्र कालिकसंबन्धेन घटादेः साध्यत्वे तेन संबन्धेन साध्यवतः किञ्चितभूतलादेः तेन संबन्धेन तदसमानकालीनयत्किञ्चित्व्यक्त्यनधिकरणतया तद्व्यक्त्यभावस्य व्यापकताघटकत्वसंभवात सर्वसाध्यकानुधावनम्—रा.

[2] वाच्यत्वादिसाध्यकजातित्वज्ञेयत्वादिहेतावपि इत्यर्थः। अत्र मात्रपदं व्यर्थमिति मन्तव्यम्—रा. कृष्णंभट्टीये न्यायरत्ने च वैयर्थ्यपरिहारः—स्व.

[3] तादृशाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः—रा.

तन्निष्ठप्रतियोगितावच्छिन्नप्रतियोगिता नोक्तयादृशपदेनोपादातुं शक्यते, तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसम्भवात्; किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव, दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य साध्यवति घटादौ सत्त्वात्० तदनवच्छेदकत्वं च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेः दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वनिर्वाहः, समनियताभावैक्यमते घटाद्यभावानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिः[1], अतः प्रतियोगितावदनधिकरणत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशः। न च घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेऽपि तदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकतालक्षणसामञ्जस्यमिति वाच्यम्; तादृशाभावानामभेदे घटो नास्तीत्यादिप्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसंभवात् घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात्, समनियताभावानामभेदानभ्युपगन्तृमतेऽपि साध्याभावादिप्रतियोगितया साध्यवदवृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकत्वापत्तिवारणाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम्। अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादि०व्यधिकरणसंबन्धघटितव्यापकतावच्छेदकतापत्तिः, संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्या यादृशप्रतियोगितेत्यत्र तादृशप्रतियोगितावच्छिन्नायाः प्रतियोगिताया उपादातुमशक्यतया प्रतियोगित्वान्तरमुपादाय तत्रानवच्छेदकत्वान्तसत्त्वात्; तथा च

[1] यदि च घटत्वेन प्रमेयाभावस्य घटमात्रवृत्तिप्रतियोगिकत्वमुक्तरीत्या स्वीक्रियत इति नाप्रसिद्धिरिति विभाव्यते तदा समनियताभावानामनैयत्यपक्षे वक्ष्यमाणदोषोऽत्र बोध्यः—रा, अनधिकरणसाध्यवतः इति प्रतीकं न्यायरत्ने.

यावद्व्यापकताघटकसंबन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यासम्भवादसम्भवः । न च संयोगादिना[1] द्रव्यत्वाद्यभावस्य स्वसमनियतघटत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नतया संयोगादिना वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसत्वान्नासम्भवः इति वाच्यम्; एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशाभावानां संयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्वारत्वात्; नैवम्—व्यापकताघटकत्वेन अभिमतो यः सम्बन्धः तेन सम्ब्रन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगिताया विशेषणीयत्वात् द्रव्यत्वादेः संयोगादिना अवृत्तितया उक्तदोषानवकाशः इत्याहुः ।

वस्तुतस्तु—लघुरूपसमनियतगुरुधर्मस्य अनवच्छेदकत्वे घटाद्यभावप्रतियोगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिः, तादृशप्रतियोगिताविशिष्टघटाद्यभावीयप्रतियोगितायां लाघवेन घटत्वादेरेवावच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेदकत्वात् । न च प्रतियोगितायास्तदभावीयप्रतियोगितात्वेन अवच्छेदकतायां गौरवेऽपि स्वरूपतोऽवच्छेदकत्वे अविशेषः; प्रतियोगितायाः स्वरूपतो भानाभावेन तेन रूपेणावच्छेदकताया अपि असम्भवादिति, पारिभाषिकमवच्छेदकत्वं व्यापकतावच्छेदकताशरीरे निवेशनीयम्, तथा च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं फलतः साध्यवद्यत्किञ्चिद्व्यक्त्यसम्बद्धस्वविशिष्टसामान्यकं यद्यत्स्वं तत्तदन्यत्वमेव व्यापकतावच्छेदकत्वं, तथा च कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमनायासेनैव[2] निर्वहति, यतः कपिसंयोगाद्य-

[1] प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्योक्तावपि दोषलाभार्थमिदम्—कृ.

[2] प्रतियोगिवैयधिकरणाद्यनिवेशेनैव—कृ.

भावनिष्ठप्रतियोगिताविशिष्टस्य सर्वत्रैव साध्यवति वृत्तेः तस्याः स्वपदेन उपादातुमशक्यत्वात् तादृशं स्वं धर्मान्तरमेव, तदन्यत्वं च तादृशप्रतियोगितायामक्षतमिति। असम्बद्धत्वशरीरे च व्यापकताघटकत्वेन अभिमतो यः सम्बन्धः स एव निवेशनीयः, द्रव्यत्वादिनिष्ठप्रतियोगित्वं च संयोगादिसम्बन्धेन साध्यवदसम्बद्धस्वविशिष्टसामान्यकमेव, अतो न संयोगघटितव्यापकत्वावच्छेदकत्वं तस्येति नोक्तदोषावकाश इति दिक्।

येन सम्बन्धेन हेतुरिति। व्याप्यतावच्छेदकत्वेनाभिमतो[1] यः सम्बन्धः इत्यर्थः। **बोध्य**मित्यस्य "हेतुसामानाधिकरण्यघटक" मित्यादिः, **तेन**—तादृशसम्बन्धविवक्षणेन। **आत्मत्वे साध्य** इति। अयमात्मा ज्ञानादित्यादावित्यर्थः। **साध्याभावस्य**—साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य। **अतथात्वेऽपि**—स्वविशिष्टस्य हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्य अप्रसिद्ध्या [2]विवक्षणीयप्रतियोगिसामानाधिकरण्यविरहेऽपि। **न क्षतिः**—नाव्याप्तिः। वह्निमान् धूमादित्यादौ धूमावयवादिवृत्तेर्वह्नित्वाद्यवच्छिन्नाद्यभावस्य स्वविशिष्टं यद्धेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं सम्भवत्येव, तथाविधहेत्वधिकरणपर्वतादेः जन्यमात्रस्य कालोपाधितया कालिकसम्बन्धेन तादृशाभावविशिष्टत्वात् तदन्तर्भावेन तेन सम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वाच्च, अभाववैशिष्ट्यादौ सम्बन्धविशेषानिवेशादित्यभिप्रायेण नित्यमात्रवृत्तिहेतुकस्थलानुधावनम्।

अथ वह्निव्यापकस्य चरमक्रियाभावस्य योऽभावः चरमक्रियात्मकः तस्य कालिकसम्बन्धेन हेत्वधिकरणे महाकाले वर्तमानस्य न विवक्षणीय-

[1] "घटकत्वेन"—अ.

[2] विवक्षणीयस्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि—अ.

प्रतियोगिसामानाधिकरण्यसम्भवः तद्विशिष्टस्य हेतुतावच्छेदकसंयोगेन धूमाधिकरणस्याप्रसिद्धेः, धूमाधिकरणपर्वतादेः तदसमानकालीनतया तत्र कालिकसम्बन्धेनापि तद्वैशिष्ट्यासम्भवादिति आत्मत्वसाध्यकपर्यन्तानुधावनमफलम् । न च वृत्त्यनियामकसंयोगेन धूमसम्बन्धिपरमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वात् संभवत्येव विवक्षणीयप्रतियोगिसामानाधिकरण्यम्, तादात्म्यसम्बन्धावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसम्बन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम्, यादृशपरमाणौ कदापि धूमसंयोगो नासीत् तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसम्बन्धिन्यसत्त्वेन तमादायैवाव्याप्तिसम्भवादिति चेन्न; महाकालस्यैव वृत्त्यनियामकसंयोगसम्बन्धेन हेतुसम्बन्धितया तत्र कालिकसम्बन्धेन चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवात्, वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात् । न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थले अव्याप्तिरस्त्येवेति वाच्यम्; तेन रूपेण सम्बन्धतायां मानाभावात्, कालस्यावृत्तितया कालधूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वाच्च; वह्निमान् धूमादित्यादौ साध्याभावमादाय नाव्याप्तिसंभवः, किन्तु चरमक्रियाद्यात्मकमभावमादायैवेत्यव्याप्तेः स्फुटतरप्रतिपत्त्यर्थं आत्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति ।

ननु ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः; न च तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव न काले

प्रतियोगिसमानाधिकरणः, आत्मनोऽवृत्तितया काले कालिकसम्बन्धेनावृत्तेरिति वाच्यम्, आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात्। [1]नित्यद्रव्याणां कालावृत्तित्वेऽपि "महाकालभिन्नो द्रव्यत्वात्" "ईश्वरज्ञानभिन्नं गुणत्वात्" इत्यादावतिव्याप्तिः, वृत्तिमतामेव[2] महाकालभेदेश्वरज्ञानभेदव्यापकतया तदभावानां यावतामेव महाकालेश्वरज्ञानादौ कालिकविशेषणताविषयितासम्बन्धघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह—**एवं दलान्तरेऽपीति**।

दलान्तरे—प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्तादले। **सम्बन्धभेदनिबन्धनो दोषः**—कालिकादिसम्बन्धमादायातिव्याप्तिरूपः। **सम्बन्धैक्यविवक्षया**—व्यापकताघटकसम्बन्धप्रतियोगिमत्ताघटकसम्बन्धयोरैक्यविवक्षया। तथा च "ज्ञानवानात्ममहाकालन्यतरत्वात्" "महाकालभिन्नो द्रव्यत्वात्" इत्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितव्यापकताघटकसमवायदैशिकविशेषणतादिसम्बन्धेन ज्ञानाभावमहाकालभेदाभावादिप्रतियोगिनां कालादाववृत्तेर्नातिव्याप्तिरिति भावः।

अत्र च येन सम्बन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता, तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्षणीयम्, अन्यथा "इदं नित्यज्ञानम्—नित्यत्वे सति सविषयकत्वा"दित्यादौ हेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयितासम्बन्धेनापि व्यापकतया तेन सम्बन्धेन हेत्वधिकरणेश्वरेच्छाकृत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः, येन येनेत्युक्तौ च तथाविधसमवायादिसम्बन्धेन अतथात्वान्नातिव्याप्तिः। अत्र च साध्यतावच्छेदकावच्छिन्न-

[1] पूर्वक्षणावच्छिन्नाभावाप्रतियोगित्वस्य कारणताघटकत्वे त्वाह—"नित्येति"—रा.

[2] अवृत्तीनां व्यापकत्वासंभवं वक्तुमेवकारः न तु यावतां वृत्तिमतां व्यापकत्व वक्तुम्—कृ.

व्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसम्बन्धत्वेन तादृशसम्बन्धस्य प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशः, तथा सति अभावे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात्; न हि तादृशविशेषणानुपादाने गोत्वाद्यभावमादाय असम्भवः सम्भवति, गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदैशिकविशेषणतासम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्वात्, धूमवान् वह्नेरित्यादौ धूमाद्यभावस्य अयोगोलके पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्येऽपि यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविरहात्, घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियोगिसामानाधिकरण्येऽपि विशेष्यतासम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटावृत्तेर्घटत्वाभावादिप्रमायास्तादृशसम्बन्धेन अभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गततादृशसम्बन्धेन[1] घटे प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्त्यनवकाशात्; अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपित यद्यत्सम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताका ये ये अभावाः तेन तेन सम्बन्धेन प्रतियोगिसमानाधिकरणा इत्येवं क्रमेणैव निवेशात् व्यापकतायाः एकदैव लक्षणे प्रवेश इति।

यत्तु—साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशात् न ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ अतिव्याप्तिः इत्थञ्च व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या, अत एव वह्निमान् धूमादित्यादौ घटत्वादिना घटवृत्तित्व[2]विशिष्टद्रव्यत्वत्वादिना वा द्रव्यत्वादेरभावस्य

[1] विशेष्यतासंबन्धेनेत्यर्थः—स्व.

[2] हेतुसामानाधिकरण्यसंपत्तये—स्व.

समवायादिसम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति ;

तन्न, तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेतावतिव्याप्त्यापत्तेः, तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् । यदि च महाकालान्यत्वविशिष्टोऽपि घटो महाकाले वर्तते, अन्यथा सिद्धान्तलक्षणे महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य प्रसिद्धतया उभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजनकतापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते ? तदापि घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य साध्यतावच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चिद्विशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिरेतन्मते दुर्वारैव ; न च तेन सम्बन्धेन भावरूपप्रतियोगिसामानाधिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यम्, तथा सति अभावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याभावस्य [1]भावरूपप्रतियोगिसामानाधिकरण्यासम्भवादव्याप्तेः, अभावपदस्य भावभिन्नाभावपरत्वे कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकाभावमादायाग्रे स्वविशिष्टपदव्यावृत्तिकथनस्य असाङ्गत्यापत्तेः ; एवं साध्यतावच्छेदकसम्बन्धेन व्यापकत्वादिनिवेशे "सर्वत्रे" त्यादिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्य असाङ्गत्यापत्तेश्चेति ।

यत्तु—विशेषणताविशेषेण व्यापकता, तेनैव सम्बन्धेन प्रतियोगिसामानाधिकरण्यं, सर्वत्र साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादायैव लक्ष-

[1] एतत्पूर्वम् " भावरूपप्रतियोग्यप्रसिध्या "—अ.

णसङ्गमनमतिव्याप्तिवारणञ्चेति ; [1]तदपि उक्तातिव्याप्तेः [2]आत्मत्वादिसाध्यकस्थले साध्याभावमादाय हेतुतावच्छेदकसम्बन्धव्यावृत्तिप्रदर्शनविरोधाच्चानुपादेयमेव ।

केचित्तु—प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशान्न प्रागुक्तातिव्याप्तिः, इत्थं च व्यापकतापि तेनैव सम्बन्धेन वाच्या, अतो वह्निमान् धूमादित्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः ; तादृशाभावानां साध्यतावच्छेदकसम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकस्वप्रतियोगिताकत्वाभावेन निरुक्तयावदभावानन्तःपातित्वात् । न चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति वाच्यम्, संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात् तादृशाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वात्, अनुभवानादरे[3] समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्य अवच्छेदकत्वासिद्धेः । अथ बाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन[4] समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वमावश्यकम्, अन्यथा एकैकविधघटाद्यभावज्ञानस्य संयोगसमवायादिरूपनिखिलसंसर्गावगाहिज्ञानप्रतिबन्धकत्वप्रसंगात । न च संयोगादिसम्बन्धावच्छिन्नघटादिप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादिमत्ताविरोधी

[1] अनादेयमेवेत्यनेनान्वयः—स्व.

[2] आत्मत्वसाध्येकेति प्रतीकं न्यायरत्ने—स्व.

[3] "अनुभवानादरे च"—अ.

[4] अनुरोधादिति प्रतीकं न्यायरत्ने—स्व.

योऽभावः तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग इति वाच्यम्, वास्तवतादृशाभावज्ञानत्वादिना प्रतिबन्धकत्वे घटाभावत्वादिना पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानाविरोधित्वप्रसङ्गात्; तस्मात्तत्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनैव प्रतिबन्धकताया वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां सम्बन्धस्यावच्छेदकतासिद्धिरिति चेत्? तर्हि घटत्वादिविशिष्टपटाद्यवगाहिज्ञान[1]घटत्वावच्छिन्नपटाद्यभावज्ञानयोरपि प्रतिबद्धयप्रतिबन्धकभावसत्वात्, तादृशप्रतिबद्धयप्रतिबन्धकभावस्य सम्बन्धविशेषनियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वावश्यकत्वात्। व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्य अप्रतिबन्धकत्वे बाधग्रन्थे [2]लाघवोपनीतकाञ्चनमयत्वादिना वह्न्याद्यनु[3]मितिविरोधितया काञ्चनमयत्वावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वाभासत्वोक्तेरसाङ्गत्यापत्तेरित्यलमप्रस्तुतविचारेणेति वदन्ति;

तदपि न साधीयः;—निखिलाभावस्य किंचिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यसत्वेन व्यभिचारिणि अतिव्याप्तेः। यावत्प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे च निखिलव्यधिकरणधर्मावच्छिन्नाभावानामैक्यमते निखिलसम्बन्धानामेवैकैकतादृशाभावप्रतियोगितावच्छेदकतया क्वचिदपि हेत्वधिकरणे संयोगविषयित्वादिरूपसकलसम्बन्धेन प्रतियोगिनोऽवृत्तेरसम्भवापत्तेः, प्रकारान्तरानुसरणे च गौरवादिति।

[1] "भ्रम"—अ.

[2] लाघवपदं संपातायातमिति—क.

[3] वह्न्यनुमितीति न्यायरत्नम्.

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य ([1]तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वाऽभा[2]वस्य निवेशे) उभयत्वावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरुक्ता, न तु रूपसामान्याभावादिसाध्यके, प्राचीनमते विरुद्धे पृथिवीत्वादिहेतावित्यत्र किं बीजम्? तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपाद्या[3]त्मकाभावस्य स्वध्वंसप्रागभावा[4]दिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेन अतिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य [5]स्वमते लक्ष्यत्वमेवोपपादयति——**रूपादी**ति। यथोक्तलक्षणेऽतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः, तत्र पृथिव्यन्यत्वाद्यभावस्यापि यावदन्तर्गततया तस्य पृथिव्यां पृथिवीभेदरूपप्रतियोगिसामानाधिकरण्यासम्भवेनातिव्याप्त्यनवकाशात्।

यत्तु——उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन न पृथिव्यन्यत्वाभावस्य रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकतेत्यभिसन्धिपूर्विकां प्राचीनप्रवादमात्रेणासद्धेतुत्वाभिमानिनां तट[6]स्थानां यथोक्तलक्षणे अतिव्याप्तिशङ्कां निराकरोति——**रूपादी**ति। **सद्धेतुरेवे**ति। यादृशरीत्या पृथिव्यन्यत्वाभावस्य लक्षणा[7]घटकत्वोपपत्तिः तादृशरीत्या [8]साध्यवति हेतुसत्ताया अप्यावश्यकतया सद्धेतुरेवेत्यर्थ इति व्याख्यातम्; तदनुपादेयमेव, तादृशाशङ्कितुः पृथिव्यां रूपसामान्याभावसत्त्वे अविप्रतिपत्तावे-

[1] एतच्चिह्नान्तर्गतपाठः प्रामादिकः——र.

[2] "साध्याभावस्य"——अ.

[3] रूपात्मकाभावस्येति प्रतीकम्——र.

[4] अभावरूपेति प्रतीकम्——र.

[5] "स्वमताभिप्रायेण लक्ष्यत्वमाह रूपादीति"——अ.

[6] वादिप्रतिवादिभावानापन्नानामित्यर्थः——स्व.

[7] न लक्षणघटकत्वोपपत्तिः——अ.

[8] "हेतुमति साध्यवत्तायाः"——अ.

वातिव्याप्तिशङ्कासम्भवेनाग्रे पृथिव्यां रूपसामान्याभावव्यवस्थापनौपयिका-काङ्क्षानुत्पत्त्या तदसाङ्गत्यापत्तेः ।

प्रलये—महाप्रलये । परमाणूनां नित्यतया तत्रोत्पत्तिकालावच्छेदेन रूपसामान्याभावासम्भव इति भावः । यद्यपि पाकाद्रूपनाशोत्पत्तिकाले पूर्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरानुत्पादेन इदानीमपि परमाणौ रूपसामान्याभावसम्भवः तथापि अविनश्यदवस्थस्य रूपस्य [1]रूपप्रतिबन्धकत्वे पूर्वरूपनाशोत्पत्तिक्षण एव पाकजरूपोत्पत्तिसम्भव इत्यभिप्रायेण प्रलयपर्यन्तानुधावनम् । **उत्पत्तिकाल** इति । अवयविद्रव्यस्य जन्यतया प्रलये असत्त्वात् तदवच्छेदेन तत्रा[2]भावासम्भव इति भावः । **तत्सत्त्वात्**—रूपादिसामान्याभावसत्वात् ।

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्य अत्यन्ताभावात्मकतया रूपप्रागभाववत्युत्पत्तिकालावच्छिन्नावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसम्भवः? ध्वंसप्रागभावयोः अत्यन्ताभावविरोधित्वादित्या[3]शङ्क्य निरस्यति—**न चेति** । **प्रतियोगिव**दिति । यथा प्रतियोगिनः एकका[4]लावच्छिन्नैकदेशावृत्तित्वरूपस्वात्यन्ताभावविरोधिता तथा स्वध्वंसप्रागभावयोरपि स्वात्यन्ताभावविरोधितेति नेत्यर्थः । **मानाभावा**दिति । ननु रूपध्वंसप्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावः, घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ता-

[1] "प्रतिबन्धकत्वेन"—अ.

[2] तदभाव-—अ.

[3] "आशङ्कां निरस्यति"—अ.

[4] कालपदं क्षणपरम् । तेन दिवसात्मकस्थूलकालावच्छिन्नशाखादेः संयोगतदभावावच्छेदकत्वेऽपि न क्षतिः । देशपदम् अवच्छेदकदेशान्तरानवच्छिन्नदेशपरम्; अतो विभिन्नभागावच्छिन्नस्थूलावयवस्य प्रतियोगितदभावोभयावच्छेदकत्वेऽपि न क्षतिः—स्व.

भावप्रत्यक्षस्य सुतरामसम्भवात्; द्वितीयादिक्षणावच्छेदेन रूपस्यैव तत्रोत्पत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृशप्रत्यक्षासम्भवात् अनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमुद्भाव्य निरसितुमशक्यत्वाच्च। अनुमानञ्चाप्रयोजकमिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम् अर्थादायातमित्यत आह—**अत एवेति**। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वा[1]भावादेव। **अन्तरा श्यामे**—पूर्वापरदशायां रक्ते मध्यदशायां श्याम इत्यर्थः। **रक्तं रूपं नास्तीति प्रत्यय** इति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्वरक्तध्वंसभाविरक्तप्रागभावयोः सत्वेन अत्यन्ताभावावगाहिन्याः प्रमात्मकतादृशप्रतीतेः अनुपपत्तिरिति भावः। **एषः**—रक्तं रूपं नास्तीति प्रत्ययः। **ध्वंसादी**त्यादिना प्रागभावपरिग्रहः। **पूर्वापरेति**। यत्र घटादौ पाकादेकरक्तरूपनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरं च रक्तान्तरं ततः तन्नाशान्तरोत्पन्नरूपान्तरनाशानन्तरं रक्तान्तरम् उत्पद्यते तत्र मध्यरक्तदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः, तत्रापि रक्तरूपध्वंसप्रागभावयोः सत्वादिति भावः। एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत् तादृशध्वंसप्रागभावावेव तादृशप्रतीतिविषयौ; अन्तरा [2]रक्तसमानकालीनौ पूर्वापररक्तध्वंसप्रागभावौ च न तथाविधौ इति नातिप्रसङ्ग इति निरस्तम्[3]। तादृशध्वंसप्रागभावयोरेव रूपान्तरदशायां तादृशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्य आवश्यकत्वात्; तत्र मध्यरक्तध्वंसप्रागभावयोः तथात्वस्वीकारे तु पूर्वापररक्तदशायां तादृशप्रत्ययापत्तेः।

अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंसादिरेव तादृशप्रतीतिविषयः, इत्थं च रक्तरूपदशायां लौकिकप्रत्यक्षात्मकः तादृशप्रत्ययः आपा-

[1] अविरोधित्वादेव—अ.

[2] रक्तरूप—अ.

[3] परास्तम्—अ.

द्यते ? अनुमित्यात्मको वा, आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वाच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षं प्रति प्रतिबन्धकत्वान्नापत्तिः, अन्यथा भवन्मतेऽपि रूपान्तरकालावच्छेदेन तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं धर्म्यन्तरघटितसन्निकर्षात् तद्वृत्तितया प्रत्यक्षापत्तेः, विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्याहेतुत्वात्। रक्तरूपग्रहप्रतिबन्धकदोषादिसत्वे च तादृशप्रत्यक्षस्येष्टत्वात्। नान्त्यः; तद्रूपावच्छिन्नव्याप्यवत्ताज्ञानादिसत्वे आनुमानिकतथाविधप्रत्ययस्येष्टत्वात्। न च तादृशप्रत्ययस्य प्रमात्वापत्तिः, भवन्मतेऽपि तथाविधात्यन्ताभावस्य तत्र सत्वात् तादृशप्रत्ययस्य प्रमात्वेनेष्टापत्तेः, यदा च तत्र रक्तरूपं तत्कालावगाहिनः इदानीमत्र रक्तरूपं नास्तीति प्रत्ययस्य प्रमात्वं पुनः अशक्यापादनम्, तादृशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात्, यदा च न तत्र रक्तरूपं तत्कालावच्छेदेनैव च ध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात्। तद्धर्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनः इष्टमेव। न च तद्धर्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वाच्छिन्नप्रतियोगिताकत्वं कल्प्यते; किं वा तत्कालावच्छेदेन तत्र धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यते इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धेः[1] निष्प्रत्यूहतैवेति वाच्यम्, ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाकल्पने ध्वंसादेः अतिरिक्तात्यन्ताभावाकल्पनेन लाघवात्, रक्तरूपात्यन्ताभावस्यैतन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात्;

मैवम्; तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्य अव्याप्यवृत्तित्वोपगमे विशेषाभावानामेव अधिकरणविशेषावच्छेदेन सामान्यधर्मावच्छिन्नप्रति-

[1] सिद्धिः निष्प्रत्यूहैवेति—अ.

योगिताकत्वसम्भवात् अतिरिक्तसामान्याभावासिद्धिप्रसङ्गः, एवमेकस्यैवाभावस्य अधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेन घटत्वपटत्वादिरूपनिखिलधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवेन अभावभेदविलोपप्रसङ्गः, एवं रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वोपगमे तत्स[1]मानाधिकरणतत्समनियतध्वंसान्तरस्य तत्समानाधिकरणैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पनमादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंसप्रागभावाधिकरणे अत्यन्ताभावकल्पनमेव न्याय्यम् ।

अथ एतादृशयुक्त्या रक्तध्वंसादिमति तदत्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्नाभावः निर्युक्तिक एवेति चेन्न, रूपोत्प[2]त्तेर्द्वितीयक्षणे पुनः तदधिकरणे सामान्यसामग्रीबलात् रूपान्तरोत्पत्तिवारणाय रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम्, एवं च उत्पत्तिकाले पाकात् रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तदुत्तरं रूपानुत्पादप्रसङ्गः, रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पादश्च प्रागभावहेतुतया दुर्वारः; रूपवत्यपि पाकजभाविरूपप्रागभावसत्वात् । न चैवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिकः, यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्कालावच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैव उपपत्तेरिति वाच्यम्; दत्तोत्तरत्वात् ।

इदं त्ववधेयम्; उक्तयुक्त्या उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि प्रलयकालावच्छेदेन परमाणौ तत्सत्वे मानाभावः, एवं रूपं प्रति रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते, स्पर्शोत्पत्त्यनुरोधेन अवश्यकल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरापत्तेः

[1] समानाधिकरणेति व्यर्थमिति आशंक्य परीहारः वर्णितः—र.

[2] पत्तिद्वितीयक्षणे—अ.

शक्यवारणत्वात् । वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय स्पर्शं प्रति रूपाभावहेतुतायाः वक्तुमशक्यत्वात्, स्पर्शाभावहेतुताया आवश्यकत्वात् । न च रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकात् रूपसत्वे स्पर्शनाशः तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्, एकजातीयस्यैव अग्निसंयोगस्य रूपरसगन्धस्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्य आवश्यकत्वादिति । एवं ध्वंसप्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदधिकरणे[1] कल्प्यते, अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवात् एकैकेषु [2]तद्धर्मावच्छिन्नवद्भेदेषु [3]तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनेनैवोपपत्तेरिति ध्येयम् ।

तत्सामानाधिकरण्यम्—प्रतियोगिसामानाधिकरण्यम् । **स्वविशिष्टे**ति । **स्वम्**—यत्राभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यम् स एव ।

हेत्वधिकरणावच्छेदेनेति । हेतुतावच्छेदकसम्बन्धेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तत्[4]सामान्यान्तर्भावेनेत्यर्थः । तेन वह्न्याद्यभावस्य धूमावयवाद्यवच्छेदेन द्रव्यं विशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य गुणाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः । पर्वतादेः कालोपाधित्वानभ्युपगमे धूमवत्त्वप्रकारकप्रमाविषयत्वा[5]द्यभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्यतया धूमवान् वह्नेरित्यादौ अतिव्याप्त्य[6]प्रसक्तेः दर्शितविवक्षायाः स्थलान्तरे प्रयोजनमाह—**तेन गोत्वे**ति । **तद्वति**—गवादिमति ।

[1] "तदधिकरणेषु" अ.; "तत्तद्द्रप्रागभावविशेषध्वंसविशेषाधिकरणेषु"—रा.

[2] "तत्तद्रूपप्रागभावादिमद्भेदेषु" रा.

[3] "तत्तद्रूपत्वावच्छिन्नप्रतियोगिताकसामयिकात्यन्ताभाववत्वम्"—रा.

[4] हेत्वधिकरणसामान्येति प्रतीकम्—र; तत्सामान्येति—कृ.

[5] विषयत्वाभावस्येति प्रतीकम्—आदिपदघटितपाठानुसारेणार्थवर्णनं च—र.

[6] विशेषरूपेण संसर्गत्वोपगमात् कालादौ धूमवत्त्वप्रकारकप्रमाविषयत्वरूपप्रतियोगिसामानाधिकरण्यविरहादिति भावः—रा.

कालिकसम्बन्धेन गोत्वादिना गवादौ साध्ये प्रलयान्तर्भावेन व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकानां गोत्वाद्यवच्छिन्नाभावानां गवादिमति एतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले च प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमक्षतमेव। एवं दैशिकविशेषणताविशेषेण गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन सम्बन्धेन प्रलयान्यत्वादिमति महाकाले कालिकसम्बन्धेन वर्तमानतया प्रतियोगिसमानाधिकरण एव, प्रतियोगिसामानाधिकरण्यघटकीभूताभाववृत्तौ सम्बन्धविशेषानिवेशात् इति अतिव्याप्तिस्स्यात्, निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रलयान्तर्भावेन तादृशाभावानां न प्रतियोगिसामानाधिकरण्यं, प्रलये तत्प्रतियोगिनो अवृत्तेरिति समुदायार्थः । गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरमध्वंसादिः तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधिकरण्यम्, तत्र तस्यावृत्तेरित्यतो **महाकाले** **वे**त्युक्त[1]म् । महाकाले च कालिकसम्बन्धेन वृत्तेः तथात्वमक्षतमेव ।

गोसाध्यकस्थले साध्यव्यापकतावच्छेदकजन्यद्रव्यत्वप्रलयावृत्तित्वाद्यवच्छिन्नाभावमादायातिव्याप्तिवारणं न सम्भवतीति स्फुटीकरणाय तत्तद्रूपावच्छिन्नसाध्यकस्थलेऽपि अतिव्याप्तिमाह—**यदा कालत्वमि**त्यादिना । अथ एतादृशविवक्षापेक्षया लाघवात् प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौ दैशिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वमेव निवेश्यताम्, तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रलयान्यत्वादेरभावस्य प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्युद्धारस्य शक्यत्वात् । न चैवं वह्निमान् धूमादित्यादौ कालिकविशेषणताविशेषसम्बन्धेन हेत्वधिकरणवृत्तेः द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावादव्याप्तिरिति वाच्यम्,

[1] महाकाले चेत्युक्तमिति प्रतीकम्—र.

हेतुसामानाधिकरण्यशरीरेऽपि अभावीयवृत्तौ दैशिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात् तावतापि लाघवानपायात्। न च दैशिकविशेषणताविशेषेण प्रतियोगिसामानाधिकरण्यविवक्षणेऽपि उक्तस्थलेष्वतिव्याप्तिः तदवस्थैव, प्रलयान्यत्वाभावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधिकरणस्वरूपत्वात् तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणपरमाण्वादौ दैशिकविशेषणतया वृत्तेरिति वाच्यम्, एवमपि प्रलयान्य[1]कालत्वप्रकारकप्रमाविशेष्यत्वादेरभावस्य प्रलयातिरिक्तगगनादावपि वर्तमानस्य प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरूपपादतया अतिव्याप्त्यनवकाशात्।

मैवम्, दैशिकविशेषणतया प्रतियोगिसामानाधिकरण्यनिवेशेऽपि दैशिकविशेषणतासम्बन्धेन प्रलयावृत्तिसाध्यके कालत्वादिहेतौ अतिव्याप्तिर्दुर्वारैव, तत्र प्रलयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसम्बन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावीयप्रतियोगिता, व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलयात्मकत्वात् निरुक्तरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतर[2]सम्बन्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयान्यवृत्तितया सुतरामेव प्रतियोगिसमानाधिकरणत्वमिति निरुक्तविवक्षणमावश्यकम्, एतदभिप्रेत्यैव प्रलयावृत्तिसाध्यकानुधावनं ग्रन्थकृत इति।

वस्तुतस्तु प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि दर्शितस्थलेषु उक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यम्, प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपसम्बन्धेन प्रलयात्मकनानाध्वंसान्तर्गत-

[1] प्रलयान्यकालत्वादेरभावस्य—अ; एतादृशपाठः कृष्णम्भट्टीये दर्शितः—कालत्वविशिष्टप्रलयान्यत्वादेरभावस्येत्यर्थः—कृ.

[2] इतरसंबन्धः—व्यधिकाणः—स्व.

यत्किञ्चिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनोऽधिकरणे ध्वंसान्तरे स्वस्य प्रतियोगिसमानाधिकरणत्वात्, यत्किञ्चिद्ध्वंसान्यत्वाभावस्य यत्किञ्चिद्ध्वंसमात्रवृत्तेः तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे असत्वेऽपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव तत्प्रतियोगिसमानाधिकरणत्वात्, प्रलयान्यविषयकत्वोपलक्षितप्रमाया विषयतासम्बन्धेन केवलान्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः ; प्रलयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलये तदन्यविषयकनित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात्, प्रलयाविषयक[1]प्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तित्वेन प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेः तादृशाभावमादायातिव्याप्तिवारणासम्भवात् ; [2]उक्तविवक्षणे तु प्रलये [3]प्रलयाविषयकप्रमाभावस्य विषयतया प्रतियोगिसमानाधिकरणत्वविरहात् अतिव्याप्तिवारण[4]सम्भवः, एवमुक्तरीत्या घटत्वाभाववान् मेयत्वादित्यादावपि व्यावृत्तिर्बोध्या ।

हेतुमति प्रलय इति । हेतुमत्सामान्यान्तर्गतप्रलयान्तर्भावेनेत्यर्थः । **तत्सामानाधिकरण्याभावात्**—गवादिरूपप्रतियोगिसामानाधिकरण्याभावात् । अत्र गवादेरभावस्येत्यनुषज्यते । हेतुमति स्ववैशिष्ट्यनिवेशनफलमाह—**स्वविशिष्टेती**ति । साम्प्रदायिकैः द्रव्ये संयोगसामान्याभावानभ्यु-

[1] जन्यप्रमाभावस्य—अ.

[2] एतत्पूर्वं "प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतियोगिभेदेन भिन्नतया प्रलयान्यभेदप्रतियोगितायाः न तादात्म्येन साध्यव्यापकतायामवच्छेदकत्वमिति तादृशभेदस्याधिकरणे प्रलयान्यत्वरूपप्रतियोगिनस्तेन संबन्धेनासत्वेऽपि नातिव्याप्त्युद्धारः" अधिकपाठः—अ.

[3] "प्रलयाविषयकप्रलयान्यत्वप्रकारकयावत्प्रलयान्यविशेष्यकप्रमाभावस्य विशेष्यतया प्रतियोगिसामानाधिकरण्यविरहात् अतिव्याप्तिवारणसंभवः"—अ.

[4] इदं तु बोध्यमित्यादिना दूषितम्—कृ.

पगमात् सद्धेतुत्वार्थं कपिसंयोगाभावपर्यन्तानुधावनम्। **सकलहेत्वधिकरणावृत्तित्वेऽपीति**। नित्यगुणादौ केनापि सम्बन्धेन कपिसंयोगासत्वादिति भावः। एतेन हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितम्। **नाव्याप्तिरिति**। नित्य[1]गुणादेः स्वविशिष्टत्वाभावात् तदन्तर्भावेन अतथात्वेऽपि स्वविशिष्टहेत्वधिकरणान्तर्भावेन तथात्वस्य अक्षनत्वात्[2]। अत्र व्यापकताघटकाभावे उक्तयुक्त्या प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया साध्यवद्यत्किंचिद्व्यक्त्यसम्बद्धस्वविशिष्टसामान्यकभिन्नत्वरूपव्यापकतावच्छेदकत्वस्य निवेशनीयतया वा कपिसंयोगाभावादिनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकतानिर्वाहः इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादाय अव्याप्तिराशङ्किता, अन्यथा पुनः सत्तावान् जातेरित्यादौ काले कालिकसम्बन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नाभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्ताऽव्याप्तेर्वारणाय स्वविशिष्टेतिविशेषणमावश्यकमिति; आदिपदग्राह्यमपि तादृशस्थलमेवेत्यपि बोध्यम्।

अत्र तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रत्येकं यद्धेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेन यत्र कुत्रचित्[3] तत्तत्प्रतियोगिसामानाधिकरण्यकाः[4], साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः यद्रूपविशिष्टाधि-

[1] अपार्थिवपरमाणुगतरूपरसस्पर्शसांसिद्धिकद्रवत्वस्नेहगुरुत्वस्थितिस्थापकनित्यद्रव्यगतैकत्वप्रथक्त्वपरिमाणेश्वरबुद्धीच्छाप्रयत्नाः नित्यगुणाः—स्व.

[2] "अक्षतत्वादिति भावः"—अ.

[3] "कुत्रचित् पदार्थे"—अ; यत्र कुत्रचित् इति नास्ति(मै)यत्र कुत्रचिदिति शेषः इति—कृ.

[4] सामानाधिकरण्यम्—अ.

करणत्वव्यापकतावच्छेदकप्रतियोगिताकः तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितं च[1] व्यधिकरणधर्मावच्छिन्नाभावघटितं लघुलक्षणं सम्भवतीति बोध्यम् ।

ननु धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमाभावादेरपि अयोगोलकादौ गोत्वाभावरूपप्रतियोगिसमानाधिकरणत्वात् ; [2]गोत्वाद्यभावस्य तत्प्रतियोगित्वं च धूमाभावे जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीति प्रतीतिनियामकाभावस्य अभावाधिकरणकाभावप्रतियोगिकाभावतया अधिकरणीभूतधूमाभावस्वरूपत्वात् [3]जलवृत्तित्वविशिष्टगोत्वाभावस्य शुद्धविशेष्यानतिरिक्तत्वादित्याशंक्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तक्लृप्ताभावस्वरूपतां प्रदर्शयन् तत्स्वरूपतां प्रतिक्षिपति— **जलेत्यादिना** । न च धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् कथम् अतिव्याप्तिशंकेति वाच्यम्, जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यापि उक्तयुक्त्या धूमाभावस्वरूपतासंभवात् संयोगसंबन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्वात् । न चैवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि, तस्यैव प्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्ट्याक्रान्तत्वात्, तस्य च धूमाभावविशिष्टसकलवह्निमति वृत्तौ मानाभावात् नातिव्याप्तिप्रसक्तिः[4] ; यदि च जलवृत्तित्ववैशिष्ट्यमन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभावत्वावच्छिन्न एव विशेषणम्, न तु अन्यतरत्वावच्छिन्ने विशेषणतया प्रतियोगितावच्छेदकमिति जलावृत्तिद्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते, तदा तादृशाभावस्य विशिष्टा-

[1] घटितं च—अ.

[2] गोत्वाभावस्य—अ.

[3] जलवृत्तित्वविशिष्टस्यापि गोत्वाभावस्य—अ.

[4] प्रसज्यते—अ.

भावानात्मकतया अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणधूमाभावाद्यधिकरणकत्वानुपपत्तिरिति वाच्यम्, जलवृत्तिद्रव्यं धूमाभावविशिष्टयादृशहेत्वधिकरणे नियमतो वर्तते, तादृशे[1]व्यभिचारिहेतुकस्थल एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादायातिव्याप्तिमाशंक्य [2]**जलादिवृत्तित्वे**त्यादिग्रन्थस्यावतरणीयत्वात्[3]। न चैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचित इति **विशिष्टगोत्वाद्यभावस्याभाव** इति ग्रन्थासंगतिर्दुर्वारैवेति वाच्यम्, [4]तादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात्। न चैवमपि अयोगोलकभेदा[5]भावस्यायोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपताविरहात् तस्य प्रतियोगिसामानाधिकरण्यं न घटत इति अतिव्याप्त्यप्रसक्तिः, साध्यतावच्छेदकसंबन्धेन व्यापकताया लक्षणघटकत्वं प्रागेव दूषितम्; अतो नायोगोलकभेदा[6]भावस्य लक्षणघटकत्वासंभव इति वाच्यम्, अयोगोलकभेदाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवात्[7]। न चैवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगि-

[1] प्रसिद्धहेतुकस्थलेऽतिव्याप्तिः अस्ति इति—क.

[2] "जलवृत्तीत्यादिग्रन्थस्य"—अ.

[3] जलवृत्तित्वं संयोगविशेषणतान्यतरसंबन्धेन, तद्विशिष्टान्यतरत्वावच्छिन्नद्रव्ये प्रतियोगितानिर्वाहाय संयोगान्तर्भावस्यावश्यकत्वात् विशिष्टगोत्वाभावस्याभाव इति ग्रन्थस्यापि विशिष्टगोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टत्वावच्छिन्नप्रतियोगिताकाभावपरता बोध्या। अधिकपाठः—अ.

[4] एतादृश—अ, क.

[5] भेदाद्यभावस्य—अ, क.

[6] भेदाद्यभावस्य—अ; अन्यत्वाद्यभावस्य—क.

[7] अयोगोलकभिन्नभेदरूपायोगोलकत्वनिरूपितायोगोलकभिन्ननिष्ठप्रतियोगितायाः तादात्म्यसंबन्धेन साध्यव्यापकतायामवच्छेदकत्वं प्रतियोगितायाः प्रतियोगिस्वरूपतामते न

कत्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्वाद - तिव्याप्तितादवस्थ्यमिति वाच्यम्, तादृशप्रतियोगिनः स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् "घटत्वाभाववान् मेयत्वादित्यादा"वपि घटत्वाभावादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसंबन्धान्तर्गतविशेष्यतासंबन्धेन प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात्। न चैवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य [2]धूमभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्यसंभवेऽपि [3]धूमादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसंबन्धान्तर्गतविशेष्यतासंबन्धेन प्रतियोगिसामानाधिकरण्याभावात् "धूमवान् वह्ने"रित्यादौ अतिव्याप्त्यप्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपो न युक्त इति वाच्यम्; तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या [4]धूमादिप्रकारकप्रमाभावनिष्ठस्य[5] जलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयैव समं विशेष्यतासंबन्धेन तादृशाभावस्य सामानाधिकरण्यसत्वादतिव्याप्तिप्रसक्तेरिति।

इति प्रथमस्वलक्षणम्।

संभवतीति अयोगोलकभिन्नात्मकतत्प्रतियोगिनः तादात्म्येन अयोगोलकेऽसत्वेऽपि नातिव्याप्त्युद्धारः एवं च धूमसामान्यसाध्यकस्थले धूमसामान्याभावीयप्रतियोगिताया धूमसामान्यव्यापकतावच्छेदकत्वासंभवेऽपि तत्तत्धूमव्यक्तिसाध्यकस्थले तादृशाभावस्य लक्षणघटकतया तदभिप्रायेण तस्य गोत्वाभावप्रतियोगिकत्वनिराकरणं तत्तत्धूमव्यक्तेरपि अनेकाधिकरणवृत्तितया नायोगोलकभिन्नस्य कस्यापि तादात्म्येन तत्र साध्यव्यापकत्वमिति। अधिकपाठः—अ; कृष्णंभट्टीयपर्यालोचनायामेतादृशपाठः गादाधर्यां नास्तीति गम्यते—स्व.

[1] जन्यप्रमायाः अभावस्य—अ; "जन्यप्रमाभावस्य"—क.

[2] "धूमाद्यभावस्वरूपतया"—अ.

[3] "धूमवत्त्वादिप्रकारकप्रमाभावस्य"—अ.

[4] "धूमवत्त्वादिप्रकारकप्रमाभावनिष्ठस्य"—अ.

[5] "विषयताविशेषणताविशेषान्यतरसंबन्धेन" अधिकः—अ.

नन्वेवमपि "धूमवान् वह्ने"रित्यादावतिव्याप्तिर्दुर्वारैव, उक्ताभावस्य जलत्वाद्यभावस्वरूपत्वे तु तुल्ययुक्त्या धूमवद्वृत्तित्वविशिष्टताद्दशाभावस्य धूमाभावस्वरूपत्वेन द्रव्यसामान्यस्य तत्प्रतियोगित्वानपायात्[1]। एवं धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन तत्तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात्। यदि च धूमत्वादिना प्रमेयं नास्तीत्यादिप्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहः; न प्रमेयान्तरस्य, अथवा प्रतियोगिसामानाधिकरण्यशरीरे [2]न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता निवेशनीया, [3]एवं च ताद्दशप्रतियोगिताको हेतुसमानाधिकरणाभावो [4]ग्राह्यः, यावत्प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वावच्छिन्नैव, ताद्दशधर्मानवच्छिन्ना च धूमादिमात्रवृत्तिधूमाभावीयप्रतियोगितैव, तदाश्रयसामानाधिकरण्यं च नायोगोलकाद्यन्तर्भावेनेति मन्यते, तदा[5]पि धूमाभावस्य वह्निधूमोभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभाव[6]प्रतियोगितया, अयोगोलकान्यत्वाभावस्य अयोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेन आकाशाभावस्यापि तत्प्रतियोगितया, धूमवत्त्वप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया

[1] "इदं विचारासहम्"—रा.

[2] स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकमित्यर्थः—रा.

[3] घटत्वेन प्रमेयसामान्याभावमादायाव्याप्तिवारणायाह—एवं चेति—रा.

[4] अन्यथा "वह्निमान् धूमादि"त्यादौ यावदन्तर्गतस्य घटत्वादिना प्रमेयसामान्याभावस्य स्वन्यूनवृत्तिधर्मानवच्छिन्नघटादिमात्रवृत्तिप्रतियोगितैवेति तदाश्रयसामानाधिकरण्यं न हेत्वधिकरणावच्छेदेनेति असंभवापत्तेरितिभावः—रा.

[5] तथापीति प्रतीकम्—कृ.

[6] यदि च धूमत्वादेरपि उभयाभावप्रतियोगितावच्छेदकतया न तत्प्रतियोगिताया अपि स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं तदा धूमवद्वृत्तित्वविशिष्टद्रव्यसामान्याभावस्य धूमाभावसमनियततया अतिव्याप्तेरावश्यकत्वं बोध्यम्—रा.

द्रव्यत्वादिप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन, धूमभेदस्य धूमत्वसदुभयत्वावच्छिन्नाभावसमनियतत्वेन सन्मात्रस्यैव तत्प्रतियोगितया, हेतुसमानाधिकरणतादृशाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिभिः सामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिः ।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तत्तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्[1]तर्भावेन तत्तप्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्—तर्हि तादृशी या या प्रतियोगिता तदाश्रयसामानाधिकरण्यं यत्र क्वचित् यावद्यदधिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्येऽभावे यावत्त्वस्य तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यस्य विशेषणस्य हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसंगः ; [2]एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नप्रतियोगिताकं साध्याभावमादाय लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षतिविरहेण एतादृशव्याप्तिलक्षणशंकायां प्रतियोग्यवृत्तिश्चेत्यादिना तादृशाभावखण्डनस्यासाङ्गत्यापत्ति ; अतो लक्षणान्तरमाहः—“**यत्समानाधिकरणाना**मिति । अत्रापि यत्तत्पदयोः पूर्ववत् यत्तद्धर्मावच्छिन्नपरता बोध्या । “वह्निमान् धूमादि”त्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव, तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः । अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण “धूमवान् वह्ने”रित्यादावतिव्याप्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः ; तथा च धूमाद्यभावानां वह्निधूमोभयत्वावच्छिन्नप्रतियोगिता-

1 “अवच्छेदेन—अ.

2 “एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नाभावमि”ति प्रतीकधारणम्—र.

श्रयवह्न्यादिसामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः । [[1]एवं तादृशाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावस्वरूपत्वेऽपि तादृशाभावप्रतियोगितावच्छेदकधूमवद्वृत्तित्वविशिष्टत्वावच्छिन्नेन समं तादृशाभावस्य स्वविशिष्टहेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः], द्रव्यत्वेन धूमो नास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते, अपि तु धूमत्वादेरेव, द्रव्यत्वादेस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासते इत्युपेयते, अतः तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽपि अतिव्याप्तेर्दुर्वारता इत्याशंकाया नावकाशः[2] ।

एतेन धूमकालावच्छिन्न[3]धूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावः तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तम्; वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्ट्यस्यैव प्रतियोगितावच्छेदकत्वावगाहनोपगमात्; अन्यथा धूमवद्वृत्तित्वविशिष्टवह्निमति धूमशून्ये वह्नित्वरूप[4]प्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसंगात्, अस्तु वा तत्र तादृशवैशिष्ट्यसहितस्यैव वह्नित्वस्य तथात्वम्; तावतापि न

[1] क्वाचित्कोऽयं पाठः इति—अ.

[2] अनवकाशः—अ.

[3] "इदं च धूमशून्यवह्निकाले धूमाभावसत्वात् समनैयत्यरक्षायै"—रा; धूमकालीनेति प्रतिकम्—कृ.

[4] तादृशप्रतियोगिता—अ.

क्षतिः प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणार्थकत्वात् ।

अथैवमपि घटभिन्नत्वेन धूमघटान्यतरन्नास्तीत्यत्र घटधूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानम्, धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः; नापि घटभिन्नत्वसहितस्य तस्य, गौरवात्; किन्तु घटभिन्नत्वमात्रस्यैव, एवं च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम्; एवं भेदत्वेन अयोगोलकभेदघटात्यन्ताभावान्यतराभावस्य अयोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमपि[1] अयोगोलकभेदाभावप्रतियोगितावच्छेदकम्, एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्वधूमत्वान्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वमपि[2] धूमभेदप्रतियोगितावच्छेदकम्, तादृशधर्मावच्छिन्नानाञ्च अयोगोलकादावपि सत्वादतिव्याप्तिस्तदवस्थैवेति चेत् तर्हि प्रतियोगितावच्छेदकेत्यनेन प्रतियोगिताया न्यूनवृत्तिभिन्नं सत् यदवच्छेदकं तदेव विवक्षणीयम्, न्यूनवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वम्, तद्भिन्नत्वं च व्यधिकरणधर्मसाधारणम्; घटधूमान्यतरादिनिष्ठप्रतियोगिताया न्यूनवृत्त्येव घटभिन्नत्वादिकम्, [3]न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन वह्नित्वावच्छिन्नप्रतियोगिता[4] या प्रतीयते, वह्निर्नास्तीत्यत्रापि वह्निवृत्तितया सैव प्रतीयत इत्युपेयते, एकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात्, तथा च कालिकसंबन्धेन हेतुसमानाधिकरणवह्नित्वावच्छिन्नवह्न्याद्यभावप्रतियोगिताया न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्ध्या

[1] अयोगोलकेऽपि तादृशप्रतीतेः सत्वात् अन्यतरत्वं न तत्प्रतियोगितावच्छेदकम् ''—रा.

[2] '' घटादौ तादृशप्रतीतिसत्वात् नान्यतरत्वं तथा ''—रा.

[3] न चेत्यस्य वाच्यमित्यनेन अन्वयः—स्व.

[4] '' वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगिता ''—अ.

[1]अव्याप्तिरिति[2] वाच्यम्, [3]वह्नित्वेन प्रमेयं नास्तीति प्रतीतौ प्रमेयत्वविशेषितस्य [4]वह्नेरेव प्रतियोगिता भासते नान्यस्येत्यभ्युपगमात् तादृशाभावप्रतियोगितायां प्रमेयसामान्यवृत्तित्वस्यैवा[5]सिद्धेः ।

अथवा प्रतियोगितावच्छेदकपदं प्रतियोगिताया अनतिरिक्तवृत्ति सत् यदवच्छेदकं तत्परम्, अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कान्यत्वतत्सामानाधिकरण्योभयाभाववत्त्वम्, तथात्वं च व्यधिकरणधर्मसाधारणमपि, घटधूमान्यतरादिनिष्ठप्रतियोगितायाश्च अतिरिक्तवृत्त्येव घटभिन्नत्वादिकम्, तादृशप्रतियोगिताया यावद्घटभिन्नादिसाधारण्याप्रसक्तेः । वह्नित्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वेऽपि तदनतिरिक्तवृत्त्यवच्छेदकं वह्नित्वादिकमेव, स्वव्यापकतत्कान्यत्वस्यावृत्तौ प्रसिद्धत्वादिति नानुपपत्ति-

[1] यदि हेतुसमानाधिकरणोऽपि तादृशधर्मावच्छिन्नप्रतियोगिताक एव ग्राह्यः, व्यधिकरणधर्मावच्छिन्नाभावमादाय सद्धेतौ लक्षणसमन्वयः, तदा धूमवान् वह्नेरित्यादौ धूमत्वाद्यवच्छिन्नधूमाद्यभावानामुक्तलक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वेन घटाभावसमनियततया तत्प्रतियोगितावच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यादतिव्याप्तिर्बोध्या—रा.

[2] अनन्तरं—एवं घटभिन्नत्वेन महानसीयवह्निघटान्यतराभावादेः धूमादिहेतुसमानाधिकरणस्य महानसीयवह्नित्वावच्छिन्नतदभावसमनियतत्वेन तदभिन्नत्वस्य महानसीयवह्नित्वावच्छिन्नमहानसीयवह्निमात्रवृत्तिप्रतियोगितायाः न्यूनवृत्तिभिन्नमवच्छेदकं महानसीयवह्नित्वादिकं तदवच्छिन्नेन तादृशाभावस्य हेतुमति पर्वतादौ सामानाधिकरण्यासत्वात् अव्याप्तिः । यदि च विशिष्टसाध्यव्यापकतावच्चेदकस्वन्यूनवृत्तिभिन्नरूपावच्छिन्ना यदीयप्रतियोगिता तादृशभाव एव निवेश्यते ; तथा सति उक्ताभावानां लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभावमादायैव सद्धेतौ लक्षणसमन्वय इत्युच्यते तदा धूमवान् वह्नेरित्यादौ अपि धूमत्वावच्छिन्नधूमाभावस्य उक्तरीत्या लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः । इति । सांकपृष्ठे दशमपंक्तौ अधिकपाठः—अ.

[3] "धूमत्ववह्नित्वादिना"—रा.

[4] "धूमवह्न्यादेः"—रा.

[5] "अप्रसिद्धेः"—अ.

गन्धोऽपीति। [[1]प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नाया[2] यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं[3] विवक्षितम् न्यूनवृत्तित्वं च सामानाधिकरण्यघटितमिति व्यधिकरणधर्मपरिग्रहः]। तत्प्रतियोगितासमानाधिकरणं सत् तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं यत् तदन्यप्रतियोगितावच्छेदकं वा निवेश्यम्[4]। एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाभावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वाधिकरणावच्छेदेन [5]वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसम्भवेऽपि वह्निघटोभयत्वावच्छिन्नाभावस्यापि तथाविधतया तस्य[6] प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेना[7]संभव इत्यतो व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तम्; अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना[8]भावस्याप्रसिद्ध्या असंभवः, "अयमात्मा ज्ञानादि"त्यादौ केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थसंगतिः। न चा "यमात्मा ज्ञानादि"-

[1] [ ] क्वाचित्कः पाठः इति—अ; स्वन्यूनेति प्रतीकम्—क.
न्यायरत्ने "स्वन्यूनवृत्तिभिन्नायाः प्रतियोगितायाः" इति प्रतीकधारणम्—तस्मात् सार्वत्रिकत्वम्—स्व.

[2] "स्वन्यूनवृत्तिभिन्नम् (इति)—अ, क.

[3] अनन्तरम् "वा"कारः—क.

[4] अनन्तरं घटभिन्नत्वादिना महानसीयवह्निघटान्यतराभावमादाय उक्ताव्याप्तिवारणाय उक्तप्रतियोगितावच्छेदकविशेषणं व्यापकतावच्छेदकरूपेऽपि निवेश्यम् अतो न तादृशाभावानां लक्षणघटकतेति। अधिकपाठः—अ.

[5] वह्न्यादिरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसंभवेऽपि—अ.

[6] तस्य च—अ.

[7] असंभवेन—अ.

[8] प्रतियोगिताकाभावस्य—अ.

त्यादौ पूर्वक्षणवृत्तित्वविशिष्टात्मत्ववत्त्वादेरात्मत्वादिव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य उत्तरक्षणावच्छेदेन हेतुसमानाधिकरणतया "इदं वाच्यं ज्ञेयत्वादि"त्यादावपि [1]एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्ववत्त्वादेः विषयतासंबन्धेन जन्यज्ञानत्वविश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादेः साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य एतत्क्षणावच्छेदेन प्रलयावच्छेदेन च हेतुसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति वाच्यम्, प्रतियोगिवैयधिकरण्याघटितव्यापकताया [2]एव निवेशनीयतया निरुक्तधर्मावच्छिन्नाभावानामपि साध्यवति सत्वेन तादृशधर्माणां व्यापकतावच्छेदकत्वासंभवात्। न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किम् न निवेश्यते? प्रमेयसाध्यकस्थले संयोगसमवायादिरूपव्यधिकरणसंबन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयसंभवादिति वाच्यम्, तथा सति लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगिता[3]नवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः॥

अत्र[4] च "ज्ञानवान् आत्ममहाकालान्यतरत्वादि" त्यादावतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेन [5]व्यापकत्वं तेनैव संबन्धेन [6]प्रतियोगिसामानाधिकरण्यं विवक्षणीयम्, महाकालान्यत्वविशिष्टघटादिसाध्यकस्थले

[1] "एतत्क्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्ववत्त्वादेः"—अ; एतादृशपाठः कृष्णंभट्टीयेऽपि दर्शितः—स्व.

[2] "एव" शब्दो नास्ति—अ.

[3] "अनवच्छेदकत्वे"—अ.

[4] अत्र च भवानन्दमतमुपन्यस्य दूषयति—रा.

[5] वह्निमान् धूमादित्यादौ द्रव्यत्वाभावमादायाव्याप्तिवारणाय व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेश इत्याद्यूह्यम्।—रा.

[6] "प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम्"—अ.

कालत्वादेः व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्यत्वविशिष्ट-घटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावेनातिव्याप्त्यसंभवात्[1]। तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले तादृशसंबन्धेन साध्यं प्रति तादृशसंबन्धेन व्यापकतायाम् अवच्छेदकीभूतो यः प्रमेयत्वादिरूपकेवलान्वयिधर्मः तदवच्छिन्नस्य संयोगसमवायिविषयितादिसंबन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसंभवात् अभावप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात्; [2]तन्निवेशेऽपि व्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छेदकताकं प्रमेयत्वादिमद्भेदमादाय लक्षणसमन्वयसंभवात्। "समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य" इति मिश्रोक्त्या तादृशभेदस्यापि सौन्दलसम्मतत्वादिति केचित्; तदसत्, "घटत्वाभाववान् मेयत्वादि"त्यादौ पूर्वोक्तदिशा अतिव्याप्तेः। [3]स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपि न सत्; तथा सति "इदं वाच्यं ज्ञेयत्वादि"त्यादौ विषयतासंयोगादिसंबन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामञ्जस्यात् **प्रतियोग्यवृत्तिश्चे**त्यादिग्रन्थासंगतेः। एतेन—विषयतासंबन्धेन व्यापकता तेन संबन्धेन [4]प्रतियोगिसामानाधिकरण्यं विवक्षणीयम्, साध्यवत्त्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसंगमनमतिव्याप्तिनिरासश्चेति निरस्तम्; **ज्ञेयत्वत्वादिना वाच्यत्वादीनामभाव**[5] इत्येतादृशग्रन्थासंगतेश्च ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य

[1] "अभावात्"—अ.

[2] सर्वत्र व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभावेनैव लक्षणसमन्वये प्रतियोग्यवृत्तिश्चेत्यादि ग्रन्थावतारासंगतिरित्यत आहः—" तन्निवेशेऽपीति।—रा.

[3] भवानन्दस्य कल्पान्तरमपि दूषयितुमुपन्यस्यति—रा.

[4] "प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम्"—अ.

[5] सुलभः इत्यधिकः—अ.

विषयतासंबन्धेनाव्यापकत्वात् । किन्तु स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वम्, तेनैव[1] प्रतियोगितावच्छेदकावच्छिन्नभा[2]वसामानाधिकरण्यं विवक्षणीयम्, व्यभिचारिणि साध्याद्यभावस्य विशेषणताविशेषेण किञ्चिद्विशिष्टस्वाभावनिष्ठतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्ये - ऽपि तदवच्छिन्नभावसामानाधिकरण्याभावात् नातिव्याप्तिः; किञ्चिद्विशिष्टस्य स्वस्य योऽभावः सामानाधिकरण्यसंबन्धेन तद्विशिष्टस्याभावश्च विशिष्टस्वसमनियतोऽपि स्वस्मादतिरिक्त एव, अभावमात्रप्रतियोगिताकाभावस्यैव [3]तदभावप्रतियोगिस्वरूपतायाः सिद्धान्तसिद्धत्वात्; अतो धूमाद्यभावस्य सामानाधिकरण्यसंबन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वाव[4]च्छिन्नभावसामानाधिकरण्येऽपि न क्षतिः ।

[[5]वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वमनिवेश्य प्रतियोगितावच्छेदकेऽभावावृत्तित्वमेव निवेश्यम्, तादृशविशिष्टत्वं चाभावसाधारणमिति ।]

यावदभावानामित्यत्रापि अभावपदं भावभिन्नपरम्, अतः कालिकादिसंबन्धेन हेतुसमानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकह्रदत्वाद्यभावत्वावच्छिन्नप्रतियोगिताकस्य ह्रदत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासंभवेऽपि न क्षतिः; न च ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियततया स्वप्रतियोगितावच्छेदकतादृश-

[1] "तेनैव संबन्धेन"—रा.

[2] भावपदं चतुर्थकल्पे व्यर्थम्—कृ.

[3] "तदभिन्नाभावप्रतियोगिरूपताया इत्यर्थः यथा घटाभावमात्रप्रतियोगिकाभावस्यैव घटाभावप्रतियोगिघटरूपत्वम्" ।—रा.

[4] "अयोगोलकीयवह्न्यादि"—रा.

[5] [ ] "क्वाचित्कोऽयं पाठः" इति—अ.

प्रमाविषयत्वत्वावच्छिन्नभावसामानाधिकरण्यमस्त्येवेति वाच्यम्, तस्य [1]भावतया भिन्नत्वात्। [2]एवं च सति "कपिसंयोगाभाववान् मेयत्वादि"त्यादौ कपिसंयोगात्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीय "स्वविशिष्टे"त्यस्य सार्थकता [3]पूर्वोक्तदिशा अवसेया।

न च भावभिन्नाभावविवक्षणेऽपि "अयमात्मा ज्ञानादि"त्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वाद्यवच्छिन्नप्रतियोगिताकस्य आकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासंभवात् लक्षणसमन्वयासंभव इति वाच्यम्, [4]आकाशाभावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेः आकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहेण तदवच्छिन्नाभावस्य लक्षणाघटकत्वात्; अस्तु वा व्यापकतावच्छेदकरूपांश एव भाववृत्तित्वविशेषणम्, "इदं वाच्यं ज्ञेयत्वादि"त्यादौ च व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदकम्, अतस्तादृशाभावस्य न लक्षणघटकतेति नोक्त**प्रतियोग्यवृत्तिश्चे**त्यादिग्रन्थासंगतिरिति।

[1] "तथा च समनियतयोः भावभिन्नयोरैवैक्यं न तु भावाभावयोरपीति भावः" (रा) भावतयेतीति प्रतीकम्—कृ.

[2] "एवं सति" इति (अ) कृष्णम्भट्टीये अपि एवं सतीति प्रतीकम्—स्व.

[3] "सत्तावान् जातेरित्यादौ पूर्वोक्तदिशा अवसेया"—अ.

[4] आकाशाभावस्यात्मत्वप्रकारकप्रमाविशेष्यतात्वेन घटाभावसमनियततया भावसामानाधिकरण्यासंभवेन इयमाशंका अनुपपन्ना; इदमेव साधनं कुतो न कृतमित्याशंकामपि निरस्यति "आकाशाभावीये"त्यादिनेति। वस्तुतो व्यापकत्वविरहात् कालिकसंबन्धेन घटाभावप्रकारकप्रमाभावमादायाव्याप्तिर्बोध्या।—रा.

न च प्रतियोगितावच्छेदकसंबन्धेन व्यापकताविवक्षणेऽपि "इदं वाच्यं ज्ञेयत्वादि"त्यादौ विषयितादिसंबन्धेन वाच्यत्वत्वादिमतो ज्ञानादेः यः स्वरूपसंबन्धेनाभावः तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकतया हेतुसमानाधिकरणतया स्वरूपसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्यमिति तादृशग्रन्थासंगतितादवस्थ्यमिति वाच्यम्, "धूमवान् वह्ने"रित्यादौ संयोगादिसंबन्धावच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसंबन्धेन धूमत्वादिविशिष्टवह्न्यादिना संयोगेन—समवायसंबन्धावच्छिन्नप्रतियोगिताकस्य अयोगोलकावृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकादिसंबन्धेन तादृशजातित्वादिविशिष्टायोगोलकीयरूपादिना समं समवायेन—स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालिकादिसंबन्धेन तादृशविषयत्वत्वादिविशिष्टसंयोगादि[1]ध्वंसेन अनुयोगिताविशेषसंबन्धेन तादृशविषयत्वत्वादिविशिष्टतादृशविषयत्वाद्यभावेन च समं स्वरूपसंबन्धेन—विषयतासंबन्धावच्छिन्नप्रतियोगिताकधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासंबन्धेन, कालिकसंबन्धेन वा तादृशप्रमात्वविशिष्टं यदयोगोलकादिविषयकज्ञानं तेन समं विषयतासंबन्धेन—सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकत्वघटकसंबन्धे[2]नैव प्रतियोगितावच्छेदकविशिष्टत्वस्य विवक्षणीयतया "वह्निमान् धूमादि"त्यादौ विषयितासंबन्धेन द्रव्यत्वत्वादिमतः समवायादिसंबन्धावच्छिन्नाभावस्य स्वप्रतियोगितावच्छेदकसमवायादिसंबन्धघटितद्रव्यत्वादिनिष्ठव्यापकतायां स्वरूपसंबन्धेन अवच्छेदकीभूतो यो द्रव्यत्वत्वादिः तदवच्छिन्नप्रतियोगिता-

[1] न्यायरत्ने "संयोगध्वंसेने"ति प्रतीकधारणम्—स्व.

[2] "प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेनैव"—अ.

कस्य स्वप्रतियोगितावच्छेदकत्वघटकविषयितादिसंबन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना समं हेत्वधिकरणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न संभवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्यावश्यं निवेशनीयत्वेन "इदं वाच्यं ज्ञेयत्वादि"त्यादौ दर्शिताभावानां लक्षणाघटकत्वादिति दिक्[1]।

नन्वत्र लक्षणे समवायित्वादिना वाच्यत्वाद्यभावीयसमवायित्वादिरूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वात् वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता, तथा च तत्र तादृशाभाव एव दुर्लभ इत्यत आह—**ज्ञेयत्वत्वादिने**ति। **वाच्यत्वादीनाम्** इत्यादिपदात् [2]घटादेरपि परिग्रहः। **शेषमि**ति। स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणं हेतुसामानाधिकरण्यादिशरीरे संबन्धविशेषनिवेशनं तत्प्रयोजनञ्चेत्यर्थः। अत्र च निरुक्ताभावेषु स्वविशिष्टहे[3]त्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृ[4]त्तित्वमेव निवेशयितुमुचितम्, सद्धेतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेः लक्षणसमन्वयसंभवात् वह्निमान् धूमादित्यादौ कालिकादिसंबन्धेन हेतुसमानाधिकरणस्य रूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशेन[5]

[1] "व्यापकतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकताघटकवैशिष्ट्याभिधानेनातिव्याप्तिवारणसंभवे स्वप्रतियोगितावच्छेदकताघटकसंबन्धेन तद्वैशिष्ट्यं निवेश्य वह्निमान् धूमादित्यादौ अव्याप्तिं प्रदर्श्य तेनैव संबन्धेन व्यापकतावच्छेदकत्वकथनमयुक्तमिति ध्येयम्"—रा.

[2] "घटत्वादेः"—अ.

[3] "यावद्धेत्वधिकरणान्तर्भावेन"—अ.

[4] प्रतियोगिवृत्तय इति न्यायरत्ने प्रतीकधारणम्। तादृशरीत्या पाठो न दृश्यते—स्व.

[5] "हेतुसामानाधिकरण्यनिवेशात् तद्विरहेण"—अ.

वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसंबन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि क्षतिविरहात्; कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादेः उक्तरीत्या व्यापकता[1]वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्या[2]भावेनाभावे भावभिन्न[3]त्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः। "धूमवान् वह्ने"रित्यादौ धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽपि अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाद्य[4]भावस्य भावप्रतियोगिकतया अयोगोलकत्वाद्यतिरिक्तस्य प्रतियोग्यवृत्तित्वात् नातिव्याप्तिरित्यवधेयम्।

इति द्वितीयस्वलक्षणम्।

---

[1] "विशेषणतया साध्यवन्निष्ठत्वस्य निवेशात् तस्य व्यापकतावच्छेदकत्वं दुर्वारमिति बोध्यम्"—रा.

[2] "विरहेण"—अ.

[3] इदमनास्थायाम्—कृ.

[4] आदिपदाघटितपाठः—(अ) अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्येति प्रतीकम्—कृ.

कृष्णम्भट्टीये चतुर्दशलक्षणी

"मूलमित्यादि"। इच्छैव वाच्यत्वं; समवायित्वेन तदभावो विषयतासंबन्धावच्छिन्नप्रतियोगिताको यद्यप्यप्रसिद्धः; तथापि संबन्धान्तरावच्छिन्नतत्सौलभ्यमिति तु न संभवति. सामान्यरूपेण [1]विशेषाभावास्वीकारात्. व्यधिकरणधर्मावच्छिन्नाभावस्येति ग्रन्थविरोधाच्चेति भावः। "न चैवमि"ति मूलम्. "व्यभिचारः"। ज्ञेयत्वं वाच्यत्वव्यभिचारीति व्यवहारापत्तिः। वाच्यत्वत्वेन घटाद्यभावमादाय तद्वारणाय "साध्ये"ति। "न चे"ति। घटे यो वाच्यत्वाभावः स न तादृशः; स्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वाच्यत्वत्वाभाववानित्यर्थः। घटनिष्ठवाच्यत्वाभावप्रतियोगिता वाच्यत्वत्वावच्छिन्नत्वस्वरूपसंबन्धावच्छिन्नत्वोभयशून्येति वा।

गादाधर्यां "प्रसिद्धाविवे[2]"त्यनेन "घट एव प्रसिद्ध" इति मूले; घटे प्रसिद्ध एवेति योजना सूचिता। ननु व्यभिचारलक्षणे अन्यादृशसाध्याभावनिवेशेऽपि, व्याप्तिलक्षणे साध्यप्रतियोगिकाभाव एव निवेश्यते, इत्यत आह "अन्यथे"ति। ननु साध्याभाव इव तद्वद्वृत्तित्वाभावोऽपि तादृशवृत्तित्वप्रतियोगिक एव निवेश्यः, न तु तादृशवृत्तित्वसामान्याभावः, एवं च व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावमादायासंभववारणा-

[1] "विशेषाभावस्वीकारापातात्"—अ.

[2] प्रसिद्धत्वात् इत्यपि पाठो दृश्यते। स च अप्रामाणिक एव—स्व.

दाह "अतिव्याप्तेर्वे"ति । तथा च, तुल्ययुक्त्या व्यधिकरणधर्मावच्छिन्न-वृत्तित्वाभावमादायातिव्याप्तिरिति भावः । "[1]अनुपपत्तेश्चे"ति । तादृश-वृत्तित्वसामान्याभावस्यैव अव्यभिचारपदार्थता, [2]व्यधिकरणधर्मावच्छिन्नाभाव-[3]रूपत्वानुरोधेन, तादृशवृत्तित्वप्रतियोगिकाभावस्य तथात्वे, व्यभिचारसामा-न्याभावरूपतानुपपत्तेरित्यर्थः । [4]वस्तुतस्तु साध्यतावच्छेदकावच्छिन्नसाध्या-भावस्य तत्राघटकत्वात्, [5]तदनुपपत्तेरित्यर्थः । "मात्रे"ति । साध्याभावा-प्रसिद्धिवारणैकतानस्य दर्शितदोषास्फुरणेन तदवारणेऽपि, क्षत्यभावात् । न च साध्याभावे यत्किञ्चित्त्वं निवेश्याव्याप्त्यादिकं वार्यताम्, तथापि वह्निधूमान्य-तराभावमादायातिव्याप्तेः । "महानसीये"ति । साध्यतावच्छेदकावच्छिन्ना-भावनिवेशेऽपि, महानसीयवह्न्याद्यभाववारणं न स्यात्, अतः, साध्यतावच्छे-दकेतरधर्मानवच्छिन्नप्रतियोगिताकाभावो निवेश्यः; तत्र स्वसमानाधिकरण-त्वेन धर्मे विशेषिते, केवलान्वयिसाध्यकेऽभावः प्रसिध्यति, परंतु प्रमेय-वत्साध्यके, साध्यतावच्छेदकेतराप्रसिद्धिरतो अपर्याप्तान्तमवच्छेदकताविशे-षणम् । साध्यतावच्छेदकावच्छिन्नाभावे विशिष्टसाध्याभाववारकपर्याप्तित्या-गात्, पुनरभिमानानुधावनम् । "स्वम्" । भेदप्रतियोगिता । घटाभावा-दिवारणाय भेदकूटो निवेश्यः । स्वनिरूपकत्वस्वाश्रयधर्मसमानाधिकरणत्वो-भयसंबन्धेन तादृशावच्छेदकताविशिष्टप्रतियोगिताप्रतियोगिक एक एव वा भेदः । तादृशप्रतियोगिताकान्याभावनिवेशे, व्यधिकरणधर्मावच्छिन्नाभाव-स्याकाशाभावरूपतया अप्रसिद्धिः स्यात्, अतः तन्नोक्तम् । प्रतियोगितायां

[1] "अव्यभिचाररूपतानुपपत्तेश्चे"ति—अ.

[2] एतत्पूर्वं—द्वितीयाभावस्येति पाठः—मै ; तादृशपाठः नास्ति—अ.

[3] लाभानुरोधेन—अ.

[4] "वस्तुतस्तु" स्थाने "एवमि"ति पाठः—अ.

[5] "तदनुपपत्तिर्बोध्या"—अ.

साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नावच्छेदकताकत्वनिवेशात्, न "गुणवान् द्रव्यत्वा"दित्यादौ, विषयितासंबन्धेन गुणत्वविशिष्टस्याभावमादाय अव्याप्तिः। तत्रैव साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशात्, न वाच्यत्वभेदमादाय तत्प्रसिद्धिः। पर्याप्तिनिवेशनप्रयोजनमाह "प्रमेयत्वादिने"ति। "तादृशावच्छेदकता"। साध्यतावच्छेदकापर्याप्तावच्छेदकता। "मात्रमेवे"ति। घटत्वेन पटो नास्तीति, प्रतीतिविषयाभावप्रतियोगितानामपि लक्षणघटकत्वात्। अत्र साध्यतावच्छेदकस्य वृत्त्यनियामकपर्याप्तिसंबन्धावच्छिन्नाधेयतासंबन्धेन अभावो ऽलीकः[1]। साध्यतावच्छेदकानुयोगिकपर्याप्तिप्रतियोगित्वाभावश्च, अनुयोगिताया अव्यासज्यवृत्तित्वात्, उक्तस्थले घटत्वनिष्ठावच्छेदकत्वे न संभवति। यद्रूपावच्छेदेन साध्यतावच्छेदकतापर्याप्तिः, तद्रूपावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नाधेयत्वाभावनिवेशे, तादृशपर्याप्तिप्रतियोगित्वाभावनिवेशे, वा, गौरवम्। वृत्त्यनियामकप्रतियोगित्वसंबन्धावच्छिन्नतादृशपर्याप्त्यभावस्तु, अलीक इत्यत आह:-"साध्यते"ति। साध्यतावच्छेदकपर्याप्तनिरूपकताकावच्छेद्यत्वाभावेत्यर्थः। पर्याप्तिसंबन्धेन साध्यतावच्छेदकस्यावच्छेदकताविशेषणत्वात्, लाघवं बोध्यम्। समवायेन प्रमेयवदभाव-

[1] पर्याप्तिसंबन्धे किम् मानमितिचेत्? "आकाशौ" इत्यादिवाक्यस्याप्रमाण्यनिर्वाहाय पर्याप्तिसंबन्ध आवश्यकः, तदभ्युपगम एव प्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबन्धेन द्वित्वादेरन्वयबोधस्य शक्याभ्युपगमतया तदप्रामाण्यसंभवात्। प्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टसमवायेन द्वित्वादेरन्वयः स्वीकर्तुम् न शक्यते, समवायस्य एकत्वेन प्रकृत्यर्थतावच्छेदकाव्याप्यत्वात्। एवमपि द्वित्वादीनां अधिकरणभेदेन भिन्नतया तेषां व्याप्यत्वसंभवात् प्रकृत्यर्थतावच्छेदकवैशिष्ट्यं द्वित्वे निवेश्य तादृशद्वित्वसमवायस्य संबन्धत्वस्वीकारात् न दोष इति चेन्न, लाघवात् तादृशद्वित्वस्यैव संबन्धत्वस्वीकारात्। तावतैव पर्याप्तेः संसर्गतासिद्धिः। पर्याप्तेः द्वित्वानतिरेकात्। तदुक्तं दीधितिकृता "अयमेको घटः इमौ द्वौ" इत्यादिप्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः पर्याप्तिरिति। पर्याप्तिर्व्याप्यवृत्तिरिति केचित्। अव्याप्यवृत्तिरित्यन्ये—स्व.

प्रतियोगित्वादौ मेयावच्छेद्यत्वं सुलभम् । प्रतियोगिविशेषणतावच्छेदकान्तर्भावेन पर्याप्तिनिवेशात्, तदनवच्छिन्नत्वप्रसिद्धिः । प्रतियोगिविशेषणीभूतसकलधर्मेषु[1] अवच्छेदकतापर्याप्त्युपगमात्, महानसीयवह्न्यभावव्युदासः । अत्र एवं सति[2] केवलान्वयिसाध्यके वाच्यत्वाभावपर्यन्तप्रसिद्धिकरणवैयर्थ्यम् अस्वरसः ।

ननु दर्शितरीत्याऽभावनिवेशे, मूलसंगमनेऽपि, मणिदीधित्योरेकवाक्यताभङ्गप्रसङ्गः । तथा सति गगनत्वेन प्रमेयाभावादिवैयर्थ्येन, दीधितिकृतां तथाऽभावनिवेशाभिप्रायासंभवादित्याशंकते:-" न चैवमि "ति । नन्वेवं " समवेतवान् जाते "रित्यादौ एतद्रूपान्यत्वविशिष्टाभावस्य प्रसिद्धसाध्यके तार्णातार्णोभयाभावस्य वा न व्यावृत्तिः; विशेषणान्तरदाने च, गौरवमित्यत आह—" साध्ये[3] "ति । [4]एवमपि वाच्यत्वसाध्यके, गुरूधर्मस्याभावप्रतियोगितावच्छेदकत्वस्वीकारे, विशिष्टाभावोपेक्षा निर्बीजा स्यादित्यवतारणं सम्यक् । " यद्विशिष्टाधिकरणं साध्यमि "ति । यत्पदम्—अवच्छेदकतापरं, तथा च यादृशावच्छेदकतापर्याप्त्यधिकरणीभूतो यो धर्मः, तादृशधर्मविशिष्टं साध्यं भवति, तादृशी या साध्यतावच्छेदकापर्याप्तावच्छेदकता, [5]तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावेत्यर्थः । शुद्धवह्नित्वापर्याप्ताया, महानसीयवह्नित्वपर्याप्तावच्छेदकताया, यत्पदेनोपादानसंभवात् महानसीयवह्न्यभावनिरासः । न चैवं सति, " वह्निमान् धूमादि "त्यादौ घटाभावादेरपि साध्याभावत्वापाताद्व्याप्तिरिति वाच्यं; लक्षणघटकाभावप्रतियोगितायाः साध्यनिष्ठत्वेन विशेषणीयत्वात् ।

[1] " धर्मे " इति—अ.
[2] इतः परं " मूलकृताम् " इति—अ.
[3] साध्यतेति प्रतीकम्—अ.
[4] इतः पूर्वं " ननु " इति पाठः—मै.
[5] तत्कप्रतियोगिताभिन्नप्रतियोगिताकाभावेत्यर्थः—अ

अत्र पाठे गगनत्वेन प्रमेयसामान्याभावस्य, लक्षणाघटकतया अग्रे तत्प्रदर्शनं विरुध्यत इति यत्पर्याप्त्यधिकरणविशिष्टाधिकरणं साध्यवदिति पाठमादारयांचक्रुः । यादृशावच्छेदकतापर्याप्त्यधिकरणीभूतो यो धर्मः, तादृशधर्मविशिष्टो यः पदार्थः, तादृशपदार्थाधिकरणं साध्यवत् भवति, तादृशी या साध्यतावच्छेदकापर्याप्तावच्छेदकता, तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकभावेत्यर्थः । अत्रापि घटाभावादेर्वारणाय[1] प्राग्वत् , साध्यनिष्ठत्वं प्रतियोगिताविशेषणं देयम् ।

अथवा पूर्वपाठे साध्यमित्यपहाय प्रमेयमिति, एतत्पाठे साध्यवदित्यस्य स्थाने प्रमेयवदिति, विवक्षया घटाभावादिर्वारणीयः ; तेन न साध्यनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेन गौरवम् । अत्र "यद्विशिष्टाधिकरणं वृत्तिमत्साध्यमि"ति विवक्षया गगनत्वेन प्रमेयसामान्याभावसंग्रहसंभवात् पाठान्तरकल्पनं, वृथैवेति ध्येयम्[2] ।

साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकल्प एव गगनत्वेन प्रमेयसामान्याभावकथनं, नोत्तरकल्प इत्यप्याहुः ।

अत्र, साध्यतावच्छेदकानवच्छिन्नत्व-वस्तुवृत्तिधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावः शक्यनिवेशनः ; वस्तुवृत्तिधर्मावच्छिन्नत्वं च, स्वविशिष्टाधिकरणवस्तुकावच्छेदकताकत्वम् , गगनत्वेन प्रमेयसामान्याभावस्य संग्राह्यत्वे स्वपर्याप्त्यधिकरणधर्मविशिष्टाधिकरणवस्तुकत्वम् , अवच्छेदतायां निवेश्यमिति। अत्र निरुक्तसाध्याभावसजातीया ये, तत्तदधिकरणवृत्तित्वाभावा, इति विवक्षया सामञ्जस्येऽपि, गुरुधर्मस्य साध्यतावच्छेदकत्वे, तस्य प्रतियोगितानवच्छेदकतया, तदवच्छिन्नाभावाप्रसिद्धेः व्यधिकरणधर्मा-

[1] साध्याभावत्वापत्तिवारणायेत्यर्थः—स्व.

[2] न्यायरत्ने तु पाठान्तरमेव अङ्गीकृतमिति ज्ञेयम्—स्व.

वच्छिन्नाभावमादायातिव्याप्तिः, साध्यतावच्छेदकस्थाने, साध्यव्यापकताव-च्छेदकत्वनिवेशे च तदवच्छिन्नप्रतियोगिताकत्वोक्त्यैव निर्वाहात् शेषवैयर्थ्यम् स्यादतः, गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमेवोपेयम् , न तु तथाविधविवक्षापि। यदि च, साध्यतावच्छेदकावच्छिन्नाभावशरीरे पर्याप्तिमनिवेश्यान्यादृश एव साध्याभावोऽङ्गीक्रियते, तथा साध्यव्यापकतावच्छेदकावच्छिन्नाभाव-शरीरे, पर्याप्तिमनिवेश्य साध्यव्यापकतावच्छेदकावृत्तिसमानाधिकरणधर्मवृत्ती-त्यादिक्रमेण, साध्याभावः परिष्कार्यः. गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वं चोपेयमित्युच्यते, तदापि, साजात्यादिनिवेशस्य मिश्रमात्रसम्मततया उपा-ध्यायादीनामसम्मतत्वमालोच्य, साध्याभावप्रसिद्धावेव, लक्षणस्य कथंचित् निर्दोषतेत्यभिहितम्. अत एव "तर्हीं"ति मूलव्याख्याने, असंभवाति-व्याप्ती पूरिते इति ।

नन्वेतत्पाठेऽपि, समवायितया वाच्यत्वाभावो, लक्षणघटको न भवतीति मणिविरोध इत्यत आह—"वस्तुत[1]"इति । इदं तु चिंत्यम् । समवायितापदस्य योगेन गगनत्वविरुद्धघटत्वपटत्वोभयान्यतरपरत्वसंभवात्, यत्पर्याप्त्यधिकरणधर्मविशिष्टस्य, साध्यतावच्छेदकसंबन्धेन अधिकरणमिति विवक्षया, तस्य यथाश्रुतत्वेऽपि वा सामञ्जस्यमिति । परंत्वीदृशाभिप्राये, वा-च्यत्वसाध्यके घटत्वादिना पटाभावेदेरपि, लक्षणघटकत्वसंभवात् , मणिका-राणां साध्यप्रतियोगिकाभावानुसरणं, व्यर्थमित्येकवाक्यताभङ्ग एव। यदि च, वाच्यत्वसाध्यके एव घटाभाववारणाय, साध्यनिष्ठप्रतियोगिताकल्प एवा-दरणीयः तदा, सौन्दलमतावलम्बनं व्यर्थम् , वाच्यत्वादिभेदसंभवात्. प्रमेय-साध्यके, समवायादिसंबन्धावच्छिन्नमेयाभावादिः, साध्यतावच्छेदकसंबन्धा-वच्छिन्नप्रतियोगिताकत्वं निवेश्य, तन्मतावलम्बने च, प्रयासाधिक्यमित्यवता-

[1] वस्तुतस्तु इति प्रतीकम्—र.

रणीयम्। एतत्कल्पे, विशिष्टवाच्यत्वाभावादौ, वाच्यत्वत्वादेरवच्छेदक-प्रवेशानुपगमात्, विशिष्टाभावोपेक्षा।

"दीधिती"ति। अशुद्धस्यापि शंकितुरभिप्रायविषयत्वे, बाधकाभाव इत्याशयः। ननु "अथे"त्यादिग्रन्थस्य, यदि कूटघटितलक्षणाभिप्रायकत्वं स्वस्याप्यभिमतं, तदाग्रे तद्दूषणाभिधाने संदर्भविरोधः, स्वानभिप्रेतार्थस्यैव, दूषणीयत्वात्, अतः संदर्भशुद्धिमाह "व्यधिकरणे"ति। एवं च "अथे"त्यादिग्रन्थस्य, अगत्या कूटघटितलक्षणाभिप्रायकत्वेऽपि, तस्य "प्रतियोग्यवृत्तिश्चे"ति ग्रन्थावतारकत्वं, न संभवति, दुष्टत्वात्, निराकृतस्य अभावखण्डनेन निराकरणस्य व्यर्थत्वादितिभावः. तथा च, "अथे"त्यादिग्रन्थस्य कूटघटितलक्षणाभिप्रायकत्वं स्वाभिमतं, तत्तु न दूषितं, किं तु "प्रतियोग्यवृत्तिश्चे"ति ग्रन्थावतारकत्वमेव, स्वानभिमतत्वादिति, तद्दूषणे, न संदर्भविरोध इति। ननु "अथे"त्यादिग्रन्थस्यापि "यत्समानाधिकरणा" इत्यादिनिर्दुष्टलक्षणाभिप्रायकत्वमस्तु इत्यत आह "यदि"ति। साध्याभाववदवृत्तित्वरूपलक्षणकर्तुरेव साध्याभावाप्रसिद्धिनिराकरणार्थम् "अथे"त्यादि शंकेति, तस्या "यत्समानाधिकरणा" इति लक्षणस्य, तल्लक्षणपरिष्काररूपत्वाभावेन, तदभिप्रायकत्वं न संभवतीत्यर्थः। कथं तर्हि "यत्समानाधिकरणा" इत्यस्य "प्रतियोग्यवृत्तिश्चे"ति ग्रन्थावतारकत्वं? चकारेण "अथे"त्यादि शंकाभिप्रेतलक्षणे एव, दूषणस्य समुच्चेयत्वादित्यतः "अथे"त्याद्याशंकाभिप्रेतलक्षणं, नैव तेन दूष्यते, किन्तु अन्यदेवेति मनसिकृत्य, व्यधिकरणधर्मावच्छिन्नाभावमात्र[1]निराकरणपरत्वे, अर्थान्तरापत्तिरिति लक्षणान्तरस्यावतारकत्वमुपपादयितुं, प्रथमदूषणं स्पष्टयति "व्यभिचारे"ति। "केवले"ति।

[1] मात्रेति नास्ति—अ.

कूटघटनया परिष्करणीयसाध्याभाववदवृत्तित्वमित्यर्थः । एतस्य केवलान्वयि साधारण्यमक्षतम् । "एवं चे"ति । यद्यपि, घटत्वेन पटाभावो, घटत्वेन घटभिन्नाभाव एव, तस्य च, घटान्यत्वेन घटाभावेन प्रतियोगितयोरेकीकरणाभावेऽपि, सकलव्यधिकरणधर्मावच्छिन्नाभावानां समनैयत्यादैक्यमिति, कथं तत्त्यागः? तथापि, समनियताभावभेदपक्षे इदम् । अन्यथा भावत्वेनेत्यादिरिति साम्यम् ।

"विशेष्यतासंबन्धेने"ति । घटपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताख्यसंबन्धेनेत्यर्थः. अन्यथा, शुद्धविशेष्यतासंबन्धेन तद्धर्मप्रकारकत्वविशिष्टेच्छाया अपि, केवलान्वयितया. पटादेरपि घटपदवाच्यत्वापत्तेरिति केचित !

वस्तुतस्तु; घटपदवाच्यत्वादिप्रतीतौ, विशिष्टाधिकरणता नियामिका, तस्यां च निरुक्तविशेष्यतेति, यथाश्रुतमेव, सम्यक् ।

विशिष्टाभावप्रतियोगितायाः, विशेष्यविशेषणोभयत्वावच्छेदेन पर्याप्तिः, तस्या व्यासज्यवृत्तित्वादित्याशंकते[1]; "न चे"ति । "विशिष्टेच्छायाः" । बोद्धव्यत्वप्रकारकत्वविशिष्टेच्छायाः । ननु प्रतियोगितायाः व्यासज्यवृत्तित्वेऽपि, समवायित्वे इच्छान्तर्भावेन प्रतियोगितासामानाधिकरण्यसत्वात्, कथं समवायितया विशिष्टाभावस्य, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्? न च, प्रतियोगिताव्यधिकरणत्वं, स्वरूपसंबन्धेन प्रनियोगितानधिकरणवृत्तित्वं, तच्च, समवायित्वस्य प्रतियोगितानधिकरणघटादिवृत्तित्वेन अक्षतमिति वाच्यम्. तथा सति सामान्यरूपेण विशेषाभावात्मनो, वाच्यत्वेन वह्न्यभावस्य, व्यधिकरणधर्मावच्छिन्नाभावत्वापत्तेः, वह्निनिष्ठप्रतियोगितानधिकरणवृत्तित्वस्य, वाच्यत्वादावक्षतत्वादिति चेन्न;

[1] "इत्याशयेन शंकते"—अ.

प्रतियोगित्वाधिकरणावृत्तित्वस्य, प्रतियोगित्वपर्याप्त्यवच्छेदकावच्छिन्नापर्याप्तिकत्वस्य, व्यधिकरणपदार्थत्वात्। "तद्विषयाभावादि"ति। घटत्वेन, घटपटोभयं नास्तीति प्रतीतिविषयाभावस्य, स्थातुमशक्यत्वादित्यर्थः। "अभावविशेषे"ति। उभयाभावविशिष्टाभावेत्यर्थः. न तु अभावमात्रस्य. वह्न्यादिसामान्याभावस्य प्रतियोगिताया, अव्यासज्यवृत्तित्वे बाधकाभावात्, व्यासज्यवृत्तित्वे केवलान्वयित्वापत्तेश्चेति भावः। विशेषपदं, प्रतियोगिविशेषणधर्मसाजात्यस्य प्रतियोगितायां सूचकम्. अन्यथा, घटत्वपटत्वाभ्यां प्रमेय[1]सामान्याभाव इत्यत्र[2] घटत्वपटत्वान्यतरोपादानवैयर्थ्यात्। ननु उभयस्य, घटत्वविशिष्टत्वासंभवेऽपि प्रत्येकस्योभयानतिरिक्ततया प्रतियोगितापर्याप्तेः, घटत्वेनोभयाभावस्य, कथं केवलान्वयित्वमित्याशंक्य, तस्य केवलान्वयित्वनिर्वाहायाह—"यद्धर्मे"ति। प्रतियोगितापर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यधिकरणतया अभावस्य विरोध इत्यर्थः। प्रकृते च, प्रतियोगितापर्याप्त्यवच्छेदकीभूतोभयत्वरूपधर्मावच्छिन्नपर्याप्तिक प्रतियोगितावच्छेदकस्यैवाप्रसिद्धत्वेन, विरोध्य[3]भावात् उक्ताभावस्य केवलान्वयित्वमिति भावः। पर्याप्त्यनुपगमेऽपि उपपत्तिसंभवात् तदुपगमोऽनर्थक, इत्याशयेन समाधत्ते—"प्रतियोगिताया" इति। एकधर्म्यवृत्तित्वरूपविरोधासंभवादाह—"एके"ति। न च विरोधस्यावच्छेदकत्वाघटकतया अभावस्य कथम् सार्वत्रिकत्वम्. तेन विरोधघटकसंबन्धावच्छिन्नत्वस्य अवच्छेदकतायां सिद्धेः। "विरुद्धे"ति। प्रमेयत्वावच्छिन्ने प्रतियोगितायाः व्यासज्यवृत्तित्वासंभवेन, घटत्वपटत्वोभयस्य तदवच्छेदकत्वं तस्य व्यासज्यवृत्तित्वं चावश्यकम्. अन्यथा, केवलान्वयित्वानुपपत्तिरिति, अन्यत्रापि, तथैवो-

[1] प्रमेयाभावे—अ.
[2] इत्यत्रेति नास्ति—अ.
[3] विरोधाभावात्—अ.

पपत्तौ, प्रतियोगितापर्याप्तिस्वीकारवैयर्थ्यमिति स्फोरणाय दृष्टान्तानुसरणम् । अत्र, घटत्वे प्रतियोगितावच्छेदकत्वानुपगमे, तादृशाभावस्य केवलान्वयित्वं न स्यात्, अतः, तत्रापि प्रतियोगितावच्छेदकत्वमावश्यकम्. एवं च, घटत्वेन तद्घटतदन्यघटोभयाभाव-वह्नित्वेन तार्णातार्णवह्न्युभयाभावादीनां घटत्ववह्नित्वादेः न प्रतियोगितावच्छेदकत्वं. प्रतियोगिविशेषणस्यैव प्रतियोगितावच्छेदकत्वेनोपपत्तेरिति ।

ननु घटपटौ न स्तः, इति प्रतीतिः केवलोभयत्वे, अवच्छेदकत्वं नावगाहते. यत्किञ्चिदुभयवति कुड्यकुसूलोभयवत्भूतले, तादृशप्रतीत्यनुदयापत्तेः. एवं, केवलघटत्वे, केवलपटत्वे, वा द्रष्टव्यम्. किन्तु घटपटोभयत्वे घटत्वे पटत्वे च त्रिष्वेव, अवच्छेदकत्वमवगाहते इत्यवश्यं वाच्यम्. तेषां च त्रयाणामेकधर्मावच्छिन्नापर्याप्तत्वरूपविरोधशालित्वात् विरुद्धोभयधर्मावच्छिन्नाभाववत्, उक्ताभावस्यापि केवलान्वयित्वप्रसङ्गः. तस्यापि विरुद्धधर्मावच्छिन्नप्रतियोगिताकत्वादित्याशङ्कते—"यद्यपी"ति । "पर्याप्तमि"ति । तथा च, पूर्वोक्तरीत्या, घटपटोभयाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टस्याप्रसिध्या, तस्यापि केवलान्वयित्वापत्तिः. तदुभयवति तदुभयाभावसत्वं चानिष्टमितिभावः । न ह्यभावस्य, निरुक्तविरोधशालिधर्मावच्छिन्नप्रतियोगिताकत्वमात्रं केवलान्वयित्वे तन्त्रं, किन्तु अन्यदेव किञ्चिदित्याशयेन समाधत्ते—"तथापी"ति । "द्वित्वे"ति । [[1]अनेनैव द्वित्वे अवच्छेदकत्वलाभः] । "अवच्छेदकता" । द्वित्वव्याप्यत्वविशिष्टसमवायसंबन्धेन प्रतियोगितावच्छेदकता । "स्वातन्त्र्येणापी"ति । शुद्धसमवायेनापीत्यर्थः ।

अयमभिप्रायः. यद्यत्संबन्धावच्छिन्ना यद्यत्धर्मनिष्ठा प्रतियोगितावच्छेदकता, तत्तत्संबन्धावच्छिन्नतत्तत्धर्मनिष्ठावच्छेदकतानिरूपितप्रतियो-

[1] "द्वित्वेऽवच्छेदकतालाभार्थम्" इति—अ.

गिनिष्ठाधेयतानिरूपिताधिकरणतया साकमभावस्य विरोधः। घटपटौ न स्तः, इत्याकारकप्रतीत्या च घटपटोभयत्वे, घटत्वे, पटत्वे, च प्रतियोगितावच्छेदकत्वमवगाह्यते। तत्रापि, घटपटोभयत्वे घटत्वव्यापकत्वे सति पटत्वव्यापकत्वविशिष्टो यः समवायः, पर्याप्तिसंबन्धो, वा तादृशसंबन्धावच्छिन्नावच्छेदकत्वं, घटत्वे पटत्वे च द्वित्वव्याप्यत्वविशिष्टसमवायसंबन्धावच्छिन्नावच्छेदकत्वं वर्तते. पर्याप्तितदन्यसंबन्ध[1]भेदेन, निरवच्छिन्नत्वसावच्छिन्नत्वभेदेन, च अवच्छेदकतानां नानात्वेऽपि, तत्प्रतियोगितावच्छेदकतात्वेन व्यासज्यवृत्तित्वं सिद्धान्तलक्षणे[2] व्यवस्थापयिष्यते। एवं च भूतलं घटपटोभयवदिति प्रमासत्वेन घटपटोभयनिष्ठाधेयतायां तत्तन्निरुक्तसंबन्धावच्छिन्नतत्तद्धर्मनिष्ठावच्छेदकतानिरूपकत्वस्वीकारात् तथाविधाधेयतानिरूपिताधिकरणत्वस्य घटपटोभयाभावविरोधिनः घटपटोभयवत्येव सत्वेन न तादृशाभावस्य केवलान्वयित्वप्रसङ्गः। न चोभयत्वसमवाये घटत्वादिव्यापकत्वं घटत्वादिसमवाये च तदुभयत्वव्याप्यत्वं वा कथं भासते इति वाच्यम्; घटपटौ न स्तः इत्यत्र घटके घटपटावित्यंशे उद्देश्यविधेयभावमहिम्ना उद्देश्यतावच्छेदकीभूतघटत्वादिव्यापकत्वं विधेयीभूतद्वित्वसंसर्गे भासते। एवं च तुल्यवित्तिवेद्य[3]तया तादृशोभयत्वव्याप्यत्वस्य घटत्वपटत्वादिसमवाये भानं संभवतीति। घटत्वेन घटपटोभयं नास्तीत्यादौ तु निरुक्तसंबन्धावच्छिन्नावच्छेदकत्वं धर्मत्रयेऽपि भासते। घटत्वेनेत्यत्र घटत्वमात्रे शुद्धसमवायसंबन्धावच्छिन्नावच्छेदकत्वमपि। एवं च भूतलं घटत्वेन घटपटोभयवदिति प्रमाविरहेण तादृशाधेयतायां शुद्धसमवायसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकतानिरूपकत्वासत्वात् तादृशावच्छेदकनिष्ठावच्छेदकता-

[1] संबन्धेन—अ.

[2] नव्यव्यत्यासेन साध्यतावच्छेदके प्रतियोगितावच्छेदकभेदनिवेशविचारावसरे—स्व.

[3] एकज्ञानविषयतयेत्यर्थः—स्व.

निरूपिताधेयतानिरूपिताधिकरणताया अप्रसिध्यैव तादृशाभावस्य केवलान्वयित्वोपपत्तिः। प्रतियोग्यंशे प्रकारीभूतधर्मस्यापि प्रतियोगितावच्छेदकत्वात् द्वित्वस्य प्रतियोगितावच्छेदकत्वं बोध्यमिति न काप्यनुपपत्तिरिति।

अत्र वदन्तिः—एवं सति एकधर्मावच्छिन्नापर्याप्तत्वरूपविरोधं निष्कृष्य अवच्छेदकताया व्यासज्यवृत्तित्वस्वीकारवैयर्थ्यप्रसङ्गः।

वस्तुतस्तु घटपटोभयं नास्तीत्यादौ घटत्वव्यापकत्वविशिष्टपटत्वव्यापकत्वविशिष्टपर्याप्तिसंबन्धावच्छिन्नद्वित्व[1]निष्ठावच्छेदकताक एवाभावः प्रतीयते। घटपटोभयवति च तादृशसंबन्धेनोभयत्वविशिष्टस्य सत्वात्[2] न तादृशाभावस्य सार्वत्रिकत्वम्; प्रतियोगितावच्छेदकतापर्याप्त्यधियरणधर्मविशिष्टप्रतियोग्यधिकरणतया सार्धमभावस्य विरोधात्। घटत्वेन घटपटोभयं नास्तीति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदकतायाः [3][घटत्वतादृशोभयत्वैतदुभयपर्याप्ततया पूर्वोक्तरीत्या तयोर्धर्मयो विरुद्धतया] तथाविधावच्छेदकतापर्याप्त्यधिकरणोक्तधर्मद्वयविशिष्टप्रतियोग्यप्रसिध्या सार्वत्रिकत्वमित्येव भट्टाचार्याणामाशय इति। घटत्वादेः धर्मितावच्छेदकत्वोक्त्या धर्मितावच्छेदकव्यापकत्वस्य द्वित्वसंबन्धे लाभः। "अवच्छेदकत्वं[4] प्रतीयते" इति। संसर्गतायामित्यादिः। तथा च घटपटोभमं नास्तीत्यादिप्रतीतौ घटत्वपटत्वयोः प्रतियोगितावच्छेदकत्वानुपगमात् न तदभावस्य सार्वत्रिकत्व-

[1] घटपटीयद्वित्व—अ.

[2] "न तादृशाभाव इति न तादृशाभावस्य सार्वत्रिकत्वम्"—अ.

[3] [ ] एतच्चिह्नान्तर्गतपाठस्थाने "पूर्वोक्तरीत्या विरुद्धघटत्वतादृशोभयत्वैतदुभयपर्माप्ततया विरोधघटकसंबन्धेन" इति—अ.

[4] "अवच्छेदकता प्रतीयते" इति गदाधरीपाठः पूर्वमपि अवच्छेदकता इति प्रतीकधारणम् कृष्णम्भट्टीये—स्व.

मितिभावः । "स्वातन्त्र्येणापी"ति । प्रतियोगितांशेऽपीत्यर्थः । तेन प्रतियोगितावच्छेदकताया व्यासज्यवृत्तित्वलाभ इति ।

प्रतियोग्यंशे प्रकारीभूतधर्मस्य न प्रतियोगितावच्छेदकत्वमिति मते त्वाह । "आस्तां वे"ति । एतन्मते च प्रतियोगितापर्याप्त्यवच्छेदकावच्छिन्नापर्याप्तधर्मावच्छिन्नप्रतियोगिताकत्वं, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं, वह्नित्वेन तार्णातार्णोभयाभावादिवारणं प्राग्वत् । यावत्तार्णादौ प्रतियोगितायाः पर्याप्त्यभावेन व्यतिरेकित्वं बोध्यम् । "अप्रामाणिकमेवे"ति । व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यमात्रप्रतियोगिकत्वमिति सिद्धान्तः[1] । ननु अभ्रान्तानां पुरुषत्वेन दण्डविशिष्टो नास्तीति व्यवहारमूलप्रतीत्या पुरुषत्वावच्छिन्नविशेष्यविशेषणोभयपर्याप्तप्रतियोगिताकाभावो विषयीक्रियते । तादृशप्रतीतेः पुरुषत्वदण्डोभयावच्छिन्नप्रतियोगिताकाभावावगाहित्वोपगमे दण्डिपुरुषाधिकरणाधिकरणकतदभावावगाहित्वानुभवविरोध इत्यतस्[2]तादृशप्रतीतिमेव निराकरोति— "दण्डी"ति । दण्डविशिष्टो वस्तुगत्या पुरुषः । एवं च वाच्यत्वस्य विशिष्टेच्छारूपत्वे विशिष्टाभावप्रतियोगिताया विशेष्यमात्रवृत्तित्वेन अव्यासज्यवृत्तितया कथं समवायित्वं व्यधिकरणधर्म इत्याशयः ।

वच्धातोरिच्छार्थः, यत्प्रत्ययस्य विषयः, तस्य भावो वाच्यत्वम्, इच्छाविषयत्वम्, समुदितार्थ इत्याशयेनाह—"वाच्यत्वमि"ति । एवं च घटे वर्तमानस्य तस्य पटेऽभावान्नपटस्य घटपदवाच्यत्वापत्तिः, विषयभेदेन विषयताभेदात् । वाच्यत्वशब्दस्य शक्तिमात्रार्थकत्वे यत्प्रत्ययानर्थक्यरूपं दोषमाह—"न त्वि"ति । अत्र च घटपदबोध्यत्वप्रकार-

[1] सिद्धान्तात्—अ.

[2] इत्यतः तत्र—अ.

कत्वविशिष्टेच्छावत्वासत्वेन पटेऽतिप्रसङ्गवारणेऽपि घटपदवाच्यत्वं पटवृत्तीत्यादिप्रतीत्यापत्तिः। न च घटपदबोध्यत्वप्रकारकत्वेऽवच्छेदकत्वावलम्बनायां नापत्तिः, सामानाधिकरण्यावलम्बनायां त्विष्टापत्तिरिति वाच्यम्, विशिष्टसत्ता गुणवृत्तिरिति सामानाधिकरण्यावलम्बनायामनायत्या इष्टापत्तिसंभवेऽपि अत्र तस्या अयुक्तत्वादित्यपि द्रष्टव्यम्। "प्राचीने"ति। अतिरिक्तविषयतावादिनां प्रकारताया विषयतानात्मकत्वेन सिद्धान्तलक्षणे वक्ष्यमाणमतात् भेदमाविष्कर्तुम् "मणिकारे"ति।

अत्रेदं चिंत्यते; सिद्धान्तमतेऽपि मणिकारलेखनं संगच्छत एव, इच्छारूपवाच्यत्वे संयोगादिसंबन्धेन समवायित्वस्यासत्वात्। तत्संबन्धावच्छिन्नसमवायित्वनिष्ठावच्छेदकताकवाच्यत्वनिष्ठप्रतियोगिताकाभावसौलभ्यात्। अन्यथा घटत्वादिना पटाभावादेरपि व्यधिकरणधर्मावच्छिन्नाभावत्वानुपपत्तिः। पटादौ कालिकादिसंबन्धेन घटत्वादेः सत्वात्. तथा च येन संबन्धेन प्रतियोग्यवृत्तित्वं धर्मस्य तत्संबन्धावच्छिन्नतन्निष्ठप्रतियोगितावच्छेदकताकत्वं तत्त्वं. प्रतियोगितावच्छेदकस्य तेन संबन्धेन वृत्तिमत्ताया अतन्त्रत्वादिति।

अत्र समाधानं वक्ष्यामः; वाच्यत्वस्य[1] इच्छात्मकतया[2] शंकाया उक्तरीत्या परिहारसंभवेऽपि दीधितिकारैः वाच्यत्वस्य इच्छानात्मकत्वं[3] स्वमतमवलंब्य परिहृतमिति।

"भावत्वेने"ति। यद्यपि समवायित्वेन वाच्यत्वाभावस्य वाच्यत्वत्वेन वाच्यत्वभिन्नाभावस्य चैक्यात् क्लृप्ताभावेनैव प्रसिद्धेः तदन्याभावकथनं व्यर्थम्; तथापि समवायित्वम् आश्रयत्व-सामानाधिकरण्यान्यतरसंबन्धेन

[1] इतः पूर्वं यद्वा इति—अ.

[2] तायां—अ.

[3] तथात्वं—अ.

समवायवत्त्वं तच्च भावत्वमिति रीत्या अस्यापि क्लृप्ताभावत्वम्; यदि प्रतियोगितैकीकरणेन समवायित्वेन वाच्यत्वाभाव-समवायित्वेन प्रमेयत्वाभावादेः समवायित्वेनासमवाय्यभावतयाऽसमवायित्वेन समवाय्यभावैक्येनापि निर्वाहो अस्ति तदा ईदृशायासभयादेव तथोक्तम्, पदार्थविभाजकयोरनयोः विरुद्धत्वस्य सुव्यक्तत्वादिति। "तत्प्रतियोगितात्वेने"ति। सामान्याभावप्रतियोगितायाः स्वरूपसंबन्धरूपतामते धूमसामान्याभावस्य लक्षणाघटकत्वप्रसङ्गः। कस्यामपि धूमरूपप्रतियोगितायां धूमत्वसमनैयत्यासंभवात्। अतो भावप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यं निवेश्यम्। तच्च तेन रूपेण भावत्वाभावत्वावच्छिन्नप्रतियोगितयोरक्षतमिति भावः। एतच्च प्रकृताभिप्रायेण। एकावच्छेदकावच्छिन्नप्रतियोगितात्वेन समनैयत्यादिपक्षे एतदभावस्य लक्षणाघटकत्वात्। "विशेषे"ति। न च तत्प्रतियोगिताव्यापकत्वमुभयाभावादिकमादाय तत्भङ्गवारणाय साध्यतावच्छेदकवृत्तिधर्मेण प्रवेश्यम्, तथा च निरवच्छिन्नसाध्यतावच्छेदकस्थलीयव्याप्तेः अवच्छिन्नसाध्यतावच्छेदकघटितत्वापात इति वाच्यम्, वैशिष्ट्याद्यनवच्छिन्नप्रतियोगिताया एव तत्घटकत्वात्। यदि च तत्प्रतियोगिताश्रयनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकता प्रवेश्यते, लाघवात्, तदा तुल्यरीत्या साध्यतावच्छेदकव्यापकताप्रवेशं प्रापय्योत्तरग्रन्थमवतारयति—"नन्वि"ति। "चेदि"ति। प्रतियोगिताव्यापकत्वस्य भेदघटितत्वेऽपि साध्यतावच्छेदकव्यापकत्वमत्यन्ताभावघटितमुपादीयते तदा न दोष इत्यावेदनाय।

यत्तु प्रमेयसाध्यके चेति पङ्क्तेः स्वयं वक्ष्यमाणस्वपरसाधारणयावल्लक्षणेषु प्रमेयसाध्यके व्यधिकरणधर्मावच्छिन्नाभावं दर्शयतीत्यवतारणम्, तन्न, वह्नित्वेन प्रमेयसामान्याभाव इत्यस्यासंगतेः। द्वितीयलक्षणे व्यापकतावच्छेदकरूपावच्छिन्नाभावनिवेशात् वह्नित्वस्य व्यापकतानवच्छेदकत्वात्। न

च प्रथमलक्षण एव तदुपदर्शनसंगतिः । तत्र समवायित्वेन वाच्यत्वाभावस्यैव संभवात् ; " स्वपरसाधारणयावदि "त्यस्यासंगतेश्चेति ।

" तादृशाभावीये "ति अन्योन्याभावघटितव्यापकत्वोपादानेप्येकधर्मावच्छिन्नत्वेन तत्प्रतियोगिताया ऐक्यान्नाभावाप्रसिद्धिरिति भावः । "[1]वह्निभिन्नत्वादिने "ति । नन्वेतादृशाभावानुसरणं व्यर्थम् ; घटत्वादिना वह्न्याद्यभावस्य लक्षणघटकत्वसंभवात्, न च " अवच्छेदकैक्ये " इत्याद्यग्रिमनियमेन घटत्वेन पटाद्यभावप्रतियोगितातो नोक्ताभावप्रतियोगिता भिद्यते घटत्वस्यैकत्वादिति तत्प्रतियोगितायाः पटादिवृत्तित्वेन न साध्यतावच्छेदकीभूतवह्नित्वादिसमनैयत्यमिति न घटत्वेन वह्न्यभावो लक्षणघटक इति वाच्यम्. एकधर्मावच्छिन्नप्रतियोगिता एकैवेति न नियमः । घटत्वेन वह्न्यभावघटसामान्याभावप्रतियोगितयोरैक्यप्रसंगात् । इष्टापत्तौ च घटवति घटत्वेन वह्न्यभावासत्वप्रसंगः । न च व्यधिकरणीभूतैकधर्मावच्छिन्नप्रतियोगितानामेवैक्यमिति नियमः व्यधिकरणधर्मावच्छिन्नस्थल एवेति वाच्यम् ; तावतापि वह्निभिन्नत्वेन वह्न्यभावस्य न लक्षणघटकतासंभवः । तत्प्रतियोगिताया वह्निभिन्नत्वेन वह्निघटोभयाभावप्रतियोगितैक्यापत्तेः, एकधर्मावच्छिन्नत्वात् । यदि चैवं सति तादृशाभावाप्रसिध्यैव नातिव्याप्तिरित्युच्यते. तदाऽसंभवापत्तिरिति चेन्न, व्यधिकरणीभूतैकधर्मावच्छिन्नसजातीयप्रतियोगिताया एवैक्यम् इति नियमः । " आस्तां वा उभयाभावप्रतियोगिताया व्यासज्यवृत्तित्वमि "ति भट्टाचार्येणोक्तत्वात्, वह्निभिन्नत्वेन वह्निघटोभयाभावप्रतियोगिता व्यासज्यवृत्तिरिति वह्निभिन्नत्वेन वह्न्यभावप्रतियोगितासाजात्याभावेन भिन्नैव । एवं च घटत्वेन वह्न्यभावमुपेक्ष्य वह्निभिन्नत्वेन वह्न्यभावपर्यन्तानुसरणम् युक्तमेव ।

[1] वह्निभिन्नत्वेनेति प्रतीकम्—र ; वह्निभिन्नत्वादिना इत्येव गदाधरीपाठः—स्व.

अथवा एकधर्मावच्छिन्नप्रतियोगिताया एकत्वमित्यत्र एकधर्मावच्छिन्नत्वमेकधर्मपर्याप्तावच्छेदकताकत्वं, तथा च स्वावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रतियोगिताया एकत्वमिति नियमनिष्कर्षः। एवं च वह्निभिन्नत्वेन वह्निघटोभयाभावप्रतियोगिता न वह्निभिन्नत्वमात्रेणावच्छिन्ना; किन्तु प्रतियोगिविशेषणेनोभयत्वेनापि इति तद्भेदः उभयत्वानवच्छिन्नप्रतियोगितायामक्षत एव। न चैवं सर्वेष्वपि व्यधिकरणधर्मावच्छिन्नाभावेषु प्रतियोगिविशेषणस्योक्तरीत्या प्रतियोगितावच्छेदकत्वात् सर्वापि तत्प्रतियोगिता नियमतो धर्मद्वयावच्छिन्नैवेति उक्तनियमकरणमसंगतमिति वाच्यम्। वह्निभिन्नत्वादिना उभयाभावस्थल एव प्रतियोग्यंशे प्रकारीभूतस्यावच्छेदकत्वं, न तु व्यधिकरणधर्मावच्छिन्नाभावमात्रस्थले मानाभावादित्याशयेन प्रतियोगितैकीकरणनियमसंगतेरिति।

"असति बाधक" इत्यस्य प्रयोजनमाह—"वह्नित्वे"ति। "उक्तविशेषे"ति। वृत्तिमदवृत्तिधर्मस्यावृत्तित्वनियामकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्व एव प्रतियोगितैक्यं नान्यत्रेति विशेषेत्यर्थः। वृत्तिमद्वृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वे प्रतियोगितैक्यासंभवात् प्रमेयत्वसमनैयत्यं न तस्यां, किन्त्वस्यामेवेति वा विशेषः। "सत्तावानि"ति। ननु कूटघटितलक्षणे साध्यतावच्छेदकसंबन्धावच्छिन्नाभावनिवेशेन गगनत्वावच्छिन्नविषयितासंबन्धावच्छिन्नाया गगनभिन्ननिष्ठप्रतियोगितायाः तथाविधगगननिष्ठप्रतियोगित्वाभेदे विषयितासंबन्धेन गगनवति ईश्वरज्ञाने तादृशाभावासत्वं स्यादिति तद्भेदो वाच्यः। तथा सति साध्यतावच्छेदकीभूतप्रमेयत्वसमनियतविषयितासंबन्धावच्छिन्नप्रतियोगिताया एवाप्रसिद्धेः साधनसामानाधिकरण्यपर्यन्तासत्त्वेऽपि[1] संभवात् किमर्थं तदुत्कीर्तनमिति चेदत्राहुः—गगनत्वेन प्रमेयसामान्याभावप्रतियोगित्वस्य वह्नित्वेन

[1] "असत्वे सत्वेऽपि संभवात्"—अ.

प्रमेयसामान्याभावप्रतियोगितातुल्यत्वेन साध्यतावच्छेदकसमनियतत्वस्य दूषितत्वेऽपि वह्निर्नास्तीति वह्नित्वेन प्रमेयं नास्तीति प्रत्ययाभ्यां प्रतियोगित्वयोर्भेदोपगमेऽपि कूटघटितलक्षणानिर्वाहं वक्तुं तदुत्कीर्तनमिति। विरुद्धत्वद्विवचनयोरूपादानफलं केवलान्वयितानिर्वाह एवेत्याह—"येने"त्यादि। उभयत्वस्यावच्छेदकतापर्याप्त्यवच्छेदकत्वेऽपि न क्षतिरिति तु बोध्यम्।

ननु "वह्नित्वेन निर्वह्नौ" इत्यादिना दीधितिकृता केन संबन्धेन प्रमेयसामान्यस्य साध्यतायामभावप्रसिद्धिः क्रियते? न तावत् स्वरूपसंबन्धेन; तत्संबन्धावच्छिन्नप्रतियोगिताकस्य वह्नित्वेन प्रमेमाभावस्य केवलान्वयितया वह्निमत्यपि सत्वेन "निर्वह्नौ" इत्यस्य वैयर्थ्यात्। नापि संयोगसमवायादिना; तत्संबन्धावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्य गुणादावेव प्रसिद्धेः वह्नित्वेनेत्यस्यासांगत्यापत्तेः। न च संयोगेन प्रमेयसामान्यसाध्यकद्रव्यत्वादिहेतौ तादृशाभावस्य गुणादौ प्रसिद्धत्वेऽपि कूटघटितलक्षणे साधनसामानाधिकरण्यस्य साध्याभावविशेषणतापक्षे तत्र तदभावात् वह्नित्वेनेत्युक्तमिति वाच्यम्; तत्संबन्धावच्छिन्नप्रतियोगिताकस्य गुणत्वेन प्रमेयाभावस्य [1]सर्वत्र सुलभतया तत्त्यागस्य निर्बीजत्वापातात्। एवं तत्संबन्धावच्छिन्नप्रतियोगिताकस्याभावत्वेन भावाभावस्य समर्थनेऽपि भावत्वेनाभावाभावे भावत्वेनेत्येतदसंगतिः। संयोगावच्छिन्नप्रतियोगिताकाभावसामान्याभावस्यैव केवलान्वयित्वात्। हेतुसमानाधिकरणत्वाच्च। नापि तादात्म्येन; तथा सति तत्संबन्धेन तादृशाभावस्य वह्निभिन्न एव संभवेन "निर्वह्नौ" इत्यनुधावनासंगतेः। न हि तस्य वह्निभिन्न इत्यर्थः संभवति! निरादिपदानामत्यन्ताभावार्थकत्वात्। नापि

[1] सद्धेतावसद्धेतौ च—संयोगेन प्रमेयसामान्यस्य साध्यत्वे संयोगेन प्रमेयाभावोऽपि सुलभ एव—अ.

संबन्धसामान्येन; तथा संसर्गतायां मानाभावात्। संबन्धसामान्येन साध्यतायामेवेश्वरज्ञानत्वादिहेतौ संबन्धसामान्येन तादृशसाध्याभावस्य हेत्वसामानाधिकरण्येन दोषसंभवात् विषयितासंबन्धानुधावनस्य निर्बीजतया तदाभासविरोधाच्चेति चेत्।

अत्राहुः—प्रत्येकं संयोगत्वसमवायत्वादिनैव संसर्गता; एवं च प्रत्येकसंबन्धेन साध्यतास्थल एव साध्याभावप्रसिद्धेः कर्तव्यत्वेन तादृशस्थले निर्वह्नौ एव प्रसिद्धेः संयोगादिसंबन्धेन साध्यस्य केवलान्वयित्वविरहेऽपि साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावप्रसिद्धेरावश्यकत्वात्। अन्यथा विषयितासंबन्धेन केवलान्वयित्वासंभवात् तत्र विरुद्धघटत्वपटत्वादिनाऽभावप्रसिद्धिकरणवैफल्यापत्तेः। यद्यपि संयोगेन संबन्धेन प्रमेयत्वावच्छिन्नाभावो गुणादौ प्रसिद्धः; तथापि साध्याभावे हेतुसामानाधिकरण्यसत्वात्, द्रव्यत्वादिहेतुके उक्ताभावो न प्रसिध्यतीति वह्नित्वेन प्रमेयाभावानुसरणम्; वह्नित्वेनेत्यस्योपलक्षणत्वेन धूमहेतुके घटत्वादिना प्रमेयाभावो द्रष्टव्यः। सर्वत्र एकाभावप्रसिध्यर्थं गगनत्वेनेत्युक्तम्। गुणत्वेन प्रमेयाभावोऽपि सर्वत्र चेत् तदा गगनत्वेनेत्येतदुपलक्षणम् बोध्यम्। इत्थं च विषयितासंबन्धेन साध्यतास्थले [1]न तादृशसंबन्धेन गगनत्वेन प्रमेयाभाव[2]प्रसिद्धिरित्याभाससंगतिः। एवं च स्वरूपसंबन्धेन साध्यतास्थलमभिप्रेत्यैव भावत्वेनाभावाभावे भावत्वेनेत्युत्कीर्तनसंगतिः।

केचित्तु—वह्नित्वेनेत्यस्य वह्न्यधिकरणतात्वेनेत्यर्थात् स्वरूपसंबन्धेन साध्यतास्थल एव इयं प्रसिद्धि[3]रित्याहुः।

[1] नकारो नास्ति—अ.

[2] अप्रसिद्धि—अ.

[3] अन्यथा वह्नित्वेन तादृशसंबन्धावच्छिन्नप्रमेयाभावस्य पर्वतेऽपि सत्वात्—अ.

अन्ये तु—संबन्धसामान्येन साध्यतास्थल एवेयं प्रसिद्धिः ; निर्वह्वावित्यस्य संबन्धसामान्येन वह्निशून्ये इत्यर्थात् । संबन्धत्वेन संबन्धानामभावप्रतियोगितावच्छेदकताया अग्रे वाच्यत्वात्. यत्र विषयितासंबन्धेनेत्याभासश्च संबन्धसामान्यत्वाक्रान्तविषयितासंबन्धेनेत्यर्थाभिप्रायेण ; तत्रपदोत्तरम् अपिकारपूरणेन संबन्धसामान्येन साध्यतास्थलसमुच्चयाभिप्रायेण वेत्याहुः ।

अत्र मणिकारेण व्यधिकरणधर्मस्यैवावच्छेदकत्वोक्तावपि गगनेन प्रमेयाभावानङ्गीकारः निर्बीजः । तथा सति घटत्वपटत्वाभ्यां प्रमेयसामान्याभाव इत्यस्योन्मत्तप्रलपितत्वापत्तेः ; न हि प्रतियोगितावच्छेदकताघटकरूपेण वृत्तिमत्त्वस्यातन्त्रत्वेऽपि तत्संबन्धेन वृत्तिमत्वं तन्त्रमिति युज्यते अविशेषात् ; इत्याशयेन आह—"इदमि"ति । एवं च वाच्यत्वस्येच्छारूपत्वेऽपि संयोगादिना समवायितया वाच्यत्वाभावसौलभ्येऽपि वस्तुगतिमनुरूध्याश्रयतया समवायितया वाच्यत्वाभावपरत्वेऽपि न क्षतिरित्याविष्करणाय व्यधिकरणधर्मेत्यादिहेतुलभ्यधर्मत्वस्य पश्चात् वक्तव्यत्वेऽपि यथाश्रुते तस्य तन्त्रत्वेऽपि न क्षतिरित्याविष्करणाय वा वाच्यत्वं यथेत्युक्तमिति ॥

इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम्

कृष्णम्भट्टीये प्रथमस्वलक्षणम्

पारिभाषिकमेवाव्यभिचरितत्वमित्यत्र, प्रतियोगित्वेन परिभाषाविषयत्वं चेत् पारिभाषिकत्वं, तदा प्रतिपाद्यविशेषालाभ इत्यतः "तान्त्रिके"ति । एवकारव्यवच्छेद्यमाहः—"नत्वि"ति । अपार्थकत्वं निराकरोति—"अव्ये"ति । "न तावदव्यभिचरितत्व"मिति मूलानुसारेण इदमीयं तत्पदं व्याचष्टे—"अथवे"ति । ईदृशाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावरूपसाध्ये प्रतियोग्यवृत्तिश्चेत्यादिना प्रतियोग्यवृत्तिधर्मिकप्रतियोगितानवच्छेदकत्वज्ञानकालीने इदृशाव्यभिचारपदार्थावच्छिन्नहेत्वविषयकज्ञाने सत्वादिति हेतुर्लभ्यते । अतः तदवतारणस्याव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वरूपसाध्यप्रदर्शकता-माविष्करोतिः—"व्याप्यत्वमि"ति । एतेन विधेयाकांक्षाया अपि निरासः । प्रकृतपक्षविशेषणतापन्नप्रकृतहेत्वंशे प्रकारतापन्नस्य, यत्समानाधिकरणा इत्यस्य, योगेन तत्पदार्थत्वासंभवात्, परिभाषयेत्युक्तम् तत्स्फुटीकरोति—"न त्वि"ति ।

अत्र च यत्समानाधिकरणः कश्चन तादृशाभावः प्रतियोग्यसमानाधिकरण इत्यत्र व्यभिचारपदपरिभाषामुपगम्य तद्विरोधिन्युक्तव्याप्यत्वे योगोऽस्त्वित्याशंक्याहः—"न त्वि"तीति केचित् । तन्न ; योगपरिभाषोभयापत्तेः ; तथा परिभाषाया एवासत्वाच्च ।

कथंचित् प्रसिद्धानुमाने लक्षणसत्वे प्रसिद्धव्यभिचारिणि लक्षणासत्वे च सत्येव लक्षणे पदप्रयोजनाकांक्षेत्याशयेनाह—"सद्धेतुस्थले" इति। "अयमात्मेति"। ननु यत्समानाधिकरणा इत्यस्यानुपादानेऽपि साध्यव्यापकतावच्छेदकप्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वदानादेव नात्मत्वसामान्याभावसंग्रहः; तथापि द्रव्यत्वाभावस्य यावदन्तर्गतत्वात् अव्याप्तिरिति चेत्; प्रतियोगितायाः साध्यनिष्ठत्वेन विशेषणीयत्वात्। यदि चैवं प्रमेयसाध्यतावच्छेदकके अव्याप्तिरुच्यते; तदा यत्किञ्चित्त्वेन साध्यतावच्छेदकं विशेषणीयम्: मैवम्; घटत्वात्मत्वैतदन्यतरत्वावच्छिन्नाभावमादायात्मत्वसाध्यकेऽव्याप्तेः। ननु साध्यव्यापकतावच्छेदकप्रतियोगितायां स्वव्यधिकरणधर्मावच्छिन्नत्वनिवेशात् न दोष इति चेन्न; तथापि हेतुसामानाधिकरण्यापेक्षया गौरवात्। स्वविशिष्टत्वानिवेशात् लाघवमिति चेदत्र वक्ष्यामः—"द्रव्यं विशिष्टसत्वादि"त्यादौ स्ववैशिष्ट्ये संबन्धभेदानिवेशेन यावदन्तर्गतद्रव्यत्वाभावस्य कालिकसंबन्धेन स्वविशिष्टप्रकृतहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यान्नाव्याप्तिरतः अयमात्मेति कालावृत्तिहेत्वनुधावनम्। "अष्टद्रव्यातिरिक्तद्रव्यत्ववान् आत्मत्वादि"-त्यादिसंग्रहाय साध्यतावच्छेदकविशिष्टेति। असंभवाशंकां निरस्यति—"स्वे"ति। प्रतियोगिवैयधिकरण्याघटितव्यापकताकल्पेऽप्याह—"सत्तावानि"ति। द्रव्यत्वादिहेतौ उक्तरीत्याव्याप्तेरसत्वादाह—"आत्मत्वादि"ति। साध्यवति दैशिकविशेषणतया वृत्तित्वोक्तौ च आत्मत्वविशिष्टसत्ताभावादिर्बोध्यः। "एके"ति। आत्मत्वं नास्तीति प्रतीतावेव प्रतियोगितावच्छेदकघटकतया आत्मभानात्। ज्ञानाद्यभावानुरोधेनाहः—"स्वाश्रये"ति। आत्मत्वाभावे[1] स्वाश्रयात्मत्वम्। "अनर्थकमि"ति। स्ववैशिष्ट्य-

[1] आत्मत्वाद्यभावे—अ.

स्यापि सं[1]बन्धित्वरूपत्वादिति भावः । "एके"ति । यत्तु तेषां संसर्गत्वेऽपि प्रतियोग्यधिकरणाधेयत्वनिवेशात् यत्समानाधिकरणा इत्यस्य सार्थक्यं; तच्च हेत्वधिकरणाधेयत्वमिति ; तन्न समञ्जसम् । प्रतियोग्यधिकरण-संबद्धत्वनिवेशेनैवोपपत्तौ तदाधेयत्वस्यैवानिवेशात् । "नाव्याप्तिरि"ति । पंचम्यन्तपदोल्लेख्यत्वावच्छेदेन लक्षणसत्वोक्त्या तत्सामानाधिकरण्येन तत्सत्वरूपानिष्ठलाभमात्रं; न तु तदसत्वात्मकानिष्ठान्तरलाभ इति भावः । नन्वेवं [2][तत्सामानाधिकरण्येन लक्षणसत्वरूपानिष्ठलाभेऽपि तस्य तत्सामानाधिकरण्येन तदसत्वाविरोधितया न तन्निराकरणसंभवः यावत्पदेन] सर्वव्यावृत्तिश्चाविवक्षिता एवं हेतुत्वावच्छेदेनातिव्याप्तेः लाभेऽपि सद्धेतुभागेऽसद्धेतुभागे वा अनतिप्रसंग इत्यपि न स्फुटमिति वाक्यार्थानुपपत्तिमाशंक्य व्यभिचारिणीति पूरणेऽवच्छेदकावच्छेदेनान्वयात् सर्वत्रेत्यस्य वैयर्थ्यम् स्यादतः अवच्छेदकत्वार्थकसप्तम्यंगीकारेण तत्सार्थक्यमित्याहः—"अथवेति"ति ।

"[3]नन्वि"ति । तद्व्याप्यत्वं च विशिष्य निवेश्यम् ; न तु यदभाव-प्रतियोगितात्वेन ; भूतत्वमूर्तत्वोभयाभावस्पर्शाभावयोः समनियतत्वेनैक्यपक्षे अतिव्याप्त्यसंगतेः । वह्निभिन्नत्वेन वह्न्यभाव-घटभिन्नत्वेन घटाभावयोरैक्येनासंभवाच्च । एवं प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंबन्धेन ; न तु प्रतियोगितावच्छेदकसंबन्धेन ; समवायेन प्रमेयसाध्यकव्यभिचारिण्यतिव्याप्तेः ; तथाविधस्य घटत्वेन प्रमेयत्वाभावस्य स्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्यात् । ननु प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वं न साध्यभिन्नावृत्तित्वं प्रमेयसाध्यकाव्याप्तेः ; किन्तु साध्यतावच्छेदकव्याप्यप्रतियोगिताकः

[1] स्वसंब—अ.

[2] [ ] एतच्चिह्नान्तर्गतपाठस्थाने "यावत्पदेन व्यभिचारिमात्रव्यावृत्तिर्दुर्लभा सामानाधिकरण्येन तत्सत्वासत्वयोः अविरोधात्" इति पाठः—अ.

[3] नन्विति प्रतीकं नास्ति—अ.

कश्चनाभावः प्रतियोगिसमानाधिकरणः तत्वमित्येव ; एवं च साध्यतावच्छेदकीभूतवह्नित्वनिष्ठधर्मं साध्यतावच्छेदकपदेनोपादायैव पतल्लक्षणप्रवेशेऽनवस्थापत्तिः ; अत्रापि साध्यतावच्छेदकव्याप्यत्वान्तरनिवेशादित्यत आह—"स्वव्यापके"ति । नन्वेवं "वह्निधूमोभयवान् धूमादित्या"दौ तादृशोभयत्वादिरूपसाध्यतावच्छेदकस्य व्यासज्यवृत्तित्वेन प्रतियोगितायाः प्रत्येकपर्यवसितत्वेन तद्वति तादृशोभयत्वाभावसंभवात् व्यापकत्वासंभवेनाव्याप्तेः कथमियमाशंका ? कथं च तादृशरीत्यैवोभयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वात् भूतत्वमूर्तत्वोभयसाध्यकव्यभिचारिणि वाच्यत्वाभावमादायाति[1]व्याप्तिः ? अथ संयोगाद्यव्याप्यवृत्तिसाध्यतावच्छेदकस्थले अभावप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं प्रवेश्यम्; न चैवं[2] संयोगावच्छिन्नसाध्यकव्यभिचारिणि वाच्यत्वाभावमादायातिव्याप्तिः ; संयोगाभावस्य प्रतियोगिसमानाधिकरणभिन्नत्वासंभवेन तादृशाभावप्रतियोगितावति वाच्यत्वेऽन्याभावस्यैवोक्तप्रतियोगिव्यधिकरणत्वादिति वाच्यं ; प्रतियोग्यनधिकरणप्रतियोगित्ववन्निष्ठाभावघटितस्य तस्य विवक्षितत्वादिति चेन्न ; उभयत्वसाध्यतावच्छेदकस्थले उभयत्वे प्रतियोग्यनधिकरणप्रतियोगित्ववन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यैव सत्वेनोक्तदोषा[3]वारणात् ; यदि प्रतियोग्यधिकरणं यद्यत् तत्तद्व्यक्तिभेदकूटवत्प्रतियोगित्ववदित्युच्यते ; तदा एकमात्रवृत्तिसाध्यतावच्छेदककस्थले प्रतियोगितामात्रस्यैव साध्यतावच्छेदकव्याप्यत्वसंभवेन वाच्यत्वाभावमादायातिव्याप्तेः ; प्रतियोगित्वाधिकरणे साध्यतावच्छेदकाभावस्य [4]दुर्घटत्वात् तादृशसाध्यतावच्छेदकरूपप्रतियोग्यधिकरणस्यैकत्वेन

[1] अतिव्याप्त्यभिधानम् ?—अ.

[2] "न चैवमपि"—अ.

[3] "दोषवारणाभावात्"—अ.

[4] दुर्धरत्वात्—अ.

यद्यदर्थाप्रसिद्धेरिति चेन्न; साध्यतावच्छेदकभेदेन व्याप्यत्वभेदादुभयत्वादि साध्यतावच्छेदकस्थले केवलस्वरूपसंबन्धेन प्रतियोग्यनधिकरणत्वस्य निवेशनीयत्वात्। यद्वा प्रतियोग्यनधिकरणत्वं प्रतियोगिवृत्तिवैशिष्ट्यावच्छिन्नावच्छेदकताकभेदवत्त्वमतो न कोऽपि दोषः। प्रतियोगिनोऽव्याप्यवृत्तित्वे तद्वैशिष्ट्यावच्छिन्नाभावस्यैव ईदृशभेदस्यापि तथात्वे तु प्रतियोगिमदवृत्तिधर्मवत्त्वं, प्रतियोग्यवच्छिन्नप्रतियोगितावदन्यत्वं वा बोध्यम्। वस्तुतस्तु प्रतियोगितावद्वृत्तित्वं निरवच्छिन्नं निवेश्यमिति। "मनसी"त्यादि। स्वविशिष्टत्वसद्भावमभिप्रेत्य। अन्यथा परमाणौ तदाभावस्यातथात्वेन तदसंगतेः। दिक्कृतविशेषणतानुपगमात् नित्ये तदभावाद्वा। न च घटत्वेन भूतत्वमूर्तत्वोभयाभावमादाय तत्संगतिः। तथा सति घटत्वेन केवलमूर्तत्वाभावमादायैव तत्संगतिसंभवेन द्वित्वावच्छिन्नाभावेत्यस्य भूतत्वमूर्तत्वोभयत्वावच्छिन्नाभावेति तद्विवरणस्य चासंगतेः।

यत्तु—गगनमनसोरुभयाभावस्य प्रतियोगिसामानाधिकरण्यप्रदर्शनं क्वचित्; तदयुक्तम्; "गोमान् गोत्वादित्यादौ" अतिव्याप्तिवारणार्थमिदानीं हेत्वधिकरणावच्छेदेनेत्यस्यावश्यकत्वात्। न च तदतिव्याप्तेरत्रत्यादिपदग्राह्यता. तद्वारणस्य यावत्त्वोपादानाप्रयोजनत्वात्। मूर्तत्वे स्वशब्दनिवेदिते आदिपदग्राह्ये भूतत्वे च तत्प्रदर्शनमित्यपि पदव्युत्पत्तिमसृणांतःकरणैरनुपादेयम्।

वस्तुतस्तु स्ववैशिष्ट्यस्य निष्फलत्वेन हेयत्वेऽपि उक्तसाध्यके एव परमाण्ववृत्तिमूर्तत्वे मनोवृत्तित्वविशिष्टमूर्तत्वे जन्यमूर्तमनोन्यतरत्वे वोभयत्वावच्छिन्नाभावमादायातिव्याप्तिः [1]संभवत्येव। [2][एतदर्थमेव वा आदिपदमिति]।

[1] संभवत्येवेति—अ.

[2] [ ] एतदन्तर्गतपाठो नास्ति—अ.

"तादृशोभयाभावस्यैवे"ति। यत्किञ्चिदभावस्य धर्तव्यत्वात्। "यावत्पदे दत्ते" इत्यादि। अत्रेदं चिन्त्यम्—साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावनिवेशस्याभिप्रेतत्वे यावत्पदे दत्ते भूतत्वमनोन्यत्वाद्यभावमादायातिव्याप्तिवारणे तु दीधितिकृतां मनोन्यत्वाभावलेखनासंगतिः; तस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वाभावात्। न च साध्यतावच्छेदकव्याप्यप्रतियोगिताकयावदभावनिवेशे "वह्निमान् धूमादि"त्यादौ महानसीयवह्न्याद्यभावमादायाव्याप्तिवारणाय यथोक्तविशेषणस्यावश्यकतया तादृशाभावयोः न लक्षणघटकत्वानुपपत्तिरिति वाच्यम्। तथा सति "तादृशाभावयोः लक्षणघटकत्वादि"त्यनेन तादृशाभावद्वयस्य लक्षणघटकत्वसमर्थनासंगतेः। भूतत्वाभावस्य प्रागपि लक्षणघटकत्वात्। न च भूतत्वाभावस्य प्राक् लक्षणघटकत्वेऽपि मनोन्यत्वाभावस्यापि लक्षणघटकत्वार्थं तथाभिधानमिति वाच्यम्; अत एवेत्यादिना यावत्पदव्यावृत्त्यभिधाने यावदन्तर्गतभूतत्वाभावमादायैवातिव्याप्तिनिरासस्संभवे "वह्निमान् धूमादि"त्यादौ महानसीयवह्न्यभावमादायाव्याप्तिवारणाय यथोक्तविशेषणे मनोन्यत्वाभावस्य लक्षणघटकत्वं संपाद्य तादृशाभावमादायातिव्याप्तिवारणप्रयासस्य निष्फलतया तद्ग्रन्थस्य एतदर्थातात्पर्यकत्वादिति।

अत्राहुः—यथोक्तविशेषणविशेषितयावदभावघटितलक्षणे यावत्त्वानुपादाने वाच्यत्वाभावमादाय दत्ताया अतिव्याप्तेः वारणार्थं यावत्त्वनिवेशविद्वेषिणा यथोक्तविशेषणं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वमादृतम्. तत्र चोभयत्वावच्छिन्नसाध्यकेऽतिव्याप्तिरिति यावत्त्वनिवेशः। तथा च साध्यतावच्छेदकव्याप्यप्रतियोगिताकयावदभावान्तर्गतं भूतत्वाभावमादायैव नातिव्याप्तिः। एवं च मनोन्यत्वाभावलेखनं यथोक्तविशेषणप्रवेशस्य निर्बीजत्वेऽसंगतम् स्यादित्यतो महानसीयवह्न्याद्यभावमादायाव्याप्तिः प्रदर्शि-

ता। अथ यथोक्तविशेषणप्रवेशेऽपि भूतत्वाभावमादायोभयसाध्यकेऽतिव्याप्तिवारणसंभवात् मनोन्यत्वाभावलेखनासंगतिरित्याशंकापरिहाराय भूतत्वस्येत्यादिना तदभावस्य यथोक्तविशेषणशून्यत्वस्य संपादनीयत्वेन तत्संगतेरिति।

एवं च तादृशाभावयोरपि लक्षणघटकत्वादित्यस्य भूतत्वमनोन्यत्वाभावयोः साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभाव-यथोक्ताभावघटितलक्षणयोः क्रमेण लक्षणघटकत्वादित्यर्थः उक्तरीत्या साध्यतावच्छेदकव्याप्यप्रतियोगिताकयत्किञ्चिदभावनिवेशं कृत्वा यावत्पदासत्वे यथोक्तविशेषणसत्वे संदर्भविरोधं परिहरतां मतमाह—"केचित्वि"ति। साध्याभावं; साध्यमात्रप्रतियोगिताकाभावम्; तेन साध्यतदन्योभयाभावमादायातिव्याप्तेर्व्यभिचारिसामान्ये सत्वेऽपि न क्षतिः। लेखनसंक्षेपनिर्बंधिनां दीधितिकृतां निर्बीजलेखनप्रसंगोऽत्रास्वरसः। व्याप्यव्यापकभावापन्नोभयसाध्यके "वह्निधूमोभयवान् वह्ने"रित्यादौ द्वित्वावच्छिन्नाभावमादायातिव्याप्तिसंभवेऽपि परस्परव्यभिचारिभावापन्नोभयसाध्यकोत्कीर्तनं तत्र तदुभयत्रैवातिव्याप्तिसंभवः व्याप्यव्यापकभावापन्नोभयसाध्यक एकत्रैव [1]तत्संभव इति विशेषव्युत्पादनार्थम्। विशिष्टसत्तादिसाध्यके विशिष्टातिरिक्ततामते नातिव्याप्तिरिति तन्नोक्तम। विशिष्टातिरिक्ततावादिनामपि सर्वमप्युभयत्वं वैशिष्ट्यातिरिक्तमिति मतान्तरसत्वात् नातिव्याप्त्यसंगतिः। विरुद्धोभयरूपेण प्रमेयसामान्याभावमादायातिव्याप्तेर्यावत्पदम्। सामान्याभावीयान्यप्रतियोगितायाः प्रत्याश्रयभिन्नत्वेन वह्निधूमोभयाभावमादायातिव्याप्तेः तत्पदमिति केचित्।

"भूतत्वाभावे"ति। न च साध्यतावच्छेदकावच्छिन्नानुयोगिताकभेदघटितम् उभयत्वव्यापकत्वमक्षुण्णमेवेति वाच्यम्; "भूतत्वमूर्तत्वोभयवान् नित्यस्पर्शादि" त्यादौ, [2]भूतत्वाभावमूर्तत्वाभावयोरपि लक्षणघटक-

[1] तत्संभवादिति—अ.

[2] जन्यभूतत्वाभावजन्यमूर्तत्वाभावयोरपि—अ.

तया तद्विशिष्टहेत्वधिकरणाप्रसिद्धेस्तदनिवेशात्[1] । "अव्याप्त्यापत्त्या" । प्रमेयसाध्यके लक्षणगमनात् । "घटत्वाभाववान् मेयत्वादि"त्यादौ पूर्वं घटत्वाभावत्वघटावृत्तित्वावच्छिन्नभेदस्य प्रतियोगितावच्छेदकतादात्म्यसंबन्धेन हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यात् न दोषः । इदानीन्तु तस्य घटत्वादिरूपसाध्याभावस्य च दैशिकविशेषणतारूपसाध्यतावच्छेदक-संबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यादतिव्याप्तिरित्याह—"साध्यते"ति । "नास्माकमेव" । साध्यतावच्छेदकव्याप्य-प्रतियोगिताकयत्किञ्चिदभावनिवेशिनामप्यैतदतिव्याप्तिसत्वात् । यद्वा—यथाश्रुते दीधितिकृतामेव दोषः ; नास्माकम् ; स्वाभावत्वानवच्छिन्नप्रतियोगितानिवेशेन तदुद्धारसंभवादित्याशयः । यद्वा—दीधितौ वक्ष्यमाणेत्यर्थः । "रूपसामान्याभाववान् पृथिवीत्वादि"त्यादौ रूपाद्यात्मकसाध्याभावस्य स्वध्वंसादिरूपप्रतियोगिसामानाधिकरण्यात् ; तस्य सद्धेतुत्ववादिनामस्माक-मित्यर्थः । परंतु रूपादीति ग्रन्थावतारिकायामप्येतदभिधानात् पौनरुक्त्यं प्रयत्ननिर्वाह्यम् ; पूर्वत्र तु रूपसामान्याभावसाध्यकोपेक्षाबीजं दीधितौ दर्शितम् ; अन्याभावसाध्यकोपेक्षाबीजं तु अत्रेति न तदाशंकेति बोध्यम् ।

"पर्वतादावपी"ति । स्वविशिष्टहेत्वधिकरणेत्यादिघटितस्यापि लक्षणस्य दुरूपपादतालाभाय तदुक्तम्[2] । "व्यापकताया" इति । एतेन तस्या लक्षणघटकत्वे तद्घटकसंबन्धेन प्रतियोगिसामानाधिकरण्यस्य वाच्यतया भाव-रूपत्वं व्यर्थमिति सूचितम् । "भावरूपे"ति । न चैवमपि "धूमवान् धूम-कालीनवह्ने"रित्यादौ धूमाभावस्य कालिकसंबन्धेन तथात्वं "धूमवान् धूमवद्वह्ने"रित्यादौ धूमाभावस्य धूमाभाववद्भिन्नभेदतया धूमाभाववद्भिन्नहेतुरूपभाव-

[1] हेत्वधिकरणे समवायेन प्रतियोगिनो अवृत्तेः अप्रसिद्धेः—अ.

[2] "स्वाभावमादायैवातिव्याप्तिपरिशेषार्थम्" अधिकपाठः—अ.

सामानाधिकरण्यं च दुर्वारमिति वाच्यम् ; अयोगोलकान्यत्वाभावस्य तादृशप्रतियोग्यप्रसिद्धेः । यदि च तस्यापि अयोगोलकभिन्नभेदतया अयोगोलकभिन्नवह्न्यादिरूपभावसामानाधिकरण्यं दुर्वारं तदापि गगनाभावादेस्तादृशप्रतियोग्यधिकरणाप्रसिद्धिः । यदि च तस्यापि व्यधिकरणधर्मावच्छिन्नाभावतया घटादिरूपप्रतियोग्यधिकरणप्रसिद्धिर्मन्यते ? तदा "धूमवान् वह्ने"रित्यादावनतिप्रसंगादेव व्यभिचारिसामान्येऽतिप्रसंगनियमभङ्गो बोध्यः । साध्यतावच्छेदकसंबन्धेनेति च क्वचित् दृश्यते. धूमाभावादेः कालिकसंबन्धेन धूमवति सत्वात्, गोत्वाभावादेस्तत्सबन्धेन गोत्ववति सत्वाच्च तदावश्यकम्[1] ; घटत्वाभावादिसाधकव्यभिचारिवारणाय भावरूपत्वं चेति भाति । एकव्यक्तिसाध्यके लक्षणगमनादाह—"नाने"ति । व्याप्तिनिरूपकत्वरूपव्यापकत्वोपादानेऽनवस्थेत्यतः "साध्यते"ति । साध्यतावच्छेदकताघटकसंबन्धेन साध्यतावच्छेदकवत्वलाभाय साध्यपदम् । तेन वाच्यत्वाभावप्रतियोगिताया एव संबन्धसामान्येन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकत्वेऽपि नातिव्याप्तिः । "तस्य" । सत्ताव्यापकतावच्छेदकप्रतियोगिताकविशिष्टसत्ताभावस्य । "किञ्चिद्रूपम्" । साध्यतावच्छेदकमन्यद्वा । "वह्निमान् धूमादि"त्यादौ महानसीयवह्नित्वादिकिञ्चिद्रूपमुपादाय तद्वह्न्यभावस्य न प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वसंभवः । न चैवमपि महानसत्वाद्यभावमादायैवाव्याप्तिः । साध्यतावच्छेदकव्यापकत्वेन किञ्चिद्रूपनिवेशात् अतः सत्तावानिति । "अव्याप्तिरि"ति । "एतद्रूपवान् एतद्रसादि"त्यादौ लक्षणगमनात् ।

मास्तु साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वं, संबन्धसामान्येनैव तन्निवेशादित्याशयेन शंकते—"न चे"ति । प्रमानिष्ठा च प्रतियोगिता

[1] न्यायरत्ने साध्यतावच्छेदकसंबन्धेनेति पाठः प्रामादिकः इति—स्व.

विषयतासंबन्धावच्छिन्ना व्यधिकरणधर्मावच्छिन्ना; समवायादिसंबन्धावच्छिन्ना तु समानाधिकरणधर्मावच्छिन्नापि। जन्यप्रमायाः प्रतियोगिवैयधिकरण्याघटितव्यापकत्वासंभवात्; न च वाच्यत्वाभावस्य धूमवन्निरूपितविशेषणतादिसंबन्धेनातथात्वेन अतिप्रसंगोद्धारसंभवात् कुतः तदुपेक्षेति वाच्यम्; विषयतातिरिक्तस्थले विशेषरूपेण संसर्गतायाः शंकितुरसंमतत्वात्। "न त्वि"ति। विशेषरूपस्य क्वचिदपि अनुल्लेखात्। सामान्यरूपस्य अनुल्लेखेऽपि संसर्गाविषयकोच्छृंखलप्रकारविशेषविषयकत्व[1]वारणाय विशिष्टप्रतीतेः सामान्यरूपेण संसर्गावगाहितैवोपेयते; तावतैवोपपत्तौ विशेषरूपेण संसर्गतायां प्रमाणाभाव इत्यर्थः। न चैवं धर्मितावच्छेदकव्यापकताविशिष्टसंयोगत्वादिना प्रकारतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टसंयोगत्वादिना च संसर्गता व्याहन्येतेति वाच्यम्; प्रतियोग्यनुयोगिघटितरूपेण तद्व्यक्तित्वादिना च संसर्गता नोपेयते विषयतायाश्च विषयतान्तरघटितरूपेणेत्याद्यनुभवानुसारादिति। साध्यतावच्छेदकसंबन्धेनेत्यनुक्तौ व्यभिचारिमात्रे दोषोक्तावपि व्यापकताघटकयावत्संबन्धोपादानकल्पे साध्यतावच्छेदकसंबन्धनिवेशव्यावृत्त्याक्षेपस्थलं दर्शयति—"परन्त्वि"ति। "अतिव्याप्ती"ति। प्रतियोगिता यत्संबन्धेन व्यापकतावच्छेदिका तेनैव प्रतियोगिसामानाधिकरण्यमिति विषयतासंबन्धस्य व्यापकताघटकतया तेनैव तथात्वादतिव्याप्तीत्यर्थः। "न चे"ति। न चाभावप्रतियोगितायां संयोगसमवायाद्यवच्छिन्नत्वेऽप्यक्षतेः संबन्धसामान्यावच्छिन्नत्वोत्कीर्तनमसंगतमिति वाच्यम्; तस्य परित्याज्यत्वात्। साध्यतावच्छेदकसंबन्धेन साध्याधिकरणत्वानिवेशे प्रकारान्तरमवलंब्य "ज्ञानवान् द्रव्यत्वादि"त्यादौ अतिव्याप्तिं पूरयति "वस्तुतस्त्वि"ति। न च संबन्धत्वेन संबन्धानां

[1] विशेष्यविषयकत्व—अ.

प्रतियोगितावच्छेदकसंबन्धतानङ्गीकारेऽपि संबन्धसामान्येन साध्याधिकरणत्वप्रवेशे "धूमवान् वह्ने"रित्यादौ नातिव्याप्तिप्रसक्तिः साध्याधिकरणतायां संबन्धसामान्यावच्छिन्नत्वासंभवादिति वाच्यम् ; तादात्म्यसंबन्धेन साध्यतास्थलानुरोधेन साध्यसंबन्धित्वस्यैव निवेश्यतया प्रकारविधया संबन्धत्वेन संबन्धानां निवेशे बाधकाभावेन तदतिव्याप्तिसंगतेः ।

साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वं न निवेश्यं; किन्तु संबन्धसामान्येनैवेत्यत्रैव समाधानान्तरमाह—"वस्तुतस्त्वि"ति। अनुगतसंबन्धत्वं सांसर्गिकविषयताश्रयत्वम् । अन्यतमत्वमिति केचित् । साध्यसंबन्धानुयोगित्वेन न साध्याधिकरणं निविष्टं; किन्तु साध्येनैवरूपेण; एवं च साध्यस्याधिकरणेन साकं संबन्धत्वेन संबन्धानां संबन्धत्वं नैव संभवतीत्यर्थः । इदं च येन केनचित् संबन्धेन तद्वान्श्च प्रकृतो हेतुरिति दीधितौ स्फुटम् । "लाघवे"ति । तथा च साध्याधिकरणत्वेन रूपेण निवेशकल्पे तादात्म्यसंबन्धेन साध्यतास्थलानुरोधेन साध्यसंबन्धित्वेन निवेशस्यावश्यकतया तत्र संबन्धत्वेन निवेशवशेनोक्तशंका स्यात् लाघवात् साध्येन रूपेणाधिकरणस्य निवेशे च संबन्धत्वेन संसर्गताया अप्रामाणिकत्वादधिकरणांशे संबन्धत्व[1]विशिष्टेन साध्यस्य विशेषणत्वासंभवात् तादृशशंकैव नोदेतीति भावः ।

यत्तु धूमावयवेऽपि संयोगेन धूमान्तरस्य वृत्तौ जन्यमात्रस्यैव कालत्वानुपगमे साध्याधिकरणत्व[2]स्यैव प्रवेशे च "धूमवान् वह्ने"रित्यादौ नातिव्याप्तिप्रसक्तिरित्यवतारणं तन्न ; सकलधूमावयवे संयोगेन धूमसद्भावे मानाभावात् ।

"असंभव इति"। नित्यज्ञानभिन्नं जन्यज्ञानत्वादित्यादौ कालिकसंबन्धं विषयितासंबन्धं वा आदायाव्यप्त्यभावेऽपि किञ्चित्पदेन महा-

[1] विशिष्टत्वेन—अ.

[2] अधिकरणस्यैव—अ.

कालानुयोगिककालिकसंबन्धं द्रव्याभावं चादायाव्याप्तिरित्यसंभवाभिधानम्. "साध्यवदिति"। साध्यवदवृत्त्यभावप्रतियोगिप्रतियोगिकत्वेत्युक्तौ च प्रसिद्धानुमाने जलाद्यभावसंग्रहस्स्यात्. वह्निजलाद्यन्यतराभावस्य साध्यवदवृत्तित्वात्। "तादृशे"ति। न चैवमपि द्रव्यत्वनिष्ठप्रतियोगित्वघटत्वनिष्ठप्रतियोगित्वाभ्यां द्रव्यत्वाभावस्य साध्यवन्निष्ठतया तत्प्रतियोगितासमानाधिकरणमेवावच्छेदकं द्रव्यत्वनिष्ठप्रतियोगित्वमित्यसंभव इति वाच्यम्; समानाधिकरणवृत्त्यवच्छेदकत्वपर्याप्त्यनधिकरणत्वस्य वाच्यत्वात्। "विरूद्धे"ति। प्रमेयनिष्ठप्रतियोगित्वस्य केवलान्वयितया तेन रूपेणाभावासंभवादनवच्छेदकत्वम्. सामान्यरूपेण[1] विशेषाभावोपगमे तु तेन रूपेण गगनाभावसत्वादसंभवो बोध्यः।

"तदंश"इति। भेदत्वमखण्डोपाधिरिति न तादाम्यसंबन्धनिवेशप्रसंगः। जलत्वाभावप्रतियोगिताया द्रव्यत्वादौ केनापि संबन्धेनासत्वात् ज्ञानरूपव्यापकानुसरणम्। अत एवाग्रे एकव्यक्तिसाध्यकानुसरणम्। तत्र साध्यस्यापि व्यापकत्वात्। यत्किञ्चिद्विषयकत्वे व्यापकताभङ्ग इत्यतः "विश्वे"ति। क्रियामात्रस्य कालत्वनयेऽप्याह "तत्समानाधिकरणकर्मादा"विति। "लाघवमि"ति। साध्यव्यापकतावच्छेदकं यत् निरूपकतासंबन्धेन तद्वत्वनिवेशे प्रतियोगितात्वेनानिवेशेऽपि व्यापकतावच्छेदकघटकत्वेन बहुतरसंबन्धनिवेशे गौरवात्। संबन्धविशेषः-तादात्म्यादिः। संबन्धभेदेन व्यापकताया भिन्नत्वात् समवायेन साध्यव्यापकस्य संयोगादिर्वा। स्वप्रतियोगिताघटकसंबन्धेन व्यापकत्वानिवेशात् "कथंचिदि"ति। "कस्यचिदि"ति। साध्यव्यापकत्वस्य भेदादावपि सत्वात्। साध्यव्यापको यो यस्तदभावनिवेशेऽप्याह—"व्यधी"ति। तथा च "प्रतियोग्यवृत्तिश्चे"ति

[1] स्वसामानाधिकरण्यस्वाधिकरणवृत्त्यभावाप्रतियोगित्वोभयसंबन्धेन प्रतियोगिताविशिष्टधर्मावच्छिन्नप्रतियोगिताकाभावः सामान्यरूपेण विशेषाभावः—स्व.

ग्रन्थानवतारापत्तिः घटत्वेन साध्यव्यापकं नास्तीति प्रत्ययात् किञ्चिदवच्छिन्नप्रतियोगिताकत्वसंबन्धेन व्यापकविशेषिताभावनिवेशेऽप्याह—"एवमि"ति। यत्तुकारमते दूषणान्तरमाहेति केचित्। "शुद्धे"ति। ननु घटत्वोपलक्षितवद्भेदप्रतियोगितावच्छेदकतायाः शुद्धघटे पर्याप्तत्वात् कथं घटाभावस्य लक्षणघटकत्वम्? उपलक्षकान्तर्भावेण तस्या अपर्याप्तेर्वक्ष्यमाणत्वात् अत्र निरवच्छिन्नावच्छेदकताशून्यत्वमन्यथा द्रव्यत्वादेः पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकतयाऽव्यापकतापत्तेः। तथा च घटाभावस्य लक्षणघटकत्वापत्तिः घटनिष्ठसाध्यवद्भेदप्रतियोगितावच्छेदकतायाः सावच्छिन्नत्वादिति पाठान्तरम्। घटत्वविशिष्टवद्भेदप्रतियोगितावच्छेदकता निरवच्छिना सावच्छिन्ना चेति द्वैविध्यात् पर्याप्तिनिवेशोऽपि बोध्यः। प्रतियोगितायाः स्वरूपतो भानोपगमेन तथैवावच्छेदकत्वात् नास्माकं घटादिनिष्ठप्रतियोगिताया व्यापकतावच्छेदकत्वापत्तिरित्याशयः। न च प्रतियोगिताया स्वरूपतो भाने मानाभाव एव अनवच्छेदकत्वविशिष्टस्वप्रतियोगितात्वविशिष्टकत्वनिवेशात् न घटाभावस्य लक्षणघटकत्वमिति वाच्यम्; अग्रिमाविशेषोक्तिविरोधात्। तस्यास्स्वरूपतो भानेऽपि प्रतियोगितात्वविशिष्टे अनवच्छेदकत्वस्य दुर्वारत्वादिति। न च पर्याप्तिमनिवेश्यैवावच्छेदकतायां वैशिष्ट्याद्यनवच्छिन्नत्वं निवेश्यं; तावतैव घटाद्यभावस्य वारणसंभवादिति वाच्यम्; तथापि द्रव्यगुणोभयभेदवारणाय पर्याप्तिरावश्यकत्वात्। यद्यद्व्यक्तित्वेन तादृशभेदप्रतियोगितावच्छेदकत्वं तत्तद्व्यक्तिभेदकूटवत्प्रतियोगिताकत्वस्याभावविशेषणत्वे तु गुरुत्वेन तत्तद्व्यक्तित्वादिना घटत्वादेर्भेदप्रतियोगितानवच्छेदकतया न तदभाववारणसंभव इति।

ह्रदत्वात्मकाभावस्य प्रतियोगिसामानाधिकरण्यात् पर्वतत्वात्मकाभावानुसरणम्। "लक्षणघटकत्वापातादि"ति। न चैवमपि न क्षतिः

तस्य विशेषणतासंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकतया तेन संबन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वादिति वाच्यम्; "घटत्वाभाववान् मेयत्वादि"त्यादौ घटत्वरूपसाध्याभावस्य तथात्वेनातिव्याप्तेः। स्वाभावत्वानवच्छिन्नप्रतियोगितानिवेशे तु [1]पर्वतत्वात्मकाभावो दुर्वारः। न च समवायेन घटान्यत्वप्रकारकत्वविशिष्टप्रमाऽभावस्तद्वारकः; तस्य नित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात्। तादृशजन्ययत्किञ्चित्प्रमाऽभावश्च न प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताक इति. जगदीशेन प्रतियोगितायां व्याप्यवृत्तितानिरूपकत्वदानात् तदतिव्याप्त्युद्धारे तु पर्वतत्वाद्यात्मकाभावमादायातिव्याप्तिर्दुर्वारैवेति।

ननु जगदीशमते पर्वतत्वाभावाभावपर्वतत्वाभावप्रकारकप्रमाऽभावयोरैक्येन पर्वतत्वरूपाभावस्य स्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्संबन्धान्तर्गतविषयतासंबन्धेन किञ्चिद्विशिष्टस्वाभावादिरूपप्रतियोगिसामानाधिकरण्यासंभवादव्याप्तिरित्यभिप्रायोऽस्तु; मैवम्; पर्वतत्वरूपाभावस्य पर्वतभिन्नभेदात्मकतया विषयतासंबन्धेन पर्वतभिन्नरूपप्रतियोगिसमानाधिकरणत्वसंभवात्।

यत्तु पर्वतत्वाभावतत्प्रमयोरैक्योपगमेन विषयतासंबन्धस्य व्यापकताघटकत्वनिर्वाह इति। तत्तुच्छम्; संयोगस्य समवेतत्वेन व्याप्यवृत्तेरपि संयोगत्वेनाव्याप्यवृत्तित्ववत् पर्वतत्वाभावत्वेन व्याप्यवृत्तेरपि तत्प्रमात्वेनाव्याप्यवृत्तित्वात् नैयायिकमतेऽभावोच्छेदापत्त्या तदैक्यासंभवाच्च।

ननु जगदीशेन व्यधिकरणसंबन्धेन वाच्यत्वाद्यभावमादाय लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारानुपपत्तिमाशंक्य स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यव्यापकत्वं प्रतियोगिसामानाधिकरण्यम् अ-

[1] पर्वतत्वात्मकाभावमादाय दोष एव—अ.

भावपदलभ्यभावभिन्नत्वं च प्रवेश्य लक्षणस्य परिष्करणीयतया घटत्वाभावादि-साध्यके घटत्वाद्यात्मकाभाववारणेऽपि घटत्वादिना घटत्वाभावादेरभावस्य घटान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च किञ्चिद्विशिष्टस्वाभावरूपप्रति-योगिसामानाधिकरण्यादतिव्याप्तिवारणाय भावरूपप्रतियोगिसामानाधिकरण्यं वाच्यम्; एवं च ह्रदत्वाद्यात्मकाभाववारणाय भावभिन्नत्वस्यावश्यकतया कथं पर्वतत्वाद्यात्मकाभावमादाय दोषाभिधानमिति चेन्न; यतस्समनियता-भावानामैक्ये अनैक्येऽपि लक्षणद्वयस्योक्तत्वात्। तदैक्यपक्षे प्रथमलक्षणे पर्वतत्वह्रदत्वाद्यात्मकाभावानां पर्वतत्वाभावत्वादिना प्रमेयाद्यभावरूपतया प्रतियोगिसामानाधिकरण्यात् घटत्वात्मकाभावमादायातिव्याप्तेरवारकत्त्वाच्च भावरूपत्वभावभिन्नत्वयोर्वैयर्थ्यमेव। द्वितीयलक्षणे तेषां घटभिन्नत्वेन घट-ह्रदत्वाभावाद्यन्यतराभावरूपतया स्वप्रतियोगितावच्छेदकीभूतभाववृत्तिघट-भिन्नत्वावच्छिन्नसमानाधिकरणत्वात् भाववृत्तित्वभावभिन्नत्वयोर्वैयर्थ्यमेव। तदनैक्यपक्षे च वक्ष्यमाणरीत्या स्वयं द्वितीयलक्षणमात्रे तदुभयनिवेशस्य वक्तव्यत्वेऽपि एतन्मते तदुभयलक्षणेऽपि न तयोर्निवेशः तथा सति गगनाभावत्वादिना घटाभावं घटत्वादिना गगनाद्यभावाभावं च यावदन्त-र्गतमादायासंभवापत्तेः। न च समनियताभावभेदपक्ष एव प्रथमलक्षणम्; जलादित्यादिग्रन्थविरोधात्।

वस्तुतस्तु—अग्रे स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यव्यापकत्वा-दिनिवेशस्य निराकरणीयतया यावद्व्यापकताघटकसंबन्धेनैव प्रतियोगि-सामानाधिकरण्यस्य एतन्मतशेषे वक्तव्यतया घटत्वाभावादिसाध्यके साध्य-प्रमाभावमादायानतिप्रसंगात् भावरूपत्वभावभिन्नत्वयोर्वैयर्थ्यमेव।

केचित्तु स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताग्रहविरोधिता-नियामकसंबन्धेन हेतुसामानाधिकरण्यनिवेशेन ह्रदत्वाद्यात्मकाभाववारणात् भावभिन्नत्वं व्यर्थमेवेत्याहुः।

"सामानाधिकरण्ये"ति । न च द्रव्यत्वनिष्ठप्रतियोगित्वघटत्वनिष्ठप्रतियोगित्वाभ्यां द्रव्यत्वाद्यभावमादायासंभवः । पर्याप्तिव्याप्यवृत्तित्ववादिभिः[1] समानाधिकरणं सत् यदवच्छेदकं तदन्यत्वस्य वक्तुमशक्यत्वादिति वाच्यम् । प्रतियोगिविशेषणतापन्ननिष्ठविलक्षणावच्छेदकताया एव निवेश्यत्वात् । एतेन साध्यवद्वृत्तेः महानसीयवह्निवृत्तित्वविशिष्टप्रतियोगित्वावच्छिन्नवह्न्यभावादेः पूर्वक्षणवृत्तित्वविशिष्टप्रतियोगित्वावच्छिन्नद्रव्यत्वाभावादेश्चोपगमेऽव्याप्तिः अत एव मन्मते पर्याप्तिस्वीकार आवश्यक इत्यपास्तम् । तादृशावच्छेदकतायां निरवच्छिन्नत्वघटितवैलक्षण्याभावादेवादोषात् । एतदर्थमेव प्रत्यासत्तिपदमिति ।

अथवा प्रतियोगिताश्रयानुयोगिकावच्छेदकप्रतियोगिकसंबन्धः प्रत्यासत्त्यंतार्थः ; तथा च तत्संबन्धावच्छिन्नत्वम् अवच्छेदकताविशेषणम् वह्निप्रतियोगित्वेन घटाभावीयप्रतियोग्यनुयोगिकस्तादृशप्रतियोगिताप्रतियोगिको न स्वरूपसंबन्धोऽस्ति संबन्धे च निरवच्छिन्नैवावच्छेदकता तेन स्वरूपसंबन्धावच्छिन्नावच्छेदकत्वस्य वह्निप्रतियोगित्वे सत्वेऽपि प्रतियोगिवृत्तित्वविशिष्टतत्संबन्धावच्छिन्नत्वोक्तौ विशेषरूपेण संसर्गतापत्तावपि न क्षतिः ।

ननु सामानाधिकरण्येन अनवच्छेदकत्वघटितव्यापकतावच्छेदकत्वस्य दैशिकविशेषणतासंबन्धावच्छिन्नहेतुसामानाधिकरण्यस्य च निवेशेन पर्वतत्वाद्यात्मकाभावादिकमादाय सकलदोषवारणेऽपि घटत्वेन पर्वतत्वाभावाभावमादाय "वह्निमान् धूमादि"त्यादावव्याप्तिः दुर्वारैवेतिचेन्न ; समनियताभावैक्यमतेन व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्यसंभवेनानुपपत्त्यभावात् । "तद्धटभिन्नं घटत्वादि"त्यादौ तद्व्यक्तित्वरूपसाध्याभावस्य तद्धटभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च स्वरूप-

[1] पर्याप्तेः व्याप्यवृत्तित्वमिति जगदीशमतम्—स्व.

संबन्धेन वृत्तितयैव नातिव्याप्तिः। किन्तु हेतुसमानाधिकरणाभावे भावभिन्नत्वं निवेशयतो जगदीशस्य मते एव तत्रातिव्याप्तिरिति साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वरूपं भावभिन्नत्वं निवेशनीयमिति दिक्।

वस्तुतस्तु — व्यधिकरणधर्मावच्छिन्नपर्वतत्वाभावनिष्ठप्रतियोगित्वावच्छिन्नाभावस्यातिरिक्ततया तत्प्रतियोगिताया व्यापकतानवच्छेदकत्वात् न दोषः। तेनोक्तरीत्या पर्वतत्वात्मकाभावमादाय समनियताभावभेदपक्ष एव दोषस्य संगमनीयत्वेऽपि "तद्धटभिन्नं घटत्वादि"त्यादौ तद्धटभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य तद्वद्भिन्नभेदात्मकस्य तद्वद्भिन्नात्मकप्रतियोगिसमानाधिकरणतया अतिव्याप्तावपि च न क्षतिरिति।

"अव्याप्त्यापत्तेरि"ति। प्रतियोगितायां साध्यसमानाधिकरणवृत्तित्वनिवेशे तद्वह्न्यादिसाध्यके लक्षणगमनात्। कालपरिमाणद्वयं महाकालपरिमाणम्। न च प्रतियोगितावच्छेदकावच्छिन्नत्वस्याग्रे वक्तव्यतया महाकालान्यत्वविशिष्टघटाद्यभावमादाय तत्प्रसिद्धिरिति वाच्यम्। महाकाले तादृशघटाङ्गीकारपक्षे तदभिधानात्। विषयतासंबन्धस्य वृत्त्यनियामकत्वेऽपि साध्यप्रमाऽभावस्य लक्षणघटकत्वानुरोधेन प्रतियोग्यसंबन्धित्वस्य निवेशनीयतया तादात्म्येन गगनाद्यभावप्रतियोग्यसंबन्धित्वस्य काले प्रसिद्धेर्गगनस्य वृत्तिमत्वपक्षे इदम्।

वस्तुतस्तु — स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो यो धर्मस्तदन्यत्वरूपव्यापकतावच्छेदकत्वशरीरेऽव्यावर्तकघटत्वादिभेदानामनन्तानां निवेशे गौरवात तादृशी या या प्रतियोगिता तदन्यत्वमेव निवेश्यमिति तदप्रसिध्यभिधानसंगतिः। एवं च यादृशप्रतियोगिनेत्यादिना प्रतियोगितयोरैक्यनिवेशनमात्रं बोध्यम।

संबन्धसामान्येन प्रतियोग्यनधिकरणत्वं निरस्य साध्यतावच्छेदकसंबन्धेन तन्निरस्यति "काल इति"। गगनादेरपि सर्वत्वादिना वृत्ति-

मत्त्वमेव। "क्वापी"ति। "वह्निमान् धूमादि"त्यादौ साध्यसमानाधिकरणघटादिरूपाभावस्य दैशिकविशेषणतासंबन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया जलत्वाभावनिष्ठप्रतियोगितायास्तेन संबन्धेन व्यापकतावच्छेदकत्वं न स्यादित्यर्थः। नन्वेवं "सत्ताभाववान् जात्यभावात्" "जातिः घटत्वादि"त्यादौ संयोगादिसंबन्धानां व्यापकताघटकत्वासंभवात् अन्ततो दैशिकविशेषणतासंबन्धस्यैव तथात्वं वाच्यं, तच्च दुर्घटम्; जातित्वादिरूपाभावस्य किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वात्। न च संयोगादिसंबन्धेन वाच्यत्वाद्यधिकरणाप्रसिध्या वाच्यत्वनिष्ठप्रतियोगितैव साध्यव्यापकतावच्छेदिकेति वाच्यत्वाभावमादायैव लक्षणसंगतिरिति वाच्यम्; तेन संबन्धेन वृत्तिमन्निष्ठत्वस्याग्रे वक्तव्यतया तादृशप्रतियोगितावारणादित्यत आह—"सामान्यादी"ति। यद्यपि वाच्यत्वादिसाध्यके भावाभावाविलक्षणैव दैशिकविशेषणतेत्यव्याप्तिसत्वात् मात्रपदमनर्थकं; तथापि सामान्यादिमात्रवृत्तिसाध्यके संयोगादिसंबन्धानां साध्यासमानाधिकरणतया व्यापकत्वघटकतासंभावनापि नास्तीत्यावेदयितुं तत्पदम्। यद्वा यदि च भावानां स्वरूपसंबन्धात् अभावानां दैशिकविशेषणता अन्यैव; अन्यथा[1] वाच्यत्वादिसाध्यकेऽव्याप्तेः साध्यवति सर्वस्यैवाभावस्य किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिनः स्वरूपसंबन्धेन वृत्तेः; तथा च वाच्यत्वाभावमादायैवोपपत्तिरित्युच्यते; तदा सत्ताभावादिसाध्यके व्यभिचारिणि साध्यसमनियताखण्डाभावाप्रसिद्धेर्वाच्यत्वाद्यभावमादायातिव्याप्तिः। "जन्यं जन्यात्मान्यतरत्वादि"त्यादौ जन्यत्वस्य अखण्डोपाधित्वनये तदभावमादायैव नातिव्याप्तिः भावाभावविशेषणताभेदेन स्वाभावरूपप्रतियोगिसामानाधिकरण्यासंभवादिति मात्रपदोपादानमिति द्रष्टव्यम्। तादात्म्यं च न व्यापकताघटकमिति प्रमाभावानुसरणम्।

[1] उक्तरीत्येति अधिकपाठः—अ.

"समनियताभावैक्यमते" इति। नन्वेतन्मते प्रतियोगिवैयधिकरण्ये प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशे[1] व्यावृत्त्यसंगतिरेव तन्मते गोत्वाभावादीनामपि गोत्वत्वेन प्रमेयाभावाभिन्नतया प्रतियोगिसामानाधिकरण्यसंभवेन साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वस्यैव वैयर्थ्यात्। अनैक्याभिप्रायेण तद्दलं प्रवेश्य तदैक्याभिप्रायेण तद्घटकव्यावृत्तेरयुक्तत्वात्। मैवं; धूमवान् वह्नेरित्यादौ धूमाभावस्य धूमत्वेन प्रमेयसामान्याभावाभिन्नतया घटत्वादिना धूमाभावस्य घटत्वादिना वह्न्यभावाभिन्नतयाऽतिव्याप्तेः यत्समानाधिकरणा यद्यत्प्रतियोगिताका यावन्तोऽभावाः तत्तत्प्रतियोगिताश्रयेत्यादिरीत्या परिष्कृत्य व्यधिकरणधर्मावच्छिन्नगोत्वाभावादिप्रतियोगिताव्युदासाय ऐक्यपक्षेऽपि तद्दलोपादानात्; तत्पक्षे चाग्रे वीप्साया अपि विवक्षणात्। "समनियताभावैक्यमते" इति प्रतियोगितैकीकरणार्थम्; तेन प्रतियोगिताभेदाभावेन तन्मताप्रसरेऽपि न क्षतिः।

"निवेश" इति। इदं तु चिन्त्यं. प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वोक्तावपि घटाभावप्रतियोगितायाः केवलान्वयितया[2] घटाभावस्य लक्षणघटकत्वप्रसंगेनासंभवः तस्यापि यत्किञ्चित्प्रमेयरूपप्रतियोगिसामानाधिकरण्यमेवेति चेत्; उक्तयुक्त्या[3]ऽतिव्याप्तेर्दुर्वारत्वात्. न च अवृत्तिमात्रवृत्तीति ग्रन्थावतारणरीत्या तादृशप्रतियोगितानां घटादिमात्रवृत्तित्वं वदाम इति वाच्यम्; एवं सति घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वादित्युत्तरग्रन्थासंगतेः प्रतियोगिताश्रयनधिकरणत्वनिवेशेनैवोपपत्तौ प्रतियोगितावच्छेदकविशिष्टानुधावनस्याजागलस्तनायमानत्वाच्चेति। अत्र घटभिन्नत्वेन घटो नास्तीति प्रतीतिविषयप्रतियोगितावदनधिकरणत्वं साध्य-

[1] निवेशव्यावृत्त्यसंगतिरेव—अ.

[2] घटाभावप्रतियोगित्वेन अभावस्य व्यापकत्वाघटकत्वेन इत्यधिकपाठः—अ.

[3] तुल्ययुक्त्या—अ.

वतः प्रसिद्धमेवेति प्रतियोगितावच्छेदकविशिष्टोपादानवैयर्थ्यम् । न च जगदीशेन वह्नित्वेन घटाभावस्य या वह्नित्वेन घटनिष्ठा प्रतियोगिता सैव वह्नित्वेन वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्नवह्निधूमादिनिष्ठा लाघवात् इति चक्रवर्त्तिलक्षणे कण्ठत एव व्यधिकरणधर्मावच्छिन्न-प्रतियोगितैकीकरणात् घटभिन्नत्वावच्छिन्नप्रतियोगिताया वह्निधूमादिसाधा-रण्या[1]सिद्धेः गदाधरेण समानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितायाः प्रमे-यमात्रवृत्तित्वोपगमादप्रसिद्धिसंगतिरिति वाच्यम्; प्रतियोगिव्यक्तीनां भेदेऽपि एकधर्मावच्छिन्नप्रतियोगिताया लाघवेनैक्यमिति नियमनिराकरणार्थं वह्नित्वेन घटाभावादेः वह्नित्वेन प्रमेयसामान्याभावरूपत्वं जगदीशेन दर्शितम्. एतन्मते वह्निर्नास्तीति प्रत्ययविषयीभूताभावप्रतियोगिताया वह्निमात्रनिष्ठत्वं विना-ऽगतेः । न चैतन्मते वह्निसामान्याभावप्रतियोगितापि प्रमेयमात्रनिष्ठैव; परंतु प्रतियोगिविशेषणभेदादेव प्रतीतिविशेषः वह्निर्नास्तीत्यादौ वह्नित्वस्यैव प्रति-योगिविशेषणत्वात्; वह्नित्वेन घटो नास्तीत्यादौ तु घटत्वादेरिति वाच्यम्; समानाधिकरणधर्मावच्छिन्नाभावयोरविलक्षणत्वापत्तेः । यदि च जगदीश-ग्रंथे वह्निपदं संपातायातम्; एवं च वह्नित्वावच्छिन्नवह्निभिन्ननिष्ठप्रतियोगि-ताको व्यधिकरणधर्मावच्छिन्नाभाव इत्युच्यते; तदा वह्निभिन्नवान् घटादि-त्यादौ वह्निभिन्नत्वेन वह्न्यभावमादाय सामानाधिकरण्येनेत्युपादानसार्थक्य-संभवात् जगदीशग्रन्थो संगतः स्यात्; तथा चैतन्मते कथमप्रसिद्धिसंगतिः ? । व्याप्यवृत्तित्वघटितचक्रवर्त्तिलक्षणत्यागावसरे च वह्नित्वेन वह्निधूमोभयाभावं वह्नित्वेन पर्वतावृत्त्यभावं च प्रदर्शयतो जगदीशस्य तयोर्वह्नित्वेन प्रमेय-सामान्याभावानात्मकत्वमभिप्रेतम्; अन्यथा हेतुसामानाधिकरण्यानुपपत्तेः; तदनुसारिणा च गदाधरेण समानाधिकरणधर्मावच्छिन्नप्रतियोगिताया एव

[1] साधारण्यसिद्धेः—अ.

विशेषनिष्ठत्वं निराकृतम् । एवं चैतन्मतेऽपि अप्रसिद्धिरसंगतैवेति ; तस्मादेकधर्मावच्छिन्नप्रतियोगिता एकेति नियमम् विहाय समनियताभावानां भेदमते वक्तव्यः साध्याभावादिप्रतियोगित्वेन घटाभावादिकमादाय दोषो अत्रापीति तद्वारकं विशिष्टान्तं बोध्यम् ।

व्यधिकरणीभूतैकधर्मावच्छिन्नसजातीयप्रतियोगितैकेति पक्षे साध्याभावप्रतियोगित्वेन जलेन्धनाद्यभावप्रतियोगितयोरैक्यात् व्यापकतावच्छेदकत्वोपपत्त्या विशिष्टान्तवैयर्थ्यमिति तद्भेदपक्षे सार्थकयति. "साध्यवदवृत्ती"ति । विशिष्टपदं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकत्वलाभाय ; तेन न वह्न्यभावप्रतियोगिमहानसीयवह्निमद्भेदमादायाव्याप्तिः वह्न्यभावप्रतियोगित्वेन घटवद्भेदसत्वे तु भेदप्रतियोगितावच्छेदकत्वं प्रतियोगितावच्छेदकवद्वृत्तित्वेन विशेषणीयम् न तु प्रतियोगिवृत्तित्वेन ; सामानाधिकरण्यनिवेशेन लाघवाभिधानविरोधात् । "यावदि"ति । स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशपक्षस्याग्रे निराकर्तव्यतया "नित्यज्ञानं नित्यसविषयकत्वादि"त्यादावतिव्याप्तिवारणायेदम् । "न च संयोगादिने"ति । यद्यपि समवायेन द्रव्यत्वाभावमादायापि उक्तलक्षणदोषः संभवति ; तथापि प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्योक्तावपि दोषलाभार्थमिदम् . प्रतियोगितावच्छेदकसंबन्धेन व्यापकतापक्षे वा.

आहुरित्यस्वरससूचनाय. स च साध्यव्यापकत्वे प्रतियोगिवैयधिकरण्यं न निवेश्यम् ; न चैवमुक्तरीत्या स्वरूपसंबन्धेन साध्यवद्वृत्तित्वस्यावश्यं निवेशनीयतया पर्वतत्वात्मकाभावसंग्रहापत्तिरिति वाच्यम् । प्रतियोगितावच्छेदकभेदेनाभावभेदोपगमात पर्वतत्वाभावनिष्ठप्रतियोगित्वावच्छिन्नाभावस्य पर्वतत्वानात्मकस्य स्वरूपसंबन्धेनैव साध्यद्वृत्तित्वात् । न चैवं पर्वत-

त्वाभावत्वावच्छिन्नाभावस्य पर्वतत्वात्मनः स्वरूपसंबन्धेन साध्यवद्वृत्तित्वात्[1] द्वितीयलक्षणघटकत्वापत्तिरिति वाच्यम्; तत्र ह्रदत्वरूपाभाववारणार्थं लक्षणघटकाभावे भावभिन्नत्वस्य निवेशनीयत्वात्। एवं सति पर्वतत्वाभावत्वेन घटाद्यभावस्यावारणात् तत्राव्याप्तिः दुर्वारैवेति चेन्न; वक्ष्यमाणप्रकारस्यानुसर्त्तव्यत्वात्।

वस्तुतस्तु द्वितीयलक्षणे साध्यवद्वृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वं न निविष्टमित्यग्रे व्यक्तम्। एवं च पर्वतत्वाभावत्वं साध्यव्यापकतावच्छेदकमेव न भवतीति।

ननु व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यमनिवेश्य सामानाधिकरण्येन अनवच्छेदकत्वनिवेशेऽपि संबन्धसामान्येन साध्यवन्निष्ठत्वनिवेशस्योक्तदोषग्रस्ततया स्वरूपसंबन्धेन व्यापकताघटकीभूतस्वप्रतियोगिताश्रयवत्ताग्रहविरोधितानियामकसंबन्धेन वा तन्निवेशात् कपिसंयोगात्मकाभावसंग्रहोऽस्त्विति चेन्न[2]; तथापि[3] घटाद्यभावस्य लक्षणघटकत्वापत्त्यैतद्व्याप-[4]कताया अनिवेशात्।

"फलत"इति। न च सामान्यपदानुपादाने घटादेः साध्यव्यापकतावारणात् यत्किञ्चित्वं व्यर्थमिति वाच्यम्. सत्तावान् जातेरित्यादौ द्रव्यत्वादेः साध्यव्यापकतावारणार्थत्वात्। यद्यपि घटत्वावच्छिन्नवह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नमहानसीयादिवह्नेस्तादृशासंबद्धत्वेऽपि न क्षतिः साध्यव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना एकव्यक्तिकद्रव्यत्वाद्यभावमादाय लक्षणसंगतेरिति सामान्यपदं व्यर्थम्; तथापि गवाद्यभावस्येति

[1] साध्यवदवृत्तित्वात्—अ.

[2] अतः—इति पाठः। चेन्न इति नास्ति—अ.

[3] "तथापि" नास्ति—अ.

[4] व्यापकतानिवेशं निराकरोति वस्तुतस्तु इति अनिवेशादिति नास्ति—अ.

लेखनसंगमनाय निवेशनीयभेदकूटसंकोचाय च तदुपादानम्; अन्यथा गोनिष्ठप्रतियोगित्वावच्छिन्नतत्तत्गवादेस्तादृशासंबद्धत्वेनानुपपत्तेः ।

वस्तुतस्तु सामान्यपदोपादाने न निर्भरः । तथा सति वह्न्यादेः साध्यवति स्वरूपादिसंबन्धेनासंबद्धत्वात् तमुपेक्ष्याग्रे द्रव्यत्वाद्यनुधावनवैफल्यात् । तत्गोसाध्यकस्थलानुरोधेन तत्गवाभावपरतया तत्संगमनेऽपि मनोन्यत्वाभावप्रदर्शनानुरोधेन असंबद्धत्वशरीरे चेत्यादिलेखनेऽपि साध्यतावच्छेदकसंबन्धेन असंबद्धत्वोक्तौ कपिसंयोगात्मकाभावे लक्षणघटकतानिर्वाहात् । तत्पक्षे द्रव्यत्वाद्यभावस्य लक्षणाघटकतया अनायत्या वह्न्यभावादेर्लक्षणघटकत्वार्थं सामान्यपदोपादानम् । द्रव्यत्वादिनिष्ठप्रतियोगित्वं चेति पङ्क्तौ स्वरूपादिसंबन्धेनेत्यनुक्त्वा संयोगादिसंबन्धेनेत्युक्तेः साध्यतावच्छेदकसंबन्धघटितव्यापकत्वनिवेशपक्षस्यापि लाभात् । एतत्पक्षे भूतत्वाभावस्यैव लक्षणघटकता; पक्षांतरे तु मनोन्यत्वाभावस्यापीति विशेषः । परंतु घटवान् महाकालत्वादित्यादौ महाकालमात्रवृत्तिविशेषणतासंबन्धेन सर्वत्वविशिष्टस्य कालिकसंबन्धेन वा साध्यत्वे गगनादेर्वृत्तिमत्त्वपक्षे समवायेन द्रव्यत्वादेर्व्यापकतार्थं साध्यतावच्छेदकसंबन्धघटितव्यापकत्वं नोक्तमिति तु ज्यायः ।

"अनायासेनैव"। प्रतियोगिवैयधिकरण्याद्यनिवेशेनैव। दिगर्थस्तु—स्वविशिष्टाधिकरणतानिवेशे प्रयोजनाभावेन "नित्यज्ञानं नित्यसविषयकत्वादि"त्यादौ नित्यज्ञानान्यत्वविशिष्टघटादेः न विषयितासंबन्धेन साध्यवदसंबद्धत्वसंभवः; विशिष्टानतिरिक्तत्वात् इति समवायस्यैव व्यापकताघटकत्वात् येन येनेति वक्ष्यमाणवीप्सा अनावश्यकी । न चेदं "मनोऽणुत्वादि"त्यादौ मनस्त्वाभावप्रतियोगिनः दिक्कृतविशेषणतासंबन्धेन साध्यव्यापकत्वात् तस्योक्तसंबन्धेन प्रतियोगिसामानाधिकरण्यात् अतिव्याप्तिरतो वीप्सेति वाच्यम्; तादृशविशेषणतायां मानाभावात् । साध्यप्रकारक-

प्रमाभावस्यातिव्याप्तिवारकत्वाच्च । मनोभिन्नत्वविशिष्टघटाभावप्रतियोगिनस्तादृशविशेषणतासंबन्धेन साध्यवद्वृत्तित्वात् । स्वरूपसंबन्धेन गगनादेरवृत्तित्वमते असंबद्धत्वनिर्वाहकसंबन्धेन वृत्तिमत्त्वेन स्वविशिष्टस्य विशेषणीयत्वात् । एतेन "स्पन्द एतत्स्पन्दो वा महाकालत्वादि"त्यादौ महाकालान्यत्वाभावस्य कालिकसंबन्धेन निरुक्तव्यापकतावच्छेदकप्रतियोगिताकतया अतिव्याप्तिवारणाय वीप्सेति प्रत्युक्तम् । एतत्स्पन्दकालीनसाध्यप्रमाभावस्य लक्षणघटकत्वात् । तद्ध्वंसादिकालीनसाध्यप्रमायाश्च कालिकविशेषणतासंबन्धेन यत्किञ्चित्साध्यवदवृत्तित्वात् । अत्र "द्रव्यं पृथिवीत्वादि"त्यादौ घटत्वेन द्रव्यत्वाभावादेः प्रतियोगिनो द्रव्यत्वस्य कालिकसंबन्धेनापि व्यापकता संभवति नित्यद्रव्ये कालिकसंबन्धाप्रसिद्धेः जन्यद्रव्ये तत्संबन्धेन तस्य सत्वादित्यपि न शंक्यम्; वीप्साविरहेण समवायमादायैव लक्षणसमन्वयात् । यदि च तद्व्यक्तित्वेन घटादिभेदवत्ताज्ञानं सामान्यलक्षणाजन्यतत्घटाद्यविषयकं पक्षः इतरभेदः साध्यः नित्यसविषयकत्वं हेतुः तत्र साध्यवति विषयितासंबन्धेन असंबद्धतद्घटादिकमादाय साध्यव्यभिचारनिरूपकाधिकरणान्यत्वादीनां[1] व्यापकतया तदाभावस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तथात्वादित्यतिव्याप्तिरिति वीप्साया आवश्यकतयोक्तस्थले कालिकसंबन्धमादायाव्याप्तिर्दुर्वारैवेत्युच्यते; तदा वीप्सामुपगम्य यत्संबन्धसामान्ये साध्यवत्यत्किञ्चिद्व्यक्त्यनुयोगिकत्व-यद्विशिष्टप्रतियोगिकत्वोभयाभावस्तदन्यत्वं तद्वाच्यमिति दिक् । एवं व्यापकतावच्छेदकताघटकत्वेनाभिमतो यः संबन्धस्तेन संबन्धेन स्वविशिष्टत्वं प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिताश्रयत्वं च निवेश्यम्; अन्यथा कालिकसंबन्धेन स्वविशिष्टस्य साध्यस्य व्यापकताघटकसंबन्धेन संबद्धतया साध्वदसंबद्धस्वविशिष्टसामान्यकाप्रसिद्धेः । कालिकसंबन्धेन धूम-

[1] "पक्षनिष्ठतद्व्यक्तित्वसाध्यप्रकारकप्रमादिग्रहार्थम्"—अ.

निष्ठप्रतियोगिताविशिष्टवह्न्यादिकम् अयोगोलकभेदनिष्ठप्रतियोगिताविशिष्ट-ध्वंसादिकमादायातिव्याप्तेश्च । [" [1]साध्यवत्यत्किञ्चिद्वृत्त्यसंबद्धत्वमिति" यत्किञ्चित्त्वं, तत्कूटनिवेशार्थं ;] यत्किञ्चित्पर्वतासंबद्धत्वस्य पर्वतीयवह्न्याद्यभावप्रतियोगित्ववति असत्त्वेन तदभावमादायाव्याप्तेः ; [2]एवं च साध्यवद्वृत्तिरुभयावृत्तिर्यो धर्मः तद्वत्संबद्धत्वसामान्याभावपर्यन्तनिवेशो व्यर्थः अननुगमतादवस्थ्यात् ; साध्यवद्वृत्त्युभयावृत्तिधर्मत्वेनानुगतरूपेण तु न निवेशसंभवः ; साध्यवदसंबद्धत्वकल्पोक्तदोषात् ।

हेतौ तृतीयार्थान्वयबाधादुक्तं "व्याप्यते"ति । इदानीमुत्तरदलप्रविष्टहेतुमत्ताया अनिवेशादाह "हेत्वि"ति । "यादृशपरमाणावि"ति । यदि च तादृशचरमक्रियाकालीनः सकलपरमाणुधूमद्व्[3]यणुकसंयोगसंभवो मन्यते ; अत एव चरमध्वंसात्मकाभावो न दोषवारकः ; तदा धूमासंयोगिघटादिपरमाणुनिष्ठक्रियाविशेषात्मकोऽभावो बोध्यः । "हेतुसंबन्धितये"ति । प्रभामण्डलादौ व्यभिचारवारकहेतता[4]वच्छेदकरूपावच्छिन्नहेतुसंबन्धितये-त्यर्थः । एतेन महाकालान्यत्वाभावोऽपि निराकृतः ; महाकालस्य वह्निसंबन्धितया तदन्यत्वस्य वह्न्यव्यापकत्वात् ; तेन रूपेणासंबद्धित्वेऽप्याह "कालस्ये"ति । "सुवचत्वादि"ति । धूमादेर्वृत्तिनियामकसंबन्धप्रसिध्या तेन तस्य कालवृत्तित्वे बाधकाभावात् । वृत्त्यनियाकत्वतदभावयोरेकत्र प्रसंगभयेन कालधूमसंयोगस्य वृत्त्यनियामकत्वेऽप्याह—"वह्निमानि"ति । स्फुटतरेत्युपादानात् प्रयोजनगवेषणेऽनायासः सूचितः । विषयतासंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वप्रकारकयत्किञ्चित्प्रमा-

[1] एतत्चिन्हान्तर्गतपाठस्थाने "यद्यत्त्वमिति कूटनिवेशार्थम् ; अन्यथा"—अ.

[2] "एवं च" नास्ति—अ.

[3] "त्र्यणुक"—अ.

[4] हेतुतावच्छेदकसंबन्धरूपावच्छिन्नेति—अ.

भावस्य प्रतियोग्यसमानकालीनखण्डकालेऽतथात्वादुक्तं "महे"ति। पूर्वक्षणावच्छेदेन कार्यसमानाधिकरणाभावाप्रतियोगित्वरूपकारणत्वसंभवादाह— "कारणत्वादी"ति। आदिना परमार्थसत्त्वपरिग्रहः। अवृत्तित्वप्रवादानुरोधेनाह—"नित्येति। परमार्थसत्त्वं च प्रमेयत्वं; न तु कालिकसंबन्धावच्छिन्नाधारताकत्वं; कादिमति चाप्रसिद्धमेव; अष्टद्रव्यान्यत्वं खवत्वादिना साधनीयं तेन गगनवत्ताज्ञानस्य भ्रमत्वेऽपि न क्षतिः; उक्तरीत्या कालान्यत्वप्रकारकयत्किञ्चित्प्रमाभावमादायानतिप्रसंगात् उक्तं महेति। ज्ञानभेदप्रकारकयत्किञ्चित्प्रमाभावस्य प्रतियोग्यसमानकालीनतदविषयकज्ञानेऽतथात्वादुक्त"मीश्वरे"ति। "वृत्तिमतामेवे"ति। महाकालभेदादीनामित्यर्थः। अवृत्तीनां व्यापकत्वासंभवं वक्तुमेवकारः। न तु यावतां वृत्तिमतां व्यापकत्वं वक्तुम्।

"धूमवान् वह्ने"रित्यादौ अयःपिण्डान्यत्वाभावस्य स्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि पर्वतादेः कालोपाधित्वानुपगमे कालिकसंबन्धस्य व्यापकत्वाघटकतया प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकधूमाभावस्य तादृशसंयोगेन धूमवत्त्वप्रकारकप्रमाविषयत्वात्यन्ताभावस्य वा तथात्वात् नातिव्याप्तिः। यदि च तत्रापि स्वाभावसामानाधिकरण्यमादाय वीप्साप्रयोजनमुच्यते; तदा या या प्रतियोगितेति कल्पे स्वाभावत्वानवच्छिन्नप्रतियोग्युपादाने वा नातिव्याप्तिरित्यत आह—"इदं नित्यज्ञानमि"ति। "विषयितासंबन्धेने"ति। यद्यपि येन संबन्धेन साध्यव्यापकतावच्छेदकत्वं तेन संबन्धेन प्रतियोगिताश्रयो वाच्यः; अन्यथा कालिकसंबन्धेन धूमाद्यभावप्रतियोगितायाः वह्नौ सत्वादतिव्याप्तेः। तथा च साध्यवति नित्यज्ञानान्यत्वविशिष्टघटाभावसत्वेऽपि तादृशघटत्वस्य समवायेनैव प्रतियोगितावच्छेदकत्वात् तेन संबन्धेन प्रतियोगिताश्रयाप्रसिद्धिः[1]। तादृश-

[1] श्रयप्रसिद्धिः—अ.

प्रतियोगित्वावच्छिन्नाभावस्य तु साध्यवदवृत्तित्वमेवेति; तथापि नित्यज्ञानान्यत्वविशिष्टवाच्यत्वाद्यभावो बोध्यः ।

यत्तु नित्यज्ञाने नित्यज्ञानान्यत्वविशिष्टघटादिसत्त्वमते साध्यसमानाधिकरणाभावप्रतियोगितासामान्ये यत्सामानाधिकरण्ययदवच्छिन्नत्वयत्संबन्धावच्छिन्नत्वैतत्रितयाभावस्तत्त्वमेव साध्यव्यापकतावच्छेदकत्वमिति; तन्न; विनापीदृशविवक्षां नित्यज्ञानत्वादिसाध्यकसद्धेतौ वाच्यत्वाद्यभावमादाय लक्षणगमनसंभवेनैतद्विवक्षायाः निर्बीजत्वात् ।

केचित्तुः—नित्यज्ञानान्यत्वस्वनिष्ठतद्व्यक्तित्वोभयविषयकं जन्यज्ञानं पक्षः तद्व्यक्तित्वं साध्यं तद्व्यक्तिनित्यज्ञानान्यतरत्वं हेतुस्तत्र अतिव्याप्तिः; विषयितासंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकयोस्तद्व्यक्तित्वाभावनित्यज्ञानान्यत्वाभावयोर्विषयितासंबन्धेन प्रतियोगिसमानाधिकरणत्वादिति येन येनेति वीप्सा आवश्यकी । तद्व्यक्तित्वस्य; तन्निष्ठासाधारणधर्मरूपत्वे तद्व्यक्तेस्तादात्म्येनैव साध्यव्यापकत्वात् तद्भेदमादायातिव्याप्त्यसंगत्यापत्तिरतः स्वनिष्ठत्वोपादानम् । नित्यज्ञाननिष्ठप्रतियोगिताकभेदत्वेन पक्षे प्रवेशः; तेन घटनित्यज्ञानान्यतरभेदादेः साध्यव्यापकत्वेऽपि न तदसंगतिः । पक्षोत्पत्तिकालोत्पत्तिकपक्षज्ञानविरहस्थले इदम्; तेन तादृशज्ञानस्य साध्यव्यापकत्वेऽपि न तदापत्तिः । अतादृशज्ञानस्य च न विषयितासंबन्धेन प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकता; तादृशज्ञानविषयत्वं वा अव्याप्यवृत्ति; अन्यथा स्वरूपसंबन्धेन स्वाभावरूपप्रतियोगिसमानाधिकरणमेवेति दिगित्याहुः ।

इदं तु चिन्त्यं; साध्यवन्निष्ठाभावप्रतियोगितासमानाधिकरणं सत् यदवच्छेदकं प्रतियोगित्वं तदन्यत्वमेव साध्यव्यापकतावच्छेदकत्वम्; तथा चोक्तस्थले नित्यज्ञानान्यत्वविशिष्टघटाभावस्य साध्यवति सत्वेऽपि तत्प्रतियोगिताविशिष्टाभावासत्वेनातिव्याप्तेरेवासत्वात्[1] वीप्सा व्यर्थैवेति ।

[1]ईश्वरज्ञानस्वत्वविशिष्टघटाद्यधिकरणत्वं विषयितासंबन्धेन साध्यवत्सबद्धमेवेत्यभिप्रायः—अ.

तत्क्रिया पक्षः तद्व्यक्तित्वं साध्यं तत्क्रियातत्समानकालीनक्रियान्तरान्यतरत्वं हेतुः तत्र येषां संबन्धान्तरेण व्यापकत्वं तेषां कालिकसंबन्धेन व्यापकत्वस्य तदभावे प्रतियोगिसामानाधिकरण्यस्य च सत्वात् येन येनेति वीप्सा ; पक्षसाध्यादिप्रमायाश्च नियमतो व्यभिचारनिरूपकाधिकरणविषयकत्वे तदसत्वस्थले वा इदमित्यपि केचित् ।

इदं तु बोध्यम् ; प्रतियोगिसामानाधिकरण्ये प्रतियोगिपदार्थ एव लक्षणघटकः ; स च स्वरूपसंबन्धेन प्रतियोगितावान् । एवं च धूमाभावादेः कालिकसंबन्धेन प्रतियोगिताश्रयवह्नेरयोगोलकान्यत्वाभावस्य स्वप्रतियोगिताश्रयध्वंसादेः सामानाधिकरण्येऽपि नातिव्याप्तिः । एवं च स्वरूपसंबन्धेन साध्यव्यापकतावच्छेदकत्वं प्रवेश्यम् ; तेन जलत्वाभावप्रतियोगितायाः कालिकसंबन्धेन वह्निव्यापकतावच्छेदकत्वेऽपि न दोषः ; एवं च व्यापकतावच्छेदकताघटकसंबन्धेन प्रतियोगिताश्रयविवक्षाऽनादेयेति ।

" स्वाभावे "ति । प्रतियोगिवैयधिकरण्यघटितव्यापकतानिवेश इदम् । अन्यथा पुनर्गौरवम् ; अत एवानुपदं वक्ष्यति " एकधैवे "ति । न च समवायादिसंबन्धावच्छिन्नयादृशप्रतियोगिताश्रयानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकं स्वाभावनिष्ठप्रतियोगित्वमिति समवायादिना प्रतियोग्यसामानाधिकरण्यात् कथं नासंभव इति वाच्यम् ; तेन संबन्धेन वृत्तिमन्निष्ठत्वाभावेनादोषात् ।

अत्र च वीप्साघटितव्यापकत्वस्योद्देश्यदले निवेश एव गौरवम् ; प्रतियोगिवैयधिकरण्या[1]घटितव्यापकत्वस्य विधेयदल निवेशे लाघवादित्यालोच्य द्वेधा तन्निवेशत्यागे दीधितितात्पर्यमाह—" एकधैवे "ति । समनियताभावैक्यमते तस्य घटत्वादिना वह्न्याद्यभावरूपत्वेनादोषादाह:—" घटे "ति ।

[1] रण्यघटित—अ.

कालत्वं; महाकालत्वम्; अन्यथा प्रलयेऽतथात्वेनातिव्याप्त्यसंगतेः। "महाकालान्यत्वाभावे"ति। संयोगेन साध्यतायामुत्पत्तिकालावच्छेदन वह्न्याद्यभावस्य साध्यवद्वृत्तित्वात् साध्यतावच्छेदकसंयोगसंबन्धेन साध्यव्यापकतावच्छेदकत्वसंपत्तये[1] प्रतियोगिवैयधिकरण्यं प्रवेश्यम्; न चैवं सर्ववान् महाकालत्वादित्यादावव्याप्तिरिति वाच्यम्; प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदघटितं प्रतियोगिवैयधिकरण्यं प्रवेश्य तादृशप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वयादृशप्रतियोगित्वावच्छिन्नत्वैतदुभयाभावनिवेशात्; तथा च साध्यवति महाकालावच्छेदेन कालिकसंबन्धावच्छिन्नमहाकालान्यत्वाभावसत्त्वेऽपि न क्षतिः। "भावरूपे"ति। अस्य कालिकसंबन्धेन हेतुमद्वृत्तित्वं बोध्यम्; भावभिन्नत्वनिवेशे[2] घटत्वादिना घटत्वाभावाभावमादाय भावत्वसत्त्वेऽव्याप्तिः; तदसत्त्वेऽतिव्याप्तिः। एवं भावप्रतियोगिकत्वनिवेशात् घटत्वाभावप्रमाविषयत्वाभावमादाय न दोष इत्यपि भावत्वानुपादानेऽतिव्याप्तं; तदुपादाने च गौरवम्; मनोन्यत्वाभावलेखनासंगतिश्च; साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वनिवेशेऽपि तथा; घटत्वाद्यात्मकाभावावारणात्[3]। सर्वकल्पे तद्रूपान्यत्वविशिष्टसमवेतवान् जातेरित्यादौ अतिव्याप्तिः। "एवमि"ति। सर्वत्रेत्यस्य सर्वाधिकरणावच्छेदेनेत्यर्थे स्वरूपसंबन्धेन साध्यतायां सर्वत्रेत्यर्थे च घटवृत्तित्वविशिष्टसाध्यक एवातिव्याप्तिः; न तु व्यभिचारिणि अवच्छेदकावच्छेदेन। न च तत्तथैवेति वाच्यम्; धूमवान् वह्नेरित्यादौ गुणत्वादिना द्रव्याभावमादायातिव्याप्तेः सत्वात् तदकथनेन न्यूनताया प्रसांक्षीदिति सकलव्यभिचारिण्येकाभावनिबन्ध इति तत्रापि तद्ग्रन्थविरोधसूचनाय

[1] साध्यव्यापकत्वसंपत्त्रये—अ.
[2] भिन्नत्वानिवेशे—अ.
[3] अभाववारणात्—अ.

धूमवानित्युक्तम्; तद्रूपान्यत्वविशिष्टसत्तादेः साध्यत्वे जात्यादिहेतावतिव्याप्तिर्न द्वितीयलक्षणे ग्रन्थविरोधस्तु तत्साधारण इत्ययमेवोक्तः।

"उक्ते"ति। घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वाभावप्रमाविषयत्वाभावस्य विशेषणतासंबन्धेन स्वाभावरूपप्रतियोगिसामानाधिकरण्यात्; विषयित्वीयत्वं च विशेषरूपमित्यतिव्याप्तिरित्यर्थः; अत्र सकलव्यभिचारिण्यतिव्याप्तिर्बोध्या। आत्मत्ववत्ताप्रकारकप्रमाविषयत्वाभावमादाय तद्व्यावृत्तिसत्वादाह "साध्याभावमादाये"ति।

व्यधिकरणधर्मावच्छिन्नाभावं विनापि व्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारानुपपत्तिरतः "प्रतियोगितावच्छेदके"ति। "न प्रागुक्ते"ति। नित्यज्ञानत्वादिसाध्यकनित्यसविषयकत्वादौ। तत्र समवायाद्यवच्छिन्नसाध्याद्यभावादेरेव लक्षणघटकत्वात्। "इत्थं चे"ति। व्यापकता च प्रतियोगिवैयधिकरण्याघटिता; अन्यथा प्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वोपादानेऽपि समवायावच्छिन्नवह्न्याद्यभावस्य साध्यतावच्छेदकसंबन्धेन साध्यनिष्ठव्याप्यतानिरूपितव्यापकताघटकीभूतस्वप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासंबन्धेन तदवच्छेदककिञ्चिद्विशिष्टस्वाभावप्रतियोगिताकत्वेन तादृशाभावाव्यावृत्तेरसंगतिः। न चैवं समवायावच्छिन्नवह्न्यभावप्रतियोगित्वस्य संयोगघटितसाध्यव्यापकतावच्छेदकत्वान्नापत्तिरिति वाच्यम्; समवायेन साध्यव्यापकतावच्छेदकसंयोगावच्छिन्नप्रतियोगिताकद्रव्यत्वाद्यभावस्य तदर्थत्वात्। न चैवमपि तादृशाभावस्य स्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्वेनाव्याप्त्युद्धारसत्वात् प्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वं व्यर्थमिति वाच्यम्; धूमाभावादेः स्वाभावरूपप्रतियोगिसामानाधिकरण्यवारणाय यावत्प्रतियोगितावच्छेदकसंबन्धस्य वाच्यत्वात्। अग्रे च यत्किञ्चित्तादृशसंबन्धनिवेशपक्षं दूषयित्वैवायं पक्षो दूष्य इति न तद्विरोधः. स्वाभावत्वानवच्छिन्नप्रतियोगि-

त्वोपादानपरो वायं ग्रन्थः । "संबन्धे"ति । संबन्धविशेषावच्छिन्नप्रतियोगिताकाभावत्वावगाहित्वघटितधर्मावच्छिन्नत्वेत्यर्थः । "वस्तुगत्ये"ति । विरोधस्य प्रतिबन्धकज्ञानाविषयत्वलाभाय; तदवच्छिन्नज्ञानस्य प्रतिबन्धकत्वेऽपि बाधबुद्धिविधया अप्रतिबन्धकत्वात् । "प्रसंगादि"ति । वस्तुगत्या संयोगादिसंबन्धेन घटादिमत्ताविरोधितावच्छेदकरूपावच्छिन्नविषयताकत्वेन न प्रतिबन्धकतासंभवः; घटाभावत्वादेरतथात्वादिति भावः । "तादृशे"ति । अन्यथा व्यधिकरणधर्मावच्छिन्नाभावत्वावगाहिज्ञानस्य निखिलसंबन्धावगाहिस्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताबुद्धिप्रतिबन्धकत्वप्रसंगः; विषयविरोधविरहेण तस्य तथात्वस्येष्टत्वे त्वाह "संबन्धे"ति । संबन्धाविशेषितप्रतियोगिताकाभावत्वेन ज्ञानप्रतिबन्धकत्वस्यादृष्टचरत्वादिति भावः । लाघवोपनीतेति क्वचित्कलाघवपदं संपातायातम्; बाधग्रन्थे तथा अनभिधानात् ।

"निखिले"ति । न च भावरूपप्रतियोगिसामानाधिकरण्यनिवेशान्नातिव्याप्तिः । जगदीशेन साध्यवद्वृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वनिवेशेऽपि पर्वतत्वाद्यात्मकाभाववारणाय दैशिकतया हेतुसामानाधिकरण्यं भावभिन्नत्वं वोच्यतामिति वाच्यम् । अभावसाध्यके घटत्वादिना साध्याभावस्य भावरूपप्रतियोग्यप्रसिद्धेः । भावप्रतियोगिकत्वोक्तौ च तत्रैव व्यभिचारिण्यतिव्याप्तिः । साध्यप्रमाऽभावस्य प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकाप्रतियोगित्वात् । न च तद्धटितव्यापकत्वं प्रवेश्यम्; तथापि कपिसंयोगाद्यात्मकाभावस्येति लेखनासंगतेः । "यावदि"ति । नन्वेवं जलादीत्यादिग्रन्थानुत्थितिः; धूमाभावे तादृशगोत्वाभावाभावस्य धूमाभावरूपत्वेऽपि यावदन्तर्गतसंयोगेन प्रतियोग्यसामानाधिकरण्यात् । न च धूमवत्त्वप्रकारकप्रमाविशेष्यतावान् वह्नेरित्यादौ साध्याभावे तादृशगोत्वाभावाभावस्य साध्याभाव-

[1] भावत्वानुपादाने—अ.

रूपत्वेनातिव्याप्तिरेव। धूमवदनुयोगिकत्वविशिष्टस्वरूपसंबन्धत्वादिना संसर्गतानुपगमादिति वाच्यम्; तत्रापि यावदन्तर्गतधूमाभावे तादृशगोत्वाभावाभावस्य तद्रूपतया तदुद्धारसंभवादिति चेन्न। एतन्मतेऽपि तादृशगोत्वाभावसंयोग्यन्यतराभावस्य धूमाभावस्वरूपत्वेन तद्ग्रन्थस्योत्थानात्। "ऐक्यमते" इति। यद्यपि तद्भेदमतेऽपि समवायावच्छिन्नवह्न्याद्यभावस्य साध्यव्यापकतावच्छेदकीभूतपूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगिताकतया प्रतियोगितावच्छेदकयावदन्तर्गतसमवायेन प्रतियोग्यसामानाधिकरण्यादसंभवः; तथापि प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव प्रतियोगितावच्छेदकसंबन्धघटितत्वस्य सार्थकीकृतत्वात् तदनुरोधेनैक्यानुधावनम्। अनैक्यमते चावतारकत्वानुपपत्तिः व्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाद्यभाववारणेऽपि किञ्चिद्विशिष्टवाच्यत्वाद्यभावा[1]वारणात्। न चैतल्लक्षणे सिद्धांतेऽपि असौ दोषो वर्तत एव; परंतु नित्यज्ञानं नित्यसविषयकत्वादित्यादावतिव्याप्तिवारणाय संबन्धत्रयं वीप्सामपेक्ष्य लाघवादिति वाच्यम्; तथापि समनियताभावैक्यपक्षानुरोधेन वीप्सायाः एवौचित्यात्।

यत्तु जगदीशेन "स्पन्दो महाकालत्वात्" "महाकालान्यः कालत्वादि"त्यादौ कालिकविशेषणतासंबन्धावच्छिन्नस्पन्दत्वाभावस्य तथाविधमहाकालान्यत्वाभावस्य प्रतियोगिताघटकविशेषणतासंबन्धेन तथात्वात् अतिव्याप्तिरित्यभिहितम्। तदभिप्रायश्चायं दैशिकविशेषणतासाधारणविशेषणतात्वेन कालिकविशेषणताया अपि संबन्धतया ताद्रूप्येण कालिकविशेषणतासंबन्धावच्छिन्नतदभावस्य साध्यवत्यसत्वेन प्रतियोगितायां साध्यव्यापकतावच्छेदकत्वमक्षतमित्यतः संबन्धत्रयैक्यमुक्तम्; तथा च समवायावच्छिन्नस्पन्दत्वाद्यभावमादाय नातिव्याप्तिरिति।

[1] भाववारणात्—अ.

तदपेशलम् ; सामान्यतो विशेषणतात्वं निराकृत्य कालिकविशेषणतात्वादिनैव संबन्धताया व्यवस्थापनात् स्पन्दत्वमहाकालान्यत्वादेः कालिकविशेषणतासंबन्धेन साध्यव्यापकताया एवासंभवात् स्पन्दत्वाद्यनधिकरणधर्म्यवच्छेदेन कालिकसंबन्धावच्छिन्नस्पन्दत्वाद्यभावसत्वात् इति ।

"प्रकारान्तरम्"। यावत्प्रतियोगितावच्छेदकसंबन्धस्य हेत्वधिकरणवृत्तितावच्छेदकत्वं विशेषणम् । न च हेत्वधिकरणवृत्तितावच्छेदकाः स्वप्रतियोगितावच्छेदका ये ये संबन्धास्तथात्वोक्तौ सत्तावान् जातेरित्यादौ संयोगेन समवायेन च व्यधिकरणधर्मावच्छिन्नघटसत्ताद्यभावस्यैक्येन तथाविधसत्ताभावस्य यावदन्तर्गतसंयोगेन हेत्वधिकरणावच्छेदेनातथात्वादव्याप्तिः ; हेत्वधिकरणसामान्यवृत्तितावच्छेदकत्वोक्तौ धूमवान् मेयत्वादित्यादौ संयोगाद्यवच्छिन्नधूमाद्यभावप्रतियोगितावच्छेदकसंयोगासंग्रहः । एतेन स्वविशिष्टहेत्वधिकरणत्वोक्तावपि न निस्तार इति वाच्यम् । साध्यव्यापकतावच्छेदकत्वेन स्वप्रतियोगिताया उक्तत्वात् । घटत्वेन वह्न्यादिनिष्ठतादृशप्रतियोगितावच्छेदकविषयितासंबन्धवारणाय हेत्वधिकरणवृत्तितावच्छेदकत्वमावश्यकम् । सत्ताभावस्य समवायघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य प्रतियोगितावच्छेदकसंयोगवारणाय वृत्तित्वप्रतियोगित्वयोस्सामानाधिकरण्यं वाच्यम् । परे तु यावत्वं व्यापकत्वम् । तथा च हेत्वधिकरणवृत्तितावच्छेदकस्वप्रतियोगितावच्छेदकसंबन्धत्वव्यापकविलक्षणावच्छेदकताकस्वप्रतियोग्यधिकरणताघटितप्रतियोगिसामानाधिकरण्यं फलितम् । अथ संयोगसमवायादिनिष्ठानां प्रतियोग्यधिकरणतावच्छेदकतानां नानात्वेन कस्यामपि तस्यां न तद्व्यापकत्वम् स्वप्रतियोग्यधिकरणतावच्छेदकतात्वेन व्यापकत्वोक्तौ किञ्चिद्विशिष्टस्वाभावाधिकरणतावच्छेदकदैशिकविशेषणतामादायातिव्याप्त्युन्मज्जनप्रसंगः । एतेन यत्किञ्चित्तादृशसंबन्धत्वव्यापकत्वमपि

परास्तम्; मैवम्; यद्यत्संबन्धावच्छिन्नाधिकरणतावच्छेदकतावृत्त्यन्यतमत्वेन तादृशसंबन्धत्वसमनियतत्वं तत्तत्संबन्धावच्छिन्नप्रतियोगितासामानाधिकरण्यस्य वाच्यत्वादित्याहुः।

स्वप्रतियोगितावच्छेदकीभूतेन येन संबन्धेन साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं तेन संबन्धेन तथात्वमिति वा प्रकारान्तरं बोध्यम्।

"साध्यतावच्छेदकव्यापके[1]"ति। नन्वत्र घटत्वेन रूपसामान्याभावाभावमादायैव नातिव्याप्तिः। न च तस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमेवेति वाच्यम्; स्वाभावत्वानवच्छिन्नप्रतियोगिसामानाधिकरण्यस्य वाच्यत्वात्। अन्यथा यथोक्तविशेषणाक्रान्ताभावनिवेशेऽपि पृथिव्यन्यत्वाभावादेः स्वभावरूपप्रतियोगिसामानाधिकरण्यसंभवेन प्राचां तदतिव्याप्त्यनुद्धारप्रसंगात्। ग्रन्थकारेणापि रूपाद्यात्मकाभावस्य स्वध्वंसादिरूपप्रतियोगिसामानाधिकरण्यस्यैव स्वाभावसामानाधिकरण्यस्यानभिधानाच्चेति चेन्न; समनियताभावैक्यमते तस्य घटत्वादिना वायुत्वाद्यभावाभावतया वायुत्वाभावादिरूपप्रतियोगिसमानाधिकरणत्वात्। न चैवमपि पृथिव्यवृत्तित्वावच्छिन्नाभाव एव तत्रातिव्याप्तिवारकः; तस्य साध्यमतावच्छेदकव्याप्याप्रतियोगिताकत्वेऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वादिति वाच्यम्; तस्य पृथिव्यन्यत्वविशिष्टाभाव[2]तया गगनाभावरूपप्रतियोगिसामानाधिकरण्यात्; यद्यपि धूमवान् वह्नेरित्यादावेवेदृशरीत्यातिव्याप्तिः तथापि समनियताभावैक्ये सा लक्षणदोषः; अत्र तु सद्धेतुत्वेन समा[3]धानमिति विशेषमादृत्यैतन्मात्राभिधानम्। न च यथोक्तलक्षणे पृथिव्यन्यत्वाभावमादायातिव्याप्त्युद्धारलेखनासंगतिः; तस्य पृथिवीभेदवि-

[1] साध्यतावच्छेदकव्यापकेत्यादिगदाधरीपाठः प्रामादिकः इति न्यायरत्ने—स्व.

[2] अभावाभावतया—अ.

[3] न तु ऐक्ये अत्रेष्टापत्तिः अनैक्ये तु नातिव्याप्तिरिति समाधानम्—अ.

शिष्टाभावतया तत्संभवादिति वाच्यम्; प्राचां मते यथोक्तलक्षणे समनियताभावभेदमत एवानतिप्रसंग इष्टः; तदभेदमते प्रसिद्धव्यभिचारितो विशेषस्य दुर्वचत्वात् साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे चोक्तक्रमेणोपेक्षाबीजसंभवादिति ।

अत्रेदं चिन्त्यम्; एवं सति अत एवेति ग्रन्थानन्तरमेवास्याभिधातुमुचिततया इदानीमेतदभिधाने संदर्भाशुद्धिः ।

वस्तुतस्तु प्राचां मते रूपसामान्याभावसाध्यकपृथिवीत्वादौ वक्ष्यमाणरीत्याऽतिव्याप्त्यभावेऽपि वादकथात्मके शास्त्रे वस्तुगतिमनुरुध्यैव व्युत्पादनीयतया तदभिधानम् ।

वस्तुतस्तु उक्तरीत्या अत एवेत्यादिग्रन्थे अवतारिते यावत्त्वनिवेशे यथोक्तविशेषणावश्यकतया तद्व्यावृत्तिप्रदर्शकपङ्क्तिरावश्यकी; तथाविधस्यापि अयमात्मा ज्ञानादित्यादावव्याप्तिग्रस्तत्ववारणाय येनेत्याद्यभिहितम्; तदुपरि च मनोन्यत्वाभावस्य परंपरासंबन्धेन प्रतियोगिसामानाधिकरण्यसंभवात् न तदतिव्याप्त्युद्धारसंभव इत्याशंकायां एवं दलान्तरेऽपीति लेखनमिति प्रकृतं समाप्य रूपादीत्यादिनोपेक्षाबीजप्रदर्शनात् कथं संदर्भाशुद्धिः? गोत्वाभावस्येत्यादिग्रन्थो यथोक्ताभावविशेषणप्रभृति व्यावृत्तिप्रदर्शनार्थ इत्यभिप्रायेण भट्टाचार्यैः तथा व्याख्यानेऽपि वर्णकान्तरमादाय संदर्भाशुद्धिपरिहारेऽपि तदभिप्रायोपगमान्नविरोध इति ।

"पृथिव्यन्यत्वाभावस्यापी"ति । एतस्य स्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि वक्ष्यमाणरीत्या पृथिव्यन्यत्वप्रकारकप्रमाद्यभावो बोध्यः । खण्डप्रलये परमाणौ पूर्वसर्गसिद्धमेव रूपं स्वीकार्यम्; अन्यथा रूपोत्पत्त्यर्थं पुनः पाकस्वीकारापत्तेरित्यतो महेति ।

"यद्यपी"ति । विनश्यदवस्थस्यापि रूपस्य प्रतिबन्धकत्वादिति भावः । ननु नव्यमते रूपादेः न रूपसामान्याभावाविरोधित्वं; नापि तद-

सामानाधिकरण्यरूपं तद्विरोधित्वमित्यन्वयव्यतिरेकदृष्टान्तानुपपत्तिरत आह "यथे"ति। "मानाभावादि"ति। रूपध्वंसादिः न रूपसामान्याभावविरोधी तत्वे साधकाभावात्; अन्यथानुपपत्यभावादिति यावत् इति प्रयोगो बोध्यः। "अनुभवे" इति। अनुभवे विप्रतिपत्तिः; घटे रूपं नास्तीति प्रत्यक्षानुदयेन प्रत्यक्षप्रमाणस्यैवासत्वात्। तत्र प्रमाणत्वसंशयाद्वा[1]। नन्वस्तु घटो रूपसामान्याभाववान् नित्यरूपवदन्यत्वादित्यनुमानमित्यत आह "अनुमानं चे"ति। "प्रमात्मके"ति। तथा च रक्तरूपसामान्याभावो यदि घटावृत्तिः स्यात् तदा अन्तराश्यामधर्मिकप्रमाविषयो न स्यादिति तर्केण रक्तरूपसामन्याभावाविरोधित्वानुमानेऽप्रयोजकत्वशंका निरसनीयेत्यर्थः। प्रोक्तानुमानेऽप्रयोजकत्वशंका निरासं च रूपसामान्याभावो यदि रूपवदवृत्तिः स्यात् तदा रूपाहेतुस्स्यादिति तर्केण स्वयं वक्ष्यति। तद्वृत्तेरित्यन्तं प्रमात्वलाभाय। ननु तदधिकरणकाभावप्रत्यक्षं प्रति इन्द्रियसंयुक्ततदधिकरणविशेषणतायाः एव सन्निकर्षत्वोपगमात् न दोष इत्यत आह "विशेष्ये"ति। "अहेतुत्वादि"ति। विशेष्यभेदेनानन्तकार्यकारणभावकल्पने गौरवात्; प्रयोजनान्तराभावाच्चेति भावः। अत एव सामान्याभावग्रन्थे अधिकरणद्वयान्तर्भावेन घटो नास्तीति प्रत्ययविषययावद्विशेषाभावसत्वात् तत्प्रत्यक्षापत्त्या अतिरिक्तसामान्याभावो दीधितिकृता व्यवस्थापयिष्यते। अनुमितिग्रन्थे ग्रन्थकारेण स्फुटीकृतमेतत्। "इष्टत्वादि"ति। तस्य तवापि दुर्वारत्वात्; एवमग्रेऽपि। तत्कालावगाहिप्रत्ययः किं तत्कालावच्छिन्नत्वं तादृशप्रतियोगिताकत्वे; किं वा अभावे; अवगाहते; आद्ये "तादृशे"ति; द्वितीये तु इष्टापत्तिमाह "तद्धर्मे"ति। प्रतिबंदेरनुत्तरतया सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वेऽपि न दैशिकाव्या-

[1] "संशयाद्वा घटे"—अ.

प्यवृत्तित्वमित्युक्त्या अतिरिक्तसामान्याभावासिद्धिप्रसंगाभावाभेदप्रसंगयोश्च सिद्धान्तितवर्त्मना वा वारणेन दूषणान्तरमाह "एवं रक्ते"ति। यत्र संयुक्तयोः रक्तघटयोरन्यतरस्मिन् रक्तनाशस्तत्संयोगनाशश्च तत्र संयोगनाशस्य तथात्वस्वीकारे घटान्तरेऽपि तत्प्रतीत्यापत्तिरिति समनियतध्वंसेति; तेषामेकतया तत्र तत्स्वीकारे न बाधकमित्यत आह "तत्समाने"ति। "एकत्वादेरि"ति। भावोपादानमत्यन्तानिष्ठत्वव्यञ्जकम्। "निर्युक्तिक एवे"ति। पृथिव्यां रूपं नास्तीत्यप्रत्ययात्। [" [1]रूपान्तरोत्पत्ती"ति। रूपे तत्र तदुत्पत्त्यनन्तरोत्पत्तीत्यर्थः]। "पाकजे"ति। भाविपाकजं तु नापाद्यम्; पाकरूपकारणाभावात्; किन्तु प्रागभावत्वेन सामान्यकारणतामुपगम्य रूपसामान्यम्।

वस्तुतः पूर्वोत्पन्न एव रूपे उत्पत्त्यन्तरं आपाद्यम्; न तु तद्भिन्नं किञ्चित् रूपं वा तदसमवेतस्यैवालीकस्य तत्रापादनासंभवात्; नापि तत्प्रागभावस्य तत्त्वेन हेतुतया तद्वारणसंभवः; तस्यैवालीकत्वादिति।

"यत्[2]काले"ति। यत्कालः; उत्पत्तिकालः; पाकाद्रूपनाशकालश्च; तथा च कालान्तरे रूपं नास्तीति न प्रतीतिः। नापि रूपान्तरोत्पत्त्यापत्तिः रूपानधिकरणकालावच्छेदेन एकत्वादौ तत्संभवं स्मारयति "दत्ते"ति। "प्रलये"ति।

इदं तु बोध्यम्; पार्थिवपरमाणुरूपस्य पाकजन्यत्वरूपसिद्धान्तानुरोधेनाद्यपाकक्षणे परमाणोर्नीरूपत्वात् दीधितिकारैस्तादृशावच्छेदकं कुतो न प्रदर्शितम्। यदि विनश्यतो रूपस्याप्रतिबन्धकतया संसारप्रवाहस्यानादितामभिप्रेत्य तन्नोक्तमित्युच्यते; तदा क्व महाप्रलयः; यदि च परमाणुरूपस्याजन्यतां मनुते तदा अनादेर्भावस्य नाशासंभवान्नित्यत्वापत्तिः। किं च

[1] [ ] एतदन्तर्गतपाठो नास्ति (मै) पुस्तके—स्व.
[2] "यत् तत्" इति (मै) पुस्तके। अनन्तरं यत्कालः इति नास्ति—स्व.

विनश्यतोऽपि रूपस्य प्रतिबन्धकतामते पाकाद्रूपनाशोत्पत्तिक्षणे उक्तयुक्त्या परमाणौ रूपसामान्याभावसत्वात् कथं भट्टाचार्यैः सद्धेतुत्वं निरस्यते इति ।

दीधितिकारोक्तं सद्धेतुत्वं निरस्य प्राचीनाभिमतं विरुद्धत्वं साधयति "एवमि"ति । दीधितौ रूपाभावपदस्य स्पर्शाभावपरत्वमित्यपि निरस्यति "एवमि"ति । एतन्मते च रूपोत्पत्तिकालोत्पत्तिकध्वंसविशेषस्य कारणगुणप्रक्रमजन्यरूपादिकं प्रति विशिष्य प्रतिबन्धकत्वान्न दोषः ।

"यत्रे"ति । प्रतियोगिसामानाधिकरण्ये स्वनिष्ठत्वलाभाय ; अन्यथा स्वविशिष्टत्ववैयर्थ्यादित्यनुपदं स्फुटीभविष्यति । सामानाधिकरण्यस्य व्याप्यवृत्तितया न स्वरूपसंबन्धरूपहेत्वधिकरणावच्छिन्नत्वमित्यत आह—तत्सामान्ये[1]"ति । तथा च स्वनिष्ठस्वप्रतियोगिसामानाधिकरण्यनिरूपकताकत्वेन हेत्वधिकरणताव्यापकत्वमित्यर्थः । "पर्वतादेरि"ति । स्पन्दप्रलययोरेव कालोपाधित्वं नान्यस्येत्यर्थः । एवं च प्रलयस्य कालिकसंबन्धेन गोत्वाधिकरणतया हेतुमति प्रलय इत्यस्य नासंगतिः । [[2]स्पन्दस्य कालोपाधित्वे इदम् इदानीमिति प्रत्यय एव प्रमाणम् ; एवं च तद्वति काले इत्यस्यापि संगतिः] । धूमाभावस्योत्पत्तिकालावच्छेदेन पर्वतेऽयोगोलकभेदाभावस्याभाववृत्तौ संबन्धविशेषानिवेशेनायोगोलकभेदवति काले कालिकसंबन्धेन अयोगोलकावच्छेदेन प्रतियोगिसामानाधिकरण्यादाह—"धूमवत्त्वे"ति । वृत्त्यनियामकसंयोगेन साध्यत्वं नास्तीत्याशयेनेदम् ।

एतेन साध्यतावच्छेदकसंबन्धेन धूमसंबन्धिनि महाकाले धूमाधिकरणत्वप्रकारकप्रमाविषयत्वस्यासत्त्वेनाव्यापकतया तदभावस्य न लक्षण-

[1] गादाधर्यां तत्सामान्येत्यादि पाठः दृश्यते ; अपि तु न्यायरत्ने हेत्वधिकरणसामान्येति प्रतीकधारणम्—स्व.

[2] [ ] एतदन्तर्गतपाठो नास्ति (अ) पुस्तके—स्व.

घटकता; धूमसंबन्धित्वप्रकारकप्रमाविषयत्वाभावस्य च महाकाले प्रतियोगिसामानाधिकरण्यमेवेति निरस्तम्।

परंतु महाकाले वृत्तिनियामकसंयोगेन धूमवत्त्वस्य स्वयमङ्गीकारात् तत्पक्षे असंगतमेवैतत्। न च धूमवत्त्वप्रकारकत्वविशिष्टप्रमाविषयत्वाभावस्येश्वरीयप्रमाविषयत्वरूपप्रतियोगिसामानाधिकरण्यं दुर्वारमिति वाच्यम्; धूमवन्मात्रमुख्यविशेष्यकप्रमाया एवोपादानात्; तस्याः अव्याप्यवृत्तित्वेऽपि तद्विषयत्वस्य व्याप्यवृत्तित्वात् अन्यथा धूमाधिकरणत्वाभावो बोध्यः; यदि च संयोगेन धूमादिकरणत्वमव्याप्यवृत्तीति मतम्; तदा धूमसामानाधिकरण्यावच्छिन्नस्वरूपादिसंबन्धावच्छिन्नाधिकरणत्वाभावः; आदिपदमप्येतदर्थमेव।

"लक्षणघटके"ति। गवाद्यभावस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं भट्टाचार्योक्तसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं च बोध्यम्। प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकच्छेतावच्छेदकप्रतियोगिताकत्वं तु चरमध्वंसाभावाभावादेरेवे"ति। "प्रलयावच्छेदेने"ति। प्रलयो गवाद्यनधिकरणत्वेनावान्तरकालविधयाप्यवच्छेदकः दैशिकविशेषणतासंबन्धेन वृत्तावेवेदमवच्छेदकमुपदर्श्यते।

एतेन कालिकसंबन्धेन वृत्तिमादाय दोषयोजनासंभवात् गवाद्यनधिकरणधर्म्यवच्छेदेनेति व्यर्थमिति प्रत्युक्तम्। दैशिकविशेषणतासंबन्धावच्छिन्नप्रतियोगिसामानाधिकरण्यकल्पस्याग्रे निराकर्तव्यत्वेऽपि आपाततस्तदुपगमेऽप्येतदभावानां न वारणमित्यावेदनार्थत्वात्।

अथ चक्रवर्त्तिलक्षणे कालिकसंबन्धेन वृत्तावच्छेदकत्वमुपदर्श्यते; उपदर्शितं च वह्न्यभावस्य कालिकसंबन्धावच्छिन्नाभावस्य वह्निमदवयवावच्छेदेन वृत्तित्वम्; तच्च प्रतियोगिनः कालिकसंबन्धेन वृत्तावच्छेदकं

विना नोपपद्यत इति चेन्न; तावता कालिकसंबन्धावच्छिन्नगवाद्यभावस्य कालिकसंबन्धेन वृत्तावच्छेदकं न सिध्यति; तस्य यः कालिकसंबन्धावच्छिन्नाभावः तस्य प्रतियोग्यनधिकरणदेशकालाप्रसिध्या व्याप्यवृत्तित्वात् विरोधित्वानियामककालिकसंबन्धेन वृत्तेरव्याप्यवृत्तित्वाघटकत्वाच्च। किंच दैशिकविशेषणतासंबन्धावच्छिन्नप्रलयान्यत्वाभावस्य या कालिकसंबन्धेन वृत्तिरुपदर्श्यते सापि प्रलयभेदानधिकरणावच्छिन्नैव; अन्यथा कालिकसंबन्धावच्छिन्नतादृशप्रलयान्यत्वाद्यभावाभावस्याव्याप्यवृत्तित्वानुपपत्तेरिति कालिकसंबन्धेन वृत्तित्वेऽपीदमावश्यकमेवेति। दैशिकविशेषणतासंबन्धावच्छिन्नप्रलयान्यत्वाभावमादाय नातिव्याप्तिनिरास इत्याह—"एवमि"ति। अत एव अथेत्याद्यग्रिमाशंकायामुक्ताभावस्यैवोत्कीर्तनम्; न तु गवाद्यभावस्येति। "दैशिके"ति। कालिकसंबन्धावच्छिन्नप्रलयान्यत्वाभावस्य प्रलयात्मकप्रतियोग्यनधिकरणदेशावच्छेदेन दैशिकविशेषणतयैव तथात्वात् तद्व्युदासार्थम्; प्रलयावृत्त्यभावस्य तु द्रव्यत्वघटाभावादिरूपं यत् प्रतियोग्यनधिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं बोध्यम्। "गवादी"ति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते चरमध्वंसप्रागभाववति परमाणौ न तदभावः।

अथैवमपि चरमध्वंसप्रागभावध्वंसस्य चरमध्वंसतया तत्र प्रागभावात्मकप्रतियोगिसामानाधिकरण्यं दुर्वारम्; मैवम्; तादृशप्रागभावध्वंसस्य चरमध्वंसरूपत्वानुपगमात्। लक्षणघटकप्रतियोगितामुपादायैव वा प्रतियोगिसामानाधिकरण्यस्योपपाद्यत्वात्। तदविरोधितामते तु चरमध्वंसवद्भेदाभावः तस्यापि चरमध्वंसात्मकत्वेन स्वात्यन्ताभावरूपप्रतियोगिसामानाधिकरण्ये तु तत्प्रकारकप्रमाविषयत्वाभावो बोध्यः; तस्य भावप्रतियोगिकत्वेनातिरिक्तत्वात्। एवं चरमध्वंसप्रागभावो न गवादेर्व्यापकत्वेन दर्शितः। तदभावस्य परमाणौ प्रतियोगिसामानाधिकरण्येन महाकालानुधावनस्य तत्राफलत्वात्।

"महाकाल" इति । अथैवं एतत्कालावच्छेदेन गवादिव्यापकीभूतस्वाभावरूपप्रतियोगिमति एतत्कालीनघटध्वंसरूपखण्डकाल एव स्वकालावच्छेदेन कालिकसंबन्धेन चरमध्वंसादेर्वृत्तेः प्रतियोगिसामानाधिकरण्यसंभवात् महाकालानुधावनं व्यर्थमिति चेन्न; क्रियैव काल इति मते ध्वंसादेरकालत्वात् ।

नन्वेवं यदा गोत्वं तदा गौरित्यत्र सद्धेतुत्वं स्यात् । प्रलयस्याकालत्वात् । न च चरमक्रियायामेव व्यभिचारः यदा गोत्वं तदा—प्रलयावृत्तीत्यादावेव सद्धेतुताया आपादनीयत्वात् । न च जन्यमात्रस्य कालत्वानुपगमेऽपि प्रलयस्य कालत्वमावश्यकम्; अन्यथा [1]क्षणत्वघटितोत्पत्तिलक्षणस्याव्याप्त्यापत्तेरिति वाच्यम्; स्ववृत्तियावत्ध्वंसविशिष्टसमयत्वरूपक्षणत्वस्य महाकाले एव संभवेन तद्घटितोक्तलक्षणनिर्वाहादिति चेन्न; स्वस्वपूर्ववर्त्तियावत्पदार्थविशिष्टसमयत्वरूपक्षणत्वपक्षे महाकालस्य क्षणत्वासंभवेन प्रलयस्य कालत्वावश्यकतया तदसद्धेतुत्वनिर्वाहात् ।

अथ दैशिकविशेषणतासंबन्धावच्छिन्नप्रलयान्यत्वाभावस्य प्रतियोगिमति इदानीन्तनध्वंसे प्रतियोग्यनधिकरणप्रलयकालावच्छेदेन कालिकसंबन्धेन वृत्तित्वं दुर्घटम्; तस्याकालत्वात्; किन्तु दैशिकविशेषणतासंबन्धेनैव तद्वच्चरमध्वंसाभावरूपप्रतियोगिमति इदानीन्तनध्वंसे चरमध्वंसोत्पत्तिक्षणाद्यवच्छेदेन दैशिकविशेषणतासंबन्धेन तदभावस्य वृत्तित्वोपगमसंभवेन महाकालानुसरणं व्यर्थमिति चेन्न; दैशिकविशेषणतया अव्याप्यवृत्तित्वस्य दुर्घटत्वात् ।

[1] "अध्वस्तक्षणयोगस्य क्षणयोगा जनिर्मते"ति उत्पत्तिलक्षणप्रतिपादकाचार्यीय कारिका—स्व.

"तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वम्" उत्पत्तिलक्षणार्थः इति मणिकारः—स्व.

"प्रलयान्ये"ति । प्रलयान्यत्वविशिष्टत्वं च न विशेष्यत्वस्य विशेषणम्; तथा सति प्रलये एव प्रतियोगिसामानाधिकरण्यं स्यात्; किन्तु कालत्वस्य । विशेष्यभेदेन विशेष्यत्वभेदे तु विशेष्यत्वस्येति बोध्यम् । प्रलयान्यत्वकालत्वोभयपर्याप्तप्रकारतेति तु ज्यायः । वक्ष्यमाणरीत्या च प्रलयाविषयकप्रमैवोपादेया; तेन न ईश्वरीयप्रमामादाय दोषः; तस्याः अव्याप्यवृत्तित्वेऽपि तद्विषयत्वं व्याप्यवृत्त्येव; अन्यथा प्रलयान्यकालत्वाधिकरणत्वाभावो बोध्यः विशिष्टाधिकरणताया अतिरिक्तत्वात् ।

एतेन प्रलयान्यकालत्वप्रकारतानिरूपितप्रमीयविशेष्यत्वाभावपरं प्रलयान्यकालमात्रवृत्तिप्रलयान्यकालत्वप्रकारतानिरूपितविशेष्यत्वाभावपरं वा इत्यायासः प्रत्युक्तः ।

प्रलयान्यकालत्वादेरभावस्येति पाठे तु कालत्वविशिष्टप्रलयान्यत्वादेरभावस्येत्यर्थः । यथाश्रुते तदभावस्य विशेष्यभूतकालत्वरूपप्रतियोगिसामानाधिकरण्यादतिव्याप्तितादवस्थ्यात् । कालत्वादेः कालिकसंबन्धेन गवादिव्यापकत्वात् समनियताभावभेदपक्षे चेदम्; अन्यथा तस्य प्रलयान्यकालत्वाभावरूपतया उक्तदोषस्य दुर्वारतेति । अत एव कालिकसंबन्धेन प्रलयावृत्तिसाध्यके दोषाभावात् दैशिकविशेषणतासंबन्धानुधावनम् । प्रलयवृत्तित्वं च दैशिकविशेषणतासंबन्धेन; तेन प्रलयान्यत्वस्य साध्यतानिर्वाहः । कालिकसंबन्धेन तन्निवेशे प्रागभावानामेव साध्यत्वं स्यात् । "प्रागभाववान् कालत्वादित्या"दौ च नातिव्याप्तिः उदाहरणाभासे यत्रेत्युपादानात् दैशिकविशेषणतारूपसाध्यतावच्छेदकसंबन्धलाभः ।

"साध्यतावच्छेदकसंबन्धेने"ति[1] । कालत्वादिविशिष्टप्रलयान्यत्वादेः दैशिकविशेषणतासंबन्धेन साध्यं प्रति अव्यापकत्वात् तदभावस्य

[1] "कालिकसंबन्धस्य व्यापकत्वाघटकत्वसूचकम्", अधिकपाठः—अ.

प्रलयानात्मकस्य न लक्षणघटकतेति भावः। इतरसंबन्धः; व्यधिकरणः। "एतदि"ति।

एतेन पूर्वोक्तप्रयोजनस्यैकत्र जन्यद्रव्यसाध्यकस्थले संभवात् प्रलयावृत्तिसाध्यकानुधावनं व्यर्थमिति परास्तम्।

ननु प्रलयान्यत्वाभावस्य प्रलयेऽपि सत्वेन दैशिकविशेषणतासंबन्धेन वृत्तिरावश्यकी; अन्यथा निरूक्तहेतुसामानाधिकरण्यभङ्गापत्तेः तद्वरं तस्यातिरिक्तत्वम्। एवं च परमाणौ प्रलयान्यत्वं नास्तीति प्रत्ययस्यापि तत्वेन वृत्त्यगोचरत्वेऽपि वारणमतिव्याप्त्युद्धारश्च। एवं प्रलयान्यत्वप्रकारकप्रमाविषयत्वाभावादेः प्रलयात्मकत्वं विना न दोषयोजना भवतीत्यत आह— "वस्तुतस्त्वि"ति। प्रलयान्यत्वादेरित्यादिना तत्प्रकारकप्रमाविशेषविशेष्यत्वपरिग्रहः। "नाने"ति। प्रलयत्वं निखिलचरमध्वंससाधारणमित्यभिप्रायः। तदा पूर्वक्षणादेरसत्वात् यत्किञ्चिद्ध्वंसेति। स्वं—प्रलयान्यत्वाभावः। स्वं—तद्ध्वंसत्वात्मकोऽभावः। "विशिष्टप्रमे"ति। प्रलयान्यत्वप्रकारतानिरूपितविशेष्यताया एव तत्प्रकारकत्वविशिष्टप्रमावत्त्वनियामकत्वात्। "उक्ते"ति।

इदं तु बोध्यम्—प्रलयाविषयकप्रमाविषयत्वाभावस्योक्तविवक्षां विनाप्यतिव्याप्तिवारकत्वम्। विषयताया अव्याप्यवृत्तित्वे तु धूमवान् वह्नेरित्यादावुपेक्षाबीजकथनं निर्बीजमिति।

"कपी"ति। संयोगप्रतियोगिकाभावत्वेन साध्यत्वे तदवच्छिन्नप्रतियोगित्वाप्रसिद्धिः। अन्यथैव संयोगस्य प्रतियोगित्वोपपत्तेः। "अन्यथा पुनरि"ति। ननु दैशिकविशेषणतासंबन्धेन हेतुसामानाधिकरण्यनिवेशात् नायं दोष इति चेन्न; व्यापकताघटकाभावीयवृत्तौ स्वरूपसंबन्धनिवेश एव पर्वतत्वादिरूपाभाववारणार्थं दर्शितसंबन्धेन तन्निवेशः प्रसज्यते; स एव

न । प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन तादृशवृत्तिनिवेशात् पर्वतत्वरूपाभावस्यापि व्यापकताघटकत्वेन लक्षणाघटकत्वात्. पर्वतत्वाभाववृत्तिप्रतियोगित्वावच्छिन्नाभावस्यातिरिक्तत्वाच्च । नन्वेवमपि सत्ताभाववारणायैव दैशिकविशेषणतासंबन्धेन हेतुसामानाधिकरण्यनिवेशोऽस्त्विति चेन्न; तथापि गगनादिवृत्तित्वविशिष्टसत्ताभावादिकमादायाव्याप्तेः ।

अत्र च स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणा इत्युक्तौ तृतीयान्तार्थस्यैकदेशान्वयप्रसंग इति प्रथगभिधानम् । द्वितीये च स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यस्यानुवृत्तये[1] भावप्रत्ययोक्तिः । उद्देश्यविधेयवद्वाचकयोः समानविभक्तित्वम् उद्देश्यवाचकानां षष्ट्यन्तत्वे विधेयवाचकस्य प्रथमान्तत्वमपेक्षितमिति व्युत्पत्तिभेदसूचनमपि लक्षणद्वये द्रष्टव्यम्।

इदं चात्रावधेयम्—स्ववृत्तित्व-स्वविशिष्टहेत्वधिकरणावच्छिन्नत्व-स्वप्रतियोगिनिरूपितत्वैतत्त्रितयसंबन्धेनाभावविशिष्टं यत् सामानाधिकरण्यं तद्विशिष्टं यत् साध्यतावच्छेदकविशिष्टसामानाधिकरण्यं निरूपकतासंबन्धेन तद्वत्वं हेतौ व्याप्तिः; तद्विशिष्टत्वं तद्वदन्यावृत्तित्वसंबन्धेन, तेन व्यभिचारिणि वाच्यत्वाद्यभावमादाय नातिव्याप्तिः । साध्यतावच्छेदकवैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन; तच्च; स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वादिसंबन्धेन; तद्वति स्वरूपसंबन्धेन वृत्तित्वं; तेन न विशिष्टपरामर्शानुपपत्तिः । एवं हेत्वधिकरणावच्छिन्नसामानाधिकरण्यनिरूपकप्रतियोगिकत्वविशिष्टत्वं यत् साध्यतावच्छेदकविशिष्टसामानाधिकरण्यं निरूपकतासंबन्धेन तद्वत्वम्; साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकप्रतियोगिताकत्ववदन्यूनवृत्त्यनुयोगितानिरूपकप्रतियोगिताश्रयसामानाधिकरण्यनिरूपकताव्याप्याधिकरणतानिरूपकतावच्छेदकं यद्धेतुतावच्छेदकं तद्वत्वं वा व्याप्तिरिति दिक् ।

[1] दवीयस्थानान्तरस्थस्यानुसन्धानमनुवृत्तिः—स्व.

केचित्तु—यावत्त्वम्; व्यापकत्वम्; तथा च स्वावच्छिन्नसामानाधिकरण्यविशिष्टप्रकृतसाध्यव्यापकतावच्छेदकप्रतियोगिताकाभावत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकीभूतोक्तसंबन्धेनाभावविशिष्टसामानाधिकरण्यत्वकधर्मवत्त्वमिति निष्कर्षो बोध्यः। धूमवान् वह्नेरित्यादौ च न तादृशः कोऽप्यभावः संभवति; धूमाभावे यद्विशिष्टसामानाधिकरण्यं भवेदिति न कोऽपि दोषः। परं तु एतदपेक्षया लाघवात् स्वावच्छिन्नसामानाधिकरण्यविशिष्टतादृशप्रतियोगिताकाभावव्यापकतावच्छेदकस्वस्वप्रतियोगिसामानाधिकरण्यकधर्मवत्त्वमेवोचितम्; तथा सत्यपि गोमान् गोत्वादित्यादौ तादृशगवाद्यभावाधिकरणे प्रलये गोसामानाधिकरण्यविशिष्टाभावासत्त्वेनातिव्याप्त्यनवकाशात्। न चैवं घटत्वेन वाच्यत्वाद्यभावसाधारणाभावविशिष्टसामानाधिकरण्ये तादृशाभावव्यापकतावच्छेदकत्वसंभवात् सा दुर्वारेति वाच्यम्; स्वव्यापकतावच्छेदकस्वप्रतियोगिसामानाधिकरण्यकसकलतादृशाभावकत्वस्योक्तत्वात्। स्वं—तादृशाभावः। एवमपि स्वविशिष्टेत्यादिवैयर्थ्यस्य दुर्वारत्वात्। कपिसंयोगाभावादिसाध्यके कपिसंयोगरूपसाध्याभावाधिकरणेऽप्रसिध्या कपिसंयोगाभावसामानाधिकरण्यविशिष्टाभावासत्त्वेन "सत्तावान् जाते"रित्यादौ सत्ताभाववति सत्तासामानाधिकरण्यावच्छिन्नाभावासत्त्वेन चादोषात्। येन संबन्धेन हेतुमद्वृत्तित्वं तेन संबन्धेन तादृशसामानाधिकरण्यविशिष्टसाध्याभाववत्त्वनिवेशादित्याहुः।

तादृशाभावा ये ये प्रत्येकं तत्तद्व्यापकतावच्छेदकतत्तदभावप्रतियोगिसामानाधिकरण्यकत्वकूटवत्धर्मवत्त्वमर्थः। व्यापकताघटकसंबन्धादिभेदात् तवापि कूटनिवेशं विना अगतेरित्यन्ये।

स्वविशिष्टसामानाधिकरण्यविशिष्टव्यापकतावच्छेदकीभूतसाध्यव्यापकतावच्छेदकप्रतियोगिताकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमपि संभवति।

"प्रत्येकमि"ति । यावदभावघटकैकैकाभावस्येत्यर्थः । यत्र [1]कुत्रचिदिति शेषः । हेतुनिष्ठतत्तत्प्रतियोगिसामानाधिकरण्यमेव कुतो नोक्तमिति तु बोध्यम् । यद्धर्मावच्छिन्नाधिकरणत्वव्यापकतत्तत्प्रतियोगिसामानाधिकरण्यनिरूपकताकधर्मवत्त्वमर्थः । कपिसंयोगाभावादिसाध्यके च संयोगवृत्तिप्रतियोगिसामानाधिकरण्यनिरूपकतायास्तादृशाव्यापकत्वेऽपि गगनाभावादिसाधारणतन्निरूपकतायास्तथात्वान्नाव्याप्तिरिति स्वविशिष्टत्वं व्यर्थम् । यद्यपि हेत्वधिकरणताव्यापकत्वादन्यैव स्वविशिष्टहेतुमत्ताव्यापकता तथापि अभावनिष्ठत्वांतस्य निष्प्रयोजनतया त्यागात् स्वविशिष्टत्वत्यागेऽपि न क्षतिरित्याशयेन तद्वैयर्थ्यमुक्तम् । एवमग्रेऽपि ।

लाघवादाह—यद्रूपेति । विशिष्टरूपेणाधिकरणप्रवेशे द्रव्यं विशिष्टसत्वादित्यादौ अव्याप्तिवारणाय विशिष्टाधिकरणताघटितव्यापकताप्रवेशार्थमधिकरणतापदम् । आदिना यावत्यस्तादृशप्रतियोगिताः यद्रूपविशिष्टाधिकरणताव्यापकतावच्छेदिका इत्यस्य परिग्रहः । अत्र च समनियताभावैक्यमतेऽपि नातिव्याप्तिरिति बोध्यम् । व्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाद्यभावश्च दीधितिकृदुक्तनिष्कर्षे इव नेदानीं स्मर्यते; लक्षणघटकपदव्यावृत्त्युत्तरमेव तत्संस्कारोद्बोधात् । गगनाभावभावश्च नास्त्येव इति भावः ।

ननु दीधितिकृता यावन्तः साध्यव्यापकतावच्छेदकीभूतगगनावच्छिन्नप्रतियोगिताकाभावा हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणा इत्येव कुतो न कृतम्? मैवम्; तथा सति अवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इत्येव वाच्यं स्यात्; समवायित्वेन वाच्यत्वाभावादेर्लक्षणाघटकस्य निराकरणानौचित्यादिति ।

[1] अत्र पाठभेदाः गदाधरीये दर्शिताः—स्व.

एतेन समनियताभावैक्यमते गगनेन धूमाभावस्य गगनेन वह्न्यभावस्यैक्याददतिव्याप्तिरिति परास्तम् ।

यावत्यः तादृशप्रतियोगिताः हेत्वधिकरणावच्छिन्नस्वाश्रयसामानाधिकरण्यका इत्यस्य विवक्षितत्वात् ।

व्यधिकरणधर्मावच्छिन्नधूमाद्यभावाधिकरणकस्य गगनाभाववह्न्युभयाभावादेः तद्रूपताप्रतिक्षेपस्त्वकिञ्चित्करः ; तथापि समनियताभावैक्यमते तस्य व्यधिकरणधर्मावच्छिन्नवह्न्याद्यभावैक्यात् इति तन्मते समानाधिकरणधर्मावच्छिन्नाभाव एवातिव्याप्तिवारक इत्याशयेनाह—"धूमाभावादेरपीति"। ("जलेति"। अयं चाभावः न संयोगाद्यवच्छिन्नप्रतियोगिताकः ; तथा सति धूमाभावाधिकरणकत्वसंभवेन प्रतियोगितावच्छेदककोटौ जलवृत्तित्वोपादानवैयर्थ्यात् ; किन्तु स्वरूपसंबन्धावच्छिन्नप्रतियोगिताक इति ध्येयम्)[1]। "**अन्यतरत्वरूपेति**"। जलवृत्तित्वविशिष्टगोत्वाभावभिन्नं यद्द्रव्यभिन्नं तदन्यत्वस्य शुद्धगोत्वाभावे सत्त्वात् । अत्र चायोगोलकादौ तादृशगोत्वाभावसत्त्वेन तादृशान्यतराभाववत्त्वप्रत्ययानुपपत्तिरपि द्रष्टव्या । जलायोगोलकवृत्तिद्रव्यं दीर्घदण्डादि ; दीर्घवह्निविशेषादिस्तद्धूमसमानाधिकरणो महानसतदयोगोलकान्यतरत्वादिश्च हेतुः ।

इदं तु चिन्त्यम्—अयोगोलकवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावमादाय दर्शितरीत्या प्रसिद्धस्थले(अतिव्याप्तिसंभवात् जलादित्यक्षरानुरोधेन अप्रसिद्धस्थलानुधावनं न तु प्रसिद्धस्थले)[2] अतिव्याप्तिः नास्तीत्याशयेनेदम् ।

[1] (   ) एतदन्तर्गतपाठः अत्र नास्ति । किन्तु उत्तरत्र "परत्वादिति" प्रतीकधारणात् पूर्वं वर्तते—अ.

[2] (   ) एतदन्तर्गतपाठः नास्ति—अ.

यत्तु—समानाधिकरणधर्मावच्छिन्नधूमाभावस्य विशिष्टाभावात्मकत्वे व्यधिकरणधर्मावच्छिन्नधूमाभावस्यापि तथात्वं पश्चात्तु प्रतिक्षेप इत्याशयेनातिव्याप्तिरिति ;

तत्तुच्छम्. केवलान्वय्यभावस्य व्यतिरेकिविशिष्टाभावरूपत्वासंभवेनैवोपपत्तेः समानाधिकरणधर्मावच्छिन्नधूमाभावविशिष्टाभावयोर्भेदव्यवस्थापनवैयर्थ्यात् ।

"[1]परत्वादिति"। अत्रेदं चिन्त्यम्—एवं सति जलवृत्तित्वविशिष्टत्वावच्छिन्नाभावमादायैवातिव्याप्तिर्वाच्या ; तावतापि जलवृत्तिद्रव्यस्य धूमाभावप्रतियोगितासंभवात् ; न तु जलवृत्तित्वविशिष्टान्यतरत्वावच्छिन्नाभावम् ; संयोगविशेषणतान्यतरसंबन्धेन जलवृत्तित्वस्य भवतोऽपि आवश्यकत्वादिति ।

वस्तुतस्तु—संयोगेन जलवृत्तित्वविशेषणतासंबन्धेन जलवृत्तित्वान्यतरविशिष्टत्वावच्छिन्नाभावोऽयम्, अन्यतरत्वं तु न प्रतियोगितावच्छेदकम् तदुपादानेऽपि द्रव्यस्य तत्प्रतियोगित्वार्थं संयोगान्तर्भावस्यावश्यकत्वात् । न च प्रतियोगिसामानाधिकरण्यस्य प्रतियोगिसंबन्धिवृत्तित्वरूपताया आवश्यकतया संयोगसंबन्धेन जलसंबन्धित्वविशेषणतासंबन्धेन जलवृत्तित्वान्यतरदेव प्रवेश्य विशिष्टाभाव उच्यताम् ; तावतापि तादृशगगनादिरूपद्रव्यस्य जलायोगोलकयोः सत्त्वादतिव्याप्तिसंभवे तस्य[2] धूमाभावविशिष्टसकलवह्निमति वृत्तौ मानाभावादिति पूर्वग्रन्थासंगतिरिति वाच्यम् ; वृत्त्यनियामकसंयोगस्य व्यापकत्वाघटकत्वेन गगनादेः प्रतियोगित्वोपादानवैफल्यात् ।

[1] "जलेति" प्रतीकधारणम, "अयं चाभावः" इत्यादिना तादृशग्रन्थाभिप्रायवर्णनं च इतः पूर्वमेव दृश्यते—अ, पुस्तके ; मैसूर्पुस्तके प्रागेव वर्णितम्—स्व.

[2] "तस्य च"—अ.

अत्र वदन्ति—जले आदिपदग्राह्यस्पन्दे वा कालिकसंबन्धेनायोगोलकवृत्तिवह्न्यादेः सत्त्वेन कालिकसंबन्धावच्छिन्नजलादिवृत्तित्वविशिष्टाभावमादायातिव्याप्तिसंभवात् एतादृशायासो निष्फल इति ।

अत्र तादृशगोत्वाभावाभावस्य धूमाभावरूपतामते तादृशगोत्वाभावाभावत्वेन जलादौ वृत्तित्वानङ्गीकारेण तत्प्रत्ययापत्त्युद्धारसंभवेऽपि लाघवेन समनियताभावैक्यमते जलत्वाभावरूपतासिद्धान्तानुरोधेनैव तथाविधवृत्तिर्नोपगम्यते इति तत्परित्यागः ।

"संभवादिति" । न च तादात्म्येन अयोगोलकभिन्नमपि धूमव्यापकम् तदभावश्चायोगोलकत्वमिति व्यापकताघटकतादात्म्यसंबन्धेन अयोगोलकभिन्नरूपप्रतियोग्यसामानाधिकरण्यात् नातिव्याप्तिप्रसक्तिरिति वाच्यम्; प्रतियोगितायाः प्रतियोगिरूपतामतेऽयोगोलकभिन्ननिष्ठप्रतियोगिताया व्यापकतावच्छेदकत्वासंभवात् । न चैवं धूमसामान्यसाध्यके तन्निष्ठप्रतियोगोताया अपि न व्यापकतावच्छेदकत्वमिति वाच्यम्; तद्धूमसाध्यके एव गोत्वाभावे लक्षणघटकतत्तद्धूमाभावप्रतियोगित्वनिराकरणात् । न च तत्रैवायोगोलकभिन्नस्य तद्धूमव्यापकतासंभवात् नातिव्याप्तिप्रसक्तिरिति वाच्यम्; यद्धूमव्यक्तिः अनेकाधिकरणवृत्तिः तत्साध्यकस्योक्तत्वात् । "स्वाभावेति" । स्वाभावत्वानवच्छिन्नप्रतियोगिसामानाधिकरण्योक्तौ तु [1]अधिकविशेषणप्रवेशापत्तिः । नन्वेवं घटत्वाभाववान् [2]प्रमेयत्वादित्यादौ घटत्वादिरूपसाध्याभावस्य किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यात् अतिव्याप्तिरित्यत आह—"घटत्वाभाववानिति" ।

इति कृष्णम्भट्टीये प्रथमस्वलक्षणम् ।

---

[1] "अधिकरणविशेषप्रवेशापत्तिः"—अ.
[2] "मेयत्वादित्यादौ"—अ.

कृष्णम्भट्टीये द्वितीयस्वलक्षणम्

अत्र च जलं गोभिन्नद्रव्यत्वादित्यादौ अतिव्याप्तिः; प्रतीत्यतिप्रसङ्गाभावेनोक्तरीत्या जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वान्यतराभावादेः जलत्वाभावरूपतया द्रव्यत्वरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् । न च व्यधिकरणधर्मावच्छिन्नजलत्वाभावमादायैव नातिव्याप्तिः ; जले तादृशाभावप्रतीतिप्रसंगेन विशिष्टाभावस्य केवलान्वयितदभावात्मकत्वासंभवादिति वाच्यम् ; इत्थमपि तस्य व्यधिकरणधर्मावच्छिन्नद्रव्यत्वाद्यभावसमनैयत्येनातिव्याप्तेर्दुर्वारत्वादिति शंकानिराकरणाय प्रसिद्धव्यभिचारिण्येव तथाविधाभावमादायातिव्याप्तिं शंकते—"नन्वित्यादिना"। साध्यान्यधर्मवद्वृत्तित्वविशिष्टाभावादेः साध्याभावरूपताप्रतिक्षेपेऽपि साध्यवद्वृत्तित्वविशिष्टाभावस्य साध्याभावरूपतया अतिव्याप्तिः सकलव्यभिचारिण्युक्तलक्षणावतारबीजमेवेति भावः । अत्र दीधितिकृतां समनियताभावैक्यमभिप्रेत्य न समाधानम् ; किन्तु विशिष्टाभावस्य विशेषणाभावरूपतामेव तत्प्रतियोगितायाश्च विशेष्ये बाधात् नातिव्याप्तिरिति चेत् ब्रूयात् तदाप्याह—"एवमिति"। ननु वह्निमान् धूमादित्यादौ घटत्वादिना प्रमेयसामान्याभावस्य यावदन्तर्गतस्य लक्षणघटकतया यावद्धेत्वधिकरणान्तर्भावेन तत्समनियताभावीयतादृशघटमात्रवृत्तिप्रतियोगिताश्रयसामानाधिकरण्याभावादसंभव इत्यत आह—"एवं चेति"। धूमवान् वह्नेरित्यादौ घटत्वादिना धूमाभावस्य घटत्वेन वह्न्याद्यभावाभिन्नत्वेन तथात्वात् [1]तत्समानाधिकरणधर्मावच्छिन्नाभाव एव

[1] "तत्" पदं नास्ति—अ.

दोषवारको बोध्यः[1] तस्यापि च तथात्वेन दोषवारणं नास्तीत्याशयेन आह—"तथापीति"। यदि च प्रत्येकमुभयत्वावच्छिन्नभेदसत्त्वात् तादृशोभयत्वादेरपि स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपन्यूनवृत्तित्वमस्तीति मन्यते; तदा व्यधिकरणधर्मावच्छिन्नभेदमादाय दोषवारणाय तादृशभेदे स्वप्रतियोग्यवृत्तित्वरूपविशेषणस्यावश्यकतयोभयत्वस्यान्यूनवृत्तित्वं बोध्यम्। यद्यपि धूमत्वादेरप्युभयाभावप्रतियोगितावच्छेदकतया तत्प्रतियोगिताया न्यूनवृत्तिधर्मावच्छिन्नत्वम्; तथापि धूमवद्वृत्तित्वविशिष्टद्रव्यसामान्याभावस्य धूमाभावसमनियततया अतिव्याप्तिः; न च कथं तस्य प्रतियोगिसामानाधिकरण्यम् धूमवद्वृत्ति यादृशद्रव्यं नियमतो हेतुमति वर्तते तादृशद्रव्यस्य प्रतियोगित्वात्।

अथवा संयोगकालिकविशेषणतैतदन्यतरसंबन्धेन धूमवद्वृत्तित्वं तादृशसंबन्धावच्छिन्नवृत्तित्वसंबन्धेन धूमवद्विशिष्टत्वं वा निवेश्यम्। विशेषणा[2]भावात् विशिष्टाभाव इति। [उभयाभावपदस्य तादृशद्रव्याभावपरतया] गगनमपि तत्प्रतियोगीति तत्संबन्धिवृत्तित्वमादायैवातिव्याप्तिसङ्गतिरिति तु केचित्।

"अयोगोलकान्येति"। लाघवेनाकाशाभावत्वस्य प्रतियोगितावच्छेदककोट्यप्रवेशेऽपि आकाशाभावस्य प्रतियोगित्वमक्षतम्। "धूमेति"। धूमवत्तदितरविशेष्यकद्रव्यत्वप्रकारकप्रमाभावस्य तादृशाभावसमनैयत्यार्थं विशिष्टेति। "धूमभेदस्येति"। न चाभावप्रतियोगितायां संब[3]न्धविशेषावच्छिन्नत्वनिवेशात् धूमभेदव्युदासः। अत एव वाच्यत्वभेदादेः व्युदासात्

[1] "वाच्यः"—अ.

[2] "विशेषणादिनिरूपकत्वाभावात् विशिष्टाभाव इति"—अ.

[ ] एतदन्तर्गतपाठस्थाने "तादृशद्रव्याभावस्ये"ति—अ.

[3] "व्यापकताघटक"—अ.

लक्षणस्य प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारकत्वनिर्वाहोऽपीत्युत्तुरदूषणमप्यसङ्गतमेवेति वाच्यम्; एतावता धूमभेदव्युदासमात्रं; न त्वतिव्याप्तिनिरासोऽपीति प्रतियोगितायां संबन्धविशेषावच्छिन्नत्वनिवेशो व्यर्थ एव; ततश्च उत्तरदूषणसङ्गतिरपीत्यभिप्रायात्। "धूमत्वेति"। अस्य समवायेतरसंबन्धावच्छिन्नाभावत्वे समनैयत्यभङ्गो बोध्यः।

"अथेति"। आत्मा ज्ञानादित्यादौ आत्मत्वाभावमादाय हेतुसमानाधिकरणाभावीयत्वं प्रतियोगिताविशेषणम्। "तर्हीति"। प्रतियोगितायां यावत्त्वोक्तावधिकमभाववैयर्थ्यमेव लक्षणदोषः। तथा सति आत्मत्वत्वावच्छिन्नात्मत्वनिष्ठप्रतियोगिताया यावदन्तर्गततया तन्निरूपकाभावस्या[1]तथात्वात् अव्याप्तिशंकायामर्थतः प्रतियोगिसामानाधिकरण्येऽभावनिष्ठत्वत्यागात् नाव्याप्तिः। एवं च स्वविशिष्टत्वहेतुसामानाधिकरण्ययोरपि वैयर्थ्यमित्यभिप्रायेणेदम्। तेन प्रतियोगितायां यावत्त्वानुपादानेऽपि एतेषां वैयर्थ्यस्य सत्त्वात् दोषतया अभिधानासङ्गतिरिति नाशंक्यम्।

अथ साध्यव्यापकतावच्छेदकीभूतव्यधिकरणधर्मावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणाः तत्त्वमित्युक्तौ धूमवान् वह्नेरित्यादौ उक्ताभावानां व्युदासः; आत्मा ज्ञानादित्यादौ आत्मत्वसामान्याभावादेश्चेति चेत्; तर्हि धूमवान् वह्नेरित्यादौ अतिव्याप्तिः; घटत्वेन धूमाभाव-घटत्वेन वह्न्यभावयोरैक्यात्; तद्भेदेऽपि प्रतियोगितावच्छेदकैक्येन प्रतियोगितैक्याच्च। यदि च तथाविधयत्प्रतियोगिताका यावन्तोऽभावाः [2]तत्प्रतियोगिताश्रयेत्यादिरीत्या निवेशः धूमभिन्नत्वेन धूमाभावमादाय नातिव्याप्तिः; तस्यापि वह्निभिन्नत्वेन वह्न्यभावरूपत्वात्

[1] "तथात्वात्"—अ.

[2] "तत्तत्"—अ.

स एव दोष इति यद्यदिति । धूमभिन्नत्वेन धूमाभावधूमभिन्नत्वेन धूमतद्भिन्नोभयाभावप्रतियोगितयोः नैक्यम[1]सजातीयत्वादित्युच्यते ; तदा व्यधिकरणधर्मावच्छिन्नत्वरूपविशेषणं व्यर्थमिति ।

यथासन्निवेशेऽवैयर्थ्यादाह—" एवमिति " । व्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाभावमादाय लक्षणसङ्गतिस्तु प्रतियोगितावच्छेदकसंबन्धेन व्यापकताकल्पेनेति तदुपेक्षा । उभयाभावादेः उभयत्वाद्यभावरूपतापक्षे उभयत्वनिष्ठप्रतियोगितायाः साध्यव्यापकतावच्छेदकत्वाभावात् यथोक्तविशेषणाक्रान्तव्यधिकरणधर्मावच्छिन्नाभावोपगमेनैवावतारकत्वम् अतः सिद्धान्तमनुरुध्याह—" उभयेति " । " अप्रामाणिकत्वेऽपीति " ।

अत्र च भट्टाचार्यैः व्यापकताघटकत्वेन सामानाधिकरण्येनेत्युपादानात् नावतारकत्वभङ्गश्चक्रवर्त्तिलक्षणवदिति तु न वाच्यम्; चक्रवर्त्तिनां सामानाधिकरण्येनेत्युपादानमेवोभयाद्यभावमालोचयतां व्यधिकरणधर्मावच्छिन्नाभावव्यञ्जकं; तदभावा[2]सत्त्वेऽपि व्यधिकरणधर्मावच्छिन्नाभावसत्त्वात् तमालोच्यैव साध्याभावघटितलक्षणकथनात् न त्विह तेषां तथा किञ्चिदस्ति; दीधितौ सामानाधिकरण्येनेत्यस्यानुक्तेः तदप्रामाणिकत्वे तदघटितसाध्यव्यापकतावच्छेदकत्वस्यैव लाभसंभवात् । अवच्छेदकानवच्छेदकोभयादिभेदवारणाय प्रतियोगिताविशेषसंबन्धेनावच्छेदकविशेषितभेदनिवेशात् अर्थत एव न तत्र तादृशाभावव्यक्तिसंभवः । एवं साध्यवद्यत्किञ्चिद्व्यक्तीत्यादिव्यापकतामतेऽपि । नन्वेवमेतादृशदुष्टलक्षणाभिधानं दीधितिकृतामसङ्गतमिति चेन्न ; समवायित्वेन वाच्यत्वाभावमालोच्य आपाततः तेषां तथाभिधानम् ; पश्चात् दोषालोचने ज्ञेयत्वत्वेन वाच्यत्वाभावोपलक्षणत्वात् ।

[1] " सजातीयत्वात् "—अ.

[2] " तदभावसत्त्वेऽपि "—अ.

"तथा चेति"। तथा च प्रतियोगितावच्छेदकतापर्याप्तिप्रवेश इति भावः। "न भासत इति"। तदभानेऽपि प्रतीत्युपपत्तेरिति भावः। एतेन समवायित्वेन वाच्यत्वं नास्तीति प्रतीतिसिद्धो मणिकृद्भिः वह्नित्वेन प्रमेयं नास्ति वह्नित्वेन महानसीयवह्निघटान्यतरन्नास्तीत्यादि प्रतीत्या यत्किञ्चित्प्रतियोग्यवृत्तिधर्मावच्छिन्नाभावो दीधितिकृद्भिः व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदः समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य इति मिश्रैश्च कण्ठरवेणैवोक्त इति एत एव सौन्दलसंमताः न तु तद्भिन्नः सामान्यरूपेण विशेषाभावः [[1]मणिकाराद्यननुमतः व्यधिकरणधर्मावच्छिन्नाभावाप्रभेदतया सौन्दलसंमत इति तदप्रामाणिकत्वबीजमाविष्कृतम्।] अत एवाग्रे तदखंडनेन[2] न न्यूनता। न च निरुक्तभेदस्याग्रेऽखंडनात् न्यूनतेति वाच्यम्; प्रतियोगिताया व्यधिकरणधर्मावच्छिन्नत्वखंडनदिशा तदवच्छेदकतायाः तत्खंडनसिद्धेः।

एतेन तादृशाभावाङ्गीकारेऽपि प्रतियोगितावच्छेदकपदेन प्रतियोगितानतिरिक्तवृत्त्यवच्छेदकस्य तत्प्रतियोगितासमानाधिकरणं तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं तदन्यप्रतियोगितावच्छेदकस्य वा अग्रे विवक्षणीयतया नातिव्याप्तिः। स्वन्यूनवृत्तिभिन्नप्रतियोगितावच्छेदकेत्यादिविवक्षायास्तु अतिव्याप्तिग्रस्तत्वेन हेयत्वादिति पूर्वपक्षोऽपि निरस्तः।

तादृशाभावस्यैवाप्रामाणिकत्वात्। न च द्रव्यत्वेन धूमो नास्तीति प्रत्ययस्य द्रव्यत्वेन धूमवानिति ज्ञानप्रतिबन्धकत्वानुरोधेन तादृशाभावः सुवचः; सिद्धान्ते द्रव्यत्वविशिष्टधूमवत्ताज्ञाने धूमाभाववत्ताज्ञानस्य क्लृप्त-

[1] [ ] व्यधिकरणधर्मावच्छिन्नाभावाप्रभेदतया सौन्दलसंमत इति मणिकाराद्यनुक्ततदप्रामाणिकत्वबीजमाविष्कृतम्"—अ.

[2] "तदखंडनेऽपि"—अ.

प्रतिबन्धकतयोपपत्तेरतिरिक्तप्रतिबन्धकतायां मानाभावात्। [1]एवं वह्नित्वेन तार्णातार्णवह्न्युभयाभावेऽपि वह्नित्वं न प्रतियोगितावच्छेदकं तृतीयोल्लिखित-वैशिष्ट्येनैवोपपत्तेः किन्तु तदुभयत्वमेव; अत एव यावन्तः साध्याभावाः तद्व्यापकीभूताभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वलक्षणे ज्ञेयं प्रमे-यादित्यादौ प्रमेयत्वव्यधिकरणप्रतियोगित्वाप्र[2]सिद्धेः अव्याप्त्यभिधानसङ्गतिः।

अन्यथा प्रमेयत्वेन घटपटोभयभेदमादाय तदसङ्गतेः। न च तद्भेद-सत्त्वेऽपि गौरवेण प्रमेयत्वं न प्रतियोगितावच्छेदकमिति तत्सङ्गतिः विषयतामात्रस्यैव हेतुतावच्छेदकत्वात्। प्रमेयत्वावच्छिन्नप्रतियोगित्वेत्यन-भिधाय प्रमेयत्वव्यधिकरणेत्यभिधाने उन्मत्तप्रलपितत्वापत्तेश्च। न च धूम-वान् वह्नेरित्यादौ वह्नित्वेन तद्वह्न्यभाववारणाय स्वन्यूनवृत्तिभिन्नप्रतियोगिता-वच्छेदकत्वं प्रतियोगिताऩ[3]तिरिक्तवृत्तिप्रतियोगितावच्छेदकं वा वाच्यमिति तत्सङ्गतिरिति वाच्यम्; एवमपि प्रमेयत्वेन गगनतद्भिन्नोभयभेदमादाय लक्षण-सङ्गतेः; वह्नित्वेनार्द्रेन्धनजवह्निशुष्केन्धनजवह्न्युभयाभावादिकमादायाति-व्याप्तेः। न च प्रतियोगितापर्याप्त्यनधिकरणावृत्तित्वं प्रतियोगितावच्छेदक-विशेषणम्। पर्याप्तिरूपव्यधिकरणसंबन्धावच्छिन्नप्रतियोगित्वाभावस्य धूमे सत्त्वादव्याप्तेः अयमेको घट इत्यग्रिमग्रन्थस्य प्रत्येकपर्यवसितसंबन्धातिरिक्त-संबन्धाव्यवस्थापकत्वात्; विशेषणपूरणापाताच्चेति दिक्।

"तादृशेति"। प्रतियोगितावच्छेदकत्वं तृतीयार्थ इत्यभिमानः। प्रतियोगिविशेषणविशिष्टप्रतियोगितावच्छेदकविशिष्टवै[4]ति अभावविरोधात् धूमाभावसमनैयत्यम्। धूमशून्यवह्निकाले धूमाभावसत्त्वेन न समनैयत्यमतो

[1] "एवं च"—अ.

[2] "असिद्धेः"—अ.

[3] विरुद्धव्यावृत्तं बोध्यम्—अ.

[4] "विशिष्टवत्तया"—अ.

धूमकालीनेति[1]। एतच्च काल एव द्रव्यमव्याप्यवृत्तीतिमते; तेन नितम्बादौ वह्न्यादिसत्त्वे शिखरे धूमाभावस्य तादृशतृणादेश्च सत्त्वेन समनैयत्यभङ्ग इति वह्नित्वस्य प्रतियोगितावच्छेदककोटिप्रवेश आवश्यकः। न चैतन्मते तृणादि-वारणाय वह्नित्वस्य प्रतियोगिविशेषणत्वमस्तु शिखरादौ अयःपिण्डीयवह्न्य-न्तरसंभवादिति शंकानवकाशः। धूमवद्वृत्तित्वविशिष्टवह्निमतीति अयः-पिण्डसाधारणदीर्घं धूमध्वंसकालानुवृत्तं वा वह्निमभिप्रेत्य धूमकालावच्छिन्न-धूमवन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वस्य वा निवेशः; प्रयोजनाभावेन वह्नित्वस्य न प्रतियोगितावच्छेदककोटिप्रवेश इति भावः। देशतोऽपि द्रव्याव्याप्यवृत्तित्वमते च देशकालसाधारणावच्छेदकत्वमङ्गीकृत्य धूमवद-वच्छिन्नत्वं धूमवदवयवावच्छिन्नत्वं वा दत्त्वा समनैयत्यमुपपाद्यमिति वदन्ति।

उक्तप्रतीतौ तृतीयया वह्नित्ववैशिष्ट्योल्लेखो[2] न संभवति। तद-भावस्य सामान्यरूपेण विशेषाभावत्वापत्तेः[3] इत्यनायत्त्या वह्नित्वस्य प्रति-योगितावच्छेदकत्वमावश्यकमित्यत आह "अस्तु वेति"। पूर्वाभिमतपर्याप्ति-प्रवेशं स्मारयति—"प्रतीति"। वस्तुतस्तु पूर्वकल्पेऽपि पर्याप्तिनिवेश आवश्यकः; अन्यथा वह्निसाधारणाधेयतायाः प्रतियोगितावच्छेदकत्वात् अतिव्याप्तितादवस्थ्यात्; परं तु आधेयता नानैव तदनुगमकं चाधेयतात्वं वृत्तित्वविशेषसंबन्धेन धूमवत एव वा प्रतियोगितावच्छेदकत्वम् तद-वच्छिन्नाधिकरणतायाश्च धूमकालावच्छेदेनैव धूमवति सत्त्वात् इत्युच्यते; तदा तत्र न प्रयोजनमित्याशयेन तत्कल्पे तदनुत्कीर्तनमिति।

[1] धूमकालेति; अ; गादाधर्यामपि धूमकालीनेति नास्ति—स्व.

[2] वैशिष्ट्यस्योल्लेखो"—अ.

[3] अनन्तरम् "अनुद्धारात्" इत्यधिकपाठः—अ.

एतेन यथा वह्नित्वेन धूमवद्वृत्तित्वविशिष्टाभावस्य वह्नित्वसहितम[1]-सहितं वा प्रतियोगिविशेषणमेव प्रतियोगितावच्छेदकम् तथा वह्नित्वेन तार्णातार्णदहनाभावस्यापीति सूचितम्। तेन चक्रवर्त्तिलक्षणे नेदृशाभावमादाय दोषः।

"घटभिन्नत्वेनेति"। नन्वत्र धूमत्वमात्रं प्रतियोगितावच्छेदकं स्यात्[2]। वह्नित्वेन प्रमेयसामान्याभावभिन्नस्य वह्नित्वेन महानसीयवह्निघटान्यतराभावस्येव घटभिन्नत्वेन प्रमेयसामान्याभावान्यस्य[3] एतदभावस्य यत्किञ्चित्प्रतियोग्यवृत्तिधर्मावच्छिन्नाभावप्रभेदस्य सर्वमतसिद्धत्वात्। वह्नित्वेन प्रमेयसामान्याभावप्रतियोगिताया वह्निमात्रवृत्तित्वमतेऽपि वह्नित्वावच्छिन्नमहानसीयवह्निघटान्यतरवृत्तिप्रतियोगित्वान्तरमावश्यकम् कृत्स्नवह्न्यवृत्तित्वात्। घटव्यावृत्तत्वे तु सामान्यरूपेण विशेषाभावत्वापत्तेः। अन्यतरत्वेन प्रतियोग्युल्लेखश्च प्रतियोगिताया व्यासज्यवृत्तित्वं नास्तीति सूचनाय।

केचित्तु—धूमत्वमात्रस्यावच्छेदकत्ववारणाय प्रतियोगिविशेषणतापन्नांशे अवच्छेदकत्वावगाहिप्रत्ययः असति बाधके प्रतियोगिविशेषणम् यद्यत् तत्रैवावच्छेदकत्वमवगाहते। सति च बाधके न क्वापि तत्र समुदायस्य प्रत्येकानन्यत्वात्; अन्यथा नीलो घटो नास्तीत्यत्रापि घटसामान्याभावादिभानापत्तेरिति नियममाहुः।

"भेदत्वेनेति"। अयोगोलकभेदशून्यघटाभाववति तत्प्रतीतिसत्त्वात् नान्यतरत्वं प्रतियोगितावच्छेदकम्। न च भेदत्वेन अयोगोलकभेदघटान्यतराभावः कुतो नोक्तः; संयोगाद्यवच्छिन्नप्रतियोगिताकस्य तस्य केवलान्वयित्वात्। विशेषणताविशेषावच्छिन्नस्य च तस्यान्यतरत्वे एव प्रति-

[1] "असहितमि" ति नास्ति—अ.

[2] अनन्तरं "न स्यात्" इत्यधिकपाठः—अ.

[3] प्रमेयसामान्याभावस्य—अ.

योगितावच्छेदकतासंभवात् । अयोगोलकभेदशून्यस्य तत्संबन्धेन घटवतोऽप्रसिद्धत्वात् । विशेषणताविशेषावच्छिन्नायोगोलकभेदद्रव्यान्यतराभावस्तु नोक्तः ; लाघवेनायोगोलकभेदत्वस्यैव तत्प्रतियोगितावच्छेदकत्वात् । तेन संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यानुपपत्तेश्च । "एवमिति" । घटादावपि तादृशप्रतीतिसत्त्वात् नान्यतरत्वं प्रतियोगितावच्छेदकम् । स्वमते धूमभेदस्य लक्षणाघटकत्वेऽपि मतान्तरे साध्यतावच्छेदकसंबन्धघटितव्यापकतासत्त्वात् तत्रापि इयं शंकेत्याशयेन प्रदर्शनम् । धूमभेदमादाय चेदतिव्याप्तिर्वार्यते ; तदा मतान्तराश्रयणमपि सुकरमिति वा आशयः । धूमाद्यभावप्रतियोगितायाः न्यूनवृत्तिभिन्नं द्रव्यत्वादिकमादाय दोषादाह—"अवच्छेदकमिति" । ननु यत्किञ्चित्प्रतियोग्यवृत्तित्वं न्यूनवृत्तित्वं ; यत्किञ्चित्वघटितत्वेन दुर्वचमित्यत आह—"न्यूनेति" । न च ज्ञेयत्वत्वेन वाच्यत्वाभावस्य एकमात्रवृत्तिप्रतियोगिताकतया तन्न्यूनवृत्तित्वाप्रसिद्धिः । तादृशभावस्य वाच्यत्वत्वेन घटाद्यभावाभिन्नत्वेन तत्प्रसिद्धेः । एवमेकमात्रवृत्तिसाध्यके एतद्रूपाभावादेः एतद्रूपकालावच्छिन्नैतद्रूपवद्वृत्तित्वावच्छिन्नैतद्रूपान्यप्रमेयाभावाभिन्नतया तत्प्रसिद्धिर्बोध्या ।

वस्तुतस्तु स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्वसमानाधिकरणत्वोभयाभावो निवेश्यः ; भेदे चोक्तरीत्या प्रतियोग्यवृत्तित्वमावश्यकम् । अन्यथा द्रव्यत्वाभावादेः तादृशप्रतियोगितावच्छेदकाप्रसिद्ध्या अव्याप्तेः ।

"अव्याप्तिरिति" । न च हेतुसमानाधिकरणाभावेऽपि तादृशधर्मावच्छिन्नप्रतियोगिताकत्वनिवेशात् नायं दोषः ; तथा सति धूमाभावादीनामुक्तरीत्या लक्षणाघटकत्वेन व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वेन घटाभावाभिन्नतया अतिव्याप्तेः ; धूमाभावस्य प्रतियोगितानतिरिक्तवृत्तिसत्त्व-

[1] "एतद्रूपत्वे न्यूनवृत्तित्ववारणाय"—अ.

द्रव्यत्वाद्यवच्छिन्नसामानाधिकरण्यादतिव्याप्तेः। "अवच्छेदकमिति"। एवमुत्तरत्रापि। वह्नित्वेन घटभिन्नत्वेन वा महानसीयवह्निघटान्यतराभावस्य तादृशावच्छेदकाप्रसिद्धिः महानसीयवह्न्यभावाभिन्नत्वमते तु तादृशावच्छेदकं महानसीयवह्नित्वमेवेत्यव्याप्तिरतो रूपमपि निरुक्तन्यूनवृत्तिभिन्नत्वेन निरुक्तानतिरिक्तवृत्तित्वेन वा विशेषणीयम्। तेन धूमवान् वह्नेरित्यादौ साध्यासामान्याभावादेः प्रमेयसामान्यवृत्तिप्रतियोगिताकत्वेऽपि नातिव्याप्तिः।

नन्वत्र स्वनिष्ठव्याप्यत्वं प्रतियोगितावच्छेदकताघटकसंबन्धेन ग्राह्यम्। अन्यथा गगनादेः स्वरूपसंबन्धेन विषयितादिसंबन्धेन च वृत्तिमत्त्वे[1] अप्रसिद्धेः; प्रमेयसामान्यवृत्तिप्रतियोगितायाः तत्संबन्धेन गगनव्यापकत्वात्। एवं च तेन[2] संबन्धेन वह्नित्वादेः साध्यतावच्छेदकत्वेऽप्रसिद्धिरित्यत आह—"स्वन्यूनेति"। अत्रापि एकव्यक्तिसाध्यके साध्यसामान्याभावस्य स्वन्यूनवृत्तिप्रतियोगित्वाप्रसिद्धिः उक्तरीत्या उभयाभावं वा निवेश्य वारणीया। नन्वप्रसिद्धिवारणाय प्रतियोगितावच्छेदकताघटकसंबन्धेन स्वनिष्ठव्याप्यत्वं यत् तद्घटितं स्वव्यापकतत्कान्यत्वतत्सामानाधिकरण्योभयाभाववत्त्वं रूपविशेषणं पर्यवसन्नम्। एवं च कालिकसंबन्धेन वह्नित्वविशिष्टस्य साध्यत्वे साध्याभावो न लक्षणघटकः; किन्तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको द्रव्यत्वादिना गुणाद्यभाव इति किम् ईदृशप्रतियोगिताविशेषणेनेति चेन्न; लाघवमात्रादेवोत्तरकल्पस्यावतारणीयत्वात्। घटभिन्नत्वेन घटमहानसीयवह्न्यन्यतराभाववारणाय च रूपावच्छिन्नप्रतियोगितायामपि स्वन्यूनवृत्तिभिन्नत्वं निवेश्यम्।

अत्र कल्पत्रयेऽपि यथायथं धूमवद्वृत्तित्वविशिष्टद्रव्याभाववह्निधूमोभयाभावादिवारणाय प्रतियोगितावच्छेदकतापर्याप्तेः वाच्यतया गौरवम्।

[1] "वृत्तिमत्त्वेन"—अ.

[2] "तेन तेन"—अ.

एवं समनियताभावभेदपक्षे वह्नित्वगगनाभ्यां वह्नित्वेन्धनत्वाभ्यां वा वह्न्यभावमादायासंभवः। वह्नित्वेन घटाभावमादाय तथात्वासंभवात्। एवं यद्यपि महानसीयवह्न्यभावस्य वह्नित्वेन महानसीयवह्निघटान्यतराभावैक्येऽपि अवच्छेदकविशेषणेन वह्नित्ववारणात् अवच्छेदकतापर्याप्त्यधिकरणशब्देन न[1] महानसीयवह्नित्वस्योपादानम् रूपविशेषणस्य वह्नित्वेऽसत्त्वेन तस्य लक्षणाघटकत्वात्। तथापि पर्वतान्यत्वविशिष्टसत्ताभावमादायाव्याप्तिः। सत्तात्वे रूपविशेषणसत्त्वात्, विशिष्टसत्तात्वस्यावच्छेदकतापर्याप्त्यधिकरणत्वात्। तस्य पर्वतान्यत्वविशिष्टत्वेन सत्तापर्वतत्वान्यतराभावत्वरूपत्वेऽपि[2] तादृशविशिष्टत्वस्यावच्छेदकविशेषणासत्त्वेन दुर्धरत्वादतः वृत्तिमद्रूपपर्याप्तप्रतियोगितावच्छेदकताकत्वमपि निवेश्यमिति गौरवमिति तदुभयानिवेशमभिप्रेत्याह— "तत्प्रतियोगितेति"। वृत्तित्वं प्रतियोगितावच्छेदकसंबन्धेन; प्रयोजनं स्फुटम्। धूमाभावस्य प्रतियोगितासमानाधिकरणतत्प्रतियोगितानिरूपकीभूताभाववद्वृत्तितावच्छेदकान्यत्वस्य वह्नित्वादौ सत्त्वादतिव्याप्तिरतोऽवच्छेदकेति। तदन्यान्तं रूपविशेषणमपि कार्यम्। तेन घटभिन्नत्वेन घटमहानसीयवह्न्यन्यतराभावादिनिरासः। प्रतियोगितायां वा स्वावच्छिन्नसमानाधिकरणाभावनिरूपितत्वे सति स्वसमानाधिकरणं यद्यत्तदन्यत्वं देयम्। वह्निघटोभयत्वादीत्यादिना जलवृत्तिद्रव्यत्वाद्यभावपरिग्रहः। चतुर्थपक्षे तु समवायसंबन्धावच्छिन्नजलत्वविशिष्टत्वावच्छिन्नाभावस्य समवायावच्छिन्नाधेयतासंबन्धेन जलावच्छिन्नाभावस्य च साध्यव्यापकतावच्छेदकद्रव्यत्वादिनिष्ठप्रतियोगिताकस्य परिग्रहः। यदि चोक्तविशेषणस्थाने प्रतियोगितायां स्वनिरूपकीभूताभाववद्वृत्तितावच्छेदकत्वव्यधिकरणधर्मानवच्छिन्नत्वोभयाभाव-

[1] नकारो नास्ति—अ.

[2] अभावरूपत्वेऽपि—अ.

वत्त्वं निवेश्यते वैयधिकरण्यं च धूमाभावप्रतियोगितायाः प्रमेयमात्रवृत्तित्वमते यत्किञ्चित्प्रतियोग्यवृत्तित्वं तदा [[1]न कोऽपि दोषः इति बोध्यम्] ।

"अप्रसिद्धयेति" । यद्यपि पर्वतादेः कालोपाधित्वानुपगमे वह्न्यभावस्य हेतुमद्वृत्तित्वासंभवेऽपि कालो घटवान् कालपरिमाणादित्यादौ साध्यसामान्याभावस्य कालिकसंबन्धेन हेतुमद्वृत्तित्वात् अव्याप्तिरेव ; तथापि स्वरूपसंबन्धेन हेतुसामानाधिकरण्यमभिप्रेत्येदम् । अन्यथा त्वाह— "अयमिति" । "एतत्क्षणान्यवृत्तित्वेति" । एतत्क्षणान्यत्वस्य [2]व्याप्यवृत्तितया स्वरूपसंबन्धेन तद्वृत्तित्वविशिष्टवाच्यत्वाभावः एतत्क्षणावच्छेदेन सुलभः । स च एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्वाधिकरणतायाः सर्वत्र सत्त्वेन प्रतियोगिवैयधिकरण्याभावात् लक्षणघटकः । नन्वेतत्क्षणान्यत्वस्य व्याप्यवृत्तितया एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्वाभावस्य साध्यवति एतत्क्षणरूपशब्दज्ञानादौ प्रतियोगिवैयधिकरण्यात् न लक्षणघटकत्वमत आह— "विषयतेति" । एतत्क्षणान्यक्षणेति[3] पाठे एतत्क्षणान्यीयकालिकसंबन्धावच्छिन्नवृत्तित्वविशिष्टवाच्यत्वाभावो न प्रतियोगिव्यधिकरणः ; एतत्क्षणस्यापि स्वान्यक्षणसमानकालतया एतत्क्षणान्यक्षणासमानकालीनाप्रसिद्धेः ; सर्वत्रापि तादृशवाच्यत्वसत्त्वात् ; तथा च क्षणिकपदार्थनङ्गीकारादयं लक्षणघटको भवतीत्याशयः । तत्तत्क्षणवृत्तित्वविशिष्टवाच्यत्वत्वावच्छिन्नानधिकरणत्वं तत्तत्क्षणासमानकालीनपदार्थ इति तादृशवाच्यत्वाभावः प्रतियोगिव्यधिकरणत्वात् न लक्षणघटकः । तत्तत्क्षणावृत्तिवाच्यत्वं त्वप्रसिद्धमिति तत्परित्यागः । क्षणिकपदार्थाङ्गीकारेऽपि अभावं दर्शयति—"विषयतेति" । महा-

[1] [ ] एतदन्तर्गतपाठो नास्ति । तत्स्थाने "असंभवासंभवादाह—अत एवेति"—अ.

[2] "अव्याप्यवृत्तितये"ति—अ.

[3] एतादृशपाठः गादाधर्यां दर्शितः—स्व.

प्रलयानङ्गीकारे जन्यज्ञानसामान्याभावासत्त्वात् आह—"विश्वेति"। "प्रतियोगीति"। साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य घटत्वाद्यवच्छिन्नप्रतियोगित्वरूपगुरुधर्मसाधारण्येऽपि तदवच्छिन्नाभावाप्रसिद्धेर्नासंभवः।

यत्तु—प्रतियोगिवैयधिकरण्याघटितसाध्यवन्निष्ठेत्यादिव्यापकतानिवेशने गोत्वादिभेदस्य लक्षणघटकतापत्त्या असंभवः; साध्यवन्निष्ठगोत्वाभावप्रतियोगितायां लाघवेन गवेतरावृत्तित्वस्यैवावच्छेदकतया सकलगोवृत्तित्वे सति गवेतरावृत्तित्वस्यानवच्छेदकत्वेन व्यापकतावच्छेदकत्वात्। न च गोत्वभेदस्यापि प्रतियोगितावच्छेदकं गवेतरासमवेतत्वमात्रमिति वाच्यम्; रूपादौ गोत्वं न भवतीति प्रत्ययानुरोधेन तत्रोक्तविशिष्टधर्मस्यैव प्रतियोगितावच्छेदकत्वात् इत्यतः साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं यद्यत् तद्भेदकूटवत्त्वमेव साध्यव्यापकतावच्छेदकत्वं विवक्षणीयम्; एवं च साध्यवत्त्वप्रकारकप्रमाव्यक्तेः साध्यवदसंबद्धत्वविरहेण साध्यव्यापकतावच्छेदकत्वं तादृशप्रमाव्यक्तित्वेऽक्षतमिति तदवच्छिन्नाभावमादायैव सर्वत्र लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेति ग्रन्थासङ्गतिर्दुर्वारैवेति।

तदसत्। स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकताया निवेशितत्वात्। तदनिवेशेऽपि गौरित्याकारकज्ञानीयप्रकारताविशेषस्यैवातिलाघवेन भेदप्रतियोगितावच्छेदकत्वाच्च। [साध्यतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यनिवेशात् धूमाभावस्य कालिकसंबन्धेन धूमत्वादिविशिष्टवह्न्यादिकं प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यप्रवेशात् कालिकसंबन्धेनायोगोलकादेः धूमवत्त्वं चादाय नातिव्याप्तिः।][1]

ननु प्रमेयसाध्यके साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावाप्रसिद्धिरत आह—"प्रमेयेति"। "लघुरूपेति"। विषयितासंबन्धेन प्रमे-

[1] [ ] एतदन्तर्गतपाठः नास्ति—अ.

यवह्नित्ववज्ज्ञानाभावस्य संयोगसंबन्धावच्छिन्नप्रतियोगिताकस्य लाघवेन वह्नित्व एव प्रतियोगितावच्छेदकत्वमिति भावः। ननु प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं न निवेश्यते वैयर्थ्यात्; किन्तु साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यमेव। उक्तस्थले च समवायावच्छिन्नप्रतियोगिताकं विषयितया प्रमेयवह्नित्ववज्ज्ञानाभावमादाय [नातिव्याप्तिरिति चेन्न; तथा सति प्रमेयसाध्यकेऽपि विषयितया प्रमेयत्ववज्ज्ञानाभावमादाय][1] लक्षणसङ्गतिसंभवात् प्रतियोग्यवृत्तिश्चेत्यस्यानवतारापत्तेः।

वस्तुतः[2] तद्ग्रन्थावतारार्थं प्रतियोगितावच्छेदकताघटकसंबन्धेन साध्यव्यापकतावच्छेदकत्वं न प्रवेश्यम्; किन्तु लाघवेन साध्यतावच्छेदकनिष्ठप्रतियोगितावच्छेदकतायां व्यधिकरणसंबन्धावच्छिन्नत्वमेव साध्यतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यनिवेशेनानतिप्रसङ्गात्। एवं च प्रतियोगितायामपि न साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं प्रवेश्यते; प्रयोजनाभावादिति शंकार्थः। "लघुरूपेति"। विषयितासंबन्धेन प्रमेयवह्नित्ववज्ज्ञानाभावो[3] न लक्षणघटकः अवच्छेदकतायाः व्यधिकरणसंबन्धानवच्छिन्नत्वात्। साध्यतावच्छेदकव्यापकरूपावच्छिन्नाभावनिवेशे तु सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावमादायाव्याप्तिरिति कृतबुद्धयो विदांकुर्वन्तु।

द्रव्यत्वत्वेन घटात्यन्ताभावस्य साध्यतावच्छेदकसंबन्धेनातथात्वादाह—"साध्यतावच्छेदकसंबन्धेन व्यापकत्वमिति"। ननु महाकालान्यत्वविशिष्टघटवान् कालत्वादित्यादावतिव्याप्तिः। संयोगेन वह्न्यादिसाध्यके साध्यवति उत्पत्तिकालावच्छेदेन तदभावसत्त्वात् साध्यतावच्छेदकसंबन्धेन साध्यव्यापकत्वाप्रसिद्धिवारणाय तत्र प्रतियोगिवैयधिकरण्यस्यावश्यकतया

[1] [ ] एतदन्तर्गतपाठो नास्ति—अ.

[2] "वस्तुतस्तु"—अ.

[3] "समवायावच्छिन्न"—अ.

तद्धटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य कालिकसंबन्धावच्छिन्नमहाकालान्यत्वाभावस्य महाकालावच्छेदेन हेतुमद्वृत्तेः साध्यतावच्छेदकीभूतकालिकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वादित्यत आह—"महेति"। तथा च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यदले प्रतियोगितावच्छेदकतापर्याप्तिनिवेश आवश्यक इति भावः।

वस्तुतस्तु—साध्यतावच्छेदकसंबन्धेन व्यापकताघटितपूर्वलक्षणे महाकालान्यत्वविशिष्टघटाभावमादायापि अतिव्याप्तिरित्यस्वरसादेतल्लक्षणारंभः अत्र तु सा नास्तीति भावः।

ननु प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारानुरोधेन तदावश्यकत्वमत आह—"तन्निवेशेऽपीति"। "पूर्वोक्तेति"। घटत्वाभावाभावघटभेदाभावयोर्घटत्वरूपतया किञ्चिद्विशिष्टस्वाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वात्। एवं व्यधिकरणधर्मावच्छिन्नाभावस्यापि। नन्वेतद्दोषवारणाय एतन्मतेऽपि स्वसमानाधिकरणतत्प्रतियोगितानिरूपकीभूताभाववद्वृत्तितावच्छेदकान्यत्वेन प्रतियोगितावच्छेदकं विशेषणीयम्। न च सत्तावान् जातेरित्यादौ सत्ताभावस्य प्रतियोगितावच्छेदकसत्तात्वे संबन्धसामान्येन तत्प्रतियोगितानिरूपकीभूताभाववद्वृत्तितावच्छेदकत्वसत्त्वादव्याप्तिः। तत्प्रतियोगितावच्छेदकविशिष्टतत्प्रतियोगिताश्रयवत्ताग्रहविरोधितानियामकसंबन्धेन तादृशाभाववत्त्वस्य निवेशनीयत्वात्[1]। मैवम्;—उक्तरीत्या साध्यव्यापकत्वस्य प्रतियोगिवैयधिकरण्यघटिततया घटत्वाभाववान् पटत्वादित्यादौ किञ्चिद्विशिष्टसाध्याभावत्वं तद्धटितसाध्यव्यापकतावच्छेदकं तदवच्छिन्नाभावो घटत्वाभावः तस्य तादृशप्रतियोगितावच्छेदकाप्रसिद्ध्या अव्याप्तेः। व्यधिकरणधर्मावच्छिन्नाभावानुपगमेऽपि अयमात्मा ज्ञानात्

[1] "तद्वत्ताज्ञानं प्रति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टतदभाववत्ताज्ञानस्य विरोधित्वात्—अ.

परममहत्त्वम् आकाशपरिमाणत्वादित्यादौ पूर्वक्षणवृत्तित्वविशिष्टसाध्यतावच्छेदकं साध्यव्यापकतावच्छेदकं तदवच्छिन्नाभावमादाय लक्षणसमन्वयसंभवात् अवतारकत्वानुपपत्तेश्च । न च रूपमपि तेन विशेषणीयम्; तथापि तादात्म्येन प्रमेयसाध्यकेऽव्याप्तेः; समवायादिसंबन्धावच्छिन्नप्रमेयाभावस्य समवायित्वेन प्रमेयत्ववद्भेदस्य च रूपस्य प्रतियोगितावच्छेदकस्य च तादृशविशेषणशून्यत्वात् लक्षणघटकाभावा[1]प्रसिद्धेः । [2]प्रतियोगितावच्छेदकसंबन्धसामान्ये यदवच्छिन्नप्रतियोगिकत्वतदभावाधिकरणवृत्तित्वोभयाभावः तत्त्वनिवेशे तु प्रतियोगितासामानाधिकरण्याप्रवेशप्रसङ्ग इत्यन्यैरनुज्जृंभितः पन्थाः ।

अथैतन्मते भावभिन्नत्वनिवेशात् घटत्वात्मकाभावस्य प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यनिवेशाच्च घटत्वाभावत्वादिना घटाभावस्य वारणात् अभावाप्रसिद्ध्यैव नातिव्याप्तिः; घटत्वाभाववान् पटत्वादित्यादौ घटत्वाभावत्वादिना पटाद्यभावादेः समनियताभावभेदमते भावरूपप्रतियोगितावच्छेदकावच्छिन्नाप्रसिद्ध्या अव्याप्तिरतो भाववृत्तित्वं रूपविशेषणम्; वाच्यत्वत्वेन [3]ज्ञेयत्वाभावमादायैव लक्षणसङ्गतिरिति । मैवम्;— प्रतियोगितायां संबन्धावच्छिन्नत्वस्य वैयर्थ्यात् अवतारकत्वानुपपत्तेः ।

"यावदिति" । एतन्मते घटत्वाभावादिसाध्यके तत्प्रकारकप्रमाद्यभाव एवातिव्याप्तिवारकः । दोषान्तरमाह—"ज्ञेयत्वत्वादिनेति" । "किन्त्विति" । नित्यज्ञानं नित्यसविषयकत्वादित्यादौ दैशिकविशेषणतासंबन्धावच्छिन्नेच्छान्यत्वाभावमादायानतिप्रसङ्गात् वीप्सा न कार्येति लाघवं द्रष्टव्यम् । "व्यभिचारिणीति" । न च प्रतियोगितावच्छेदकसंबन्धैक्य-

[1] "अभावाद्यप्रसिद्धेः"—अ.

[2] रूपविशेषणम्—अ.

[3] "ज्ञेयत्वाद्यभावम्"—अ.

विवक्षयैव निर्वाहात् भावपदं व्यर्थमिति वाच्यम्; स्वाभावत्वस्य साध्यव्यापकतावच्छेदकत्वमादायापि दोषसंभवात्। "भावेति"।

अत्रेदं बोध्यम्—किञ्चिद्विशिष्टस्य स्वस्य योऽभावः तद्वृत्तेः तादृशाभावत्वरूपप्रतियोगितावच्छेदकस्य तादृशाभावनिष्ठप्रतियोगितासमानाधिकरणत्वे सति तत्प्रतियोगितानिरूपको यः शुद्धस्वात्मकोऽभावः तद्वृत्तितावच्छेदकत्वेनातिव्याप्त्यभावात् भावपदं चतुर्थकल्पे व्यर्थम्।

ननु प्रतियोगितावच्छेदकं तत्प्रतियोगितासमानाधिकरणेत्यादिरीत्या न विशेषणीयम् सुतरामेव रूपम् घटभिन्नत्वेन धूमघटान्यतराभावस्य धूमाभावैक्येऽपि घटभिन्नत्वस्य धूमत्वादिनिष्ठप्रतियोगितावच्छेदकताघटकसमवायसंबन्धेनावृत्तित्वेन दुर्धरत्वात्। एवं चोक्तरीत्या भावपदसार्थक्यमिति चेत्, मैवम्। वह्नित्वेन धूमायोगोल[1]कावृत्तिवह्न्यन्यतराभावस्य धूमाभावरूपतया अतिव्याप्तिवारणाय प्रतियोगितावच्छेदके तद्विशेषणावश्यकत्वात्।

"सामानाधिकरण्यम्"। तदधिकरणे संबन्धसामान्येन वृत्तित्वम्। न च विशिष्टस्वाभावविशिष्टाभावस्य विशिष्टस्वस्वरूपतायामनतिप्रसङ्गेऽपि शुद्धस्वस्वरूपतायामतिप्रसङ्गो दुर्वार इति वाच्यम्। अयोगोलके विशिष्टस्वाभावविशिष्टाभावत्वेन वृत्तेरनङ्गीकारेण तद्वारणात्। "स्वस्मात्"। धूमाभावात्। भावः। अयोगोलकीयवह्न्यादिः; तत्प्रमाविषयत्वं च। "भावतयेतीति[2]"। समनियतयोर्भावभिन्नयोरैक्यं न तु भावाभावयोरपि; तथा सति प्राभाकरा एव विजयेरन्निति भावः। "[3]एवं सतीति"।

[1] धूमवद्भिन्नेत्यर्थः—अ.

[2] भावतयेति प्रतीकम् अ—स्व.

[3] "एवं च सती"त्यपि पाठो गादाधर्यां वर्तते—स्व.

अत्र वदन्ति—एवं सतीत्यस्य भावभिन्नत्वे[1] सतीत्यर्थे प्रतियोगि-वैयधिकरण्याघटितसाध्यव्यापकताया एवात्र निवेशितत्वात् कपिसंयोगस्य लक्षणघटकत्वमेव नेत्युपष्टम्भासङ्गतिः। न च साध्यवन्निष्ठत्वं स्वरूपसंबन्धेन निवेश्यमन्यथा स्पन्दो गतित्वादित्यादौ साध्यवति कालिकसंबन्धेन साध्या-भावसत्त्वात् वाच्यत्वत्वेन घटाद्यभावमादायातिव्याप्तेरनुपदं स्वयमपि दैशिक-विशेषणतया साध्यवन्निष्ठत्वोक्तेरिति वाच्यम्; तथा सति पर्वतत्वरूपाभाव-वारणार्थमेव भावभिन्नत्वनिवेशसंभवात् ह्रदत्वात्मकाभावपर्यन्तानुधावनस्य निर्बीजत्वापातात्। न च प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेनैव साध्यवन्निष्ठत्वं निवेश्यम्; तथा सति पर्वतत्वरूपाभावस्य वारित-त्वात् ह्रदत्वात्मकाभावपर्यन्तानुधावनसार्थक्यमिति वाच्यम्। तथा सति निरवच्छिन्नसंयोगाभाववत्ताज्ञानं प्रति समवायसंबन्धेन संयोगवत्ताज्ञानस्य विरोधित्वात् उपष्टम्भासङ्गतिर्दुर्वारैव। ननु साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्ध-स्वविशिष्टसामान्यकभिन्नं यद्रूपं तदवच्छिन्नप्रतियोगिताकाभावे भावभिन्नत्व-निवेशे सतीत्येव तदर्थ इति चेन्न; प्रतियोगिवैयधिकरण्याघटिताया एव व्यापकताया इति ग्रन्थविरोधात्। जन्यज्ञानत्वादेरुक्तव्यापक-तावच्छेदकतया तदवच्छिन्नाभावमादाय लक्षणसङ्गतेरवतारकत्वानुपपत्तेश्च। तस्मादेवं सतीत्यस्य प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकत्वोपादाने सतीत्येवार्थः इति।

यद्वा एवं सतीत्यस्य भावभिन्नत्वविवक्षणे सतीत्येवार्थः। प्रतियोगि-मत्ताग्रहविरोधितानियामकसंबन्धेन वृत्तित्वं विवक्षितम्; संबन्धो निरवच्छिन्न-समवायः। तेन संयोगस्य साध्यवद्वृत्तित्वासंभवात् कपिसंयोगात्मकाभावो लक्षणघटकः; स च न भावभिन्न इति द्रष्टव्यम्।

[1] "भावभिन्नत्वनिवेशे"—अ.

वस्तुतस्तु दैशिकविशेषणतया साध्यवन्निष्ठत्वं प्रविष्टमित्याशयेनेदम् । पर्वतत्वरूपाभावोपेक्षा च सर्वाधारतानियामकसंबन्धान्यसंबन्धावच्छिन्नतन्निवेशोऽस्तु[1] इत्याशंकावारणाय ।

"पूर्वोक्तदिशेति" । सत्तावान् जातेरित्यादौ कालिकसंबन्धेन हेतुसमानाधिकरणस्य सत्ताभावस्य गगनादौ तादृशप्रतियोगिसामानाधिकरण्याभावात् अव्याप्तिः यदि स्वविशिष्टपदं न स्यादित्यर्थः । यद्यपि पूर्वलक्षणे दैशिकविशेषणतया हेतुसामानाधिकरण्योक्तावपि गगनादिवृत्तित्वविशिष्टसत्ताभावमादायाव्याप्तेः स्वविशिष्टपदमावश्यकम् । परन्तु तत्राभावा इति स्वरूपकीर्तनमात्रं पर्वतत्वात्मकाभावस्य स्वाभावरूपप्रतियोगिसामानाधिकरण्यात् पर्वतत्वाभावनिष्ठप्रतियोगितायाः साध्यव्यापकतानवच्छेदकत्वात् वा दैशिकविशेषणतारूपसंबन्धभावभिन्नत्वयोर्वैयर्थ्यात् तथापि एतल्लक्षणे दैशिकविशेषणतानिवेशेन ह्रदत्वात्मकाभाववारणेऽपि स्वविशिष्टत्वनिवेशवैयर्थ्यभयेन अभावानामिति दीधित्यनुसारेण गुरुतरभावभिन्नत्वनिवेश उक्त इति ।

ननु प्रथमलक्षणे साध्यनिष्ठसंबन्धप्रतियोगिताया व्यापकतावच्छेदकत्वात् तन्निरूपकस्य यावदन्तर्गतसंबन्धस्य लक्षणघटकताप्रसङ्गेन गौरववारणाय अभावा इति अभावीयप्रतियोगितालाभार्थमिति कथमभावा इति स्वरूपकीर्तनमात्रमित्युक्तमिति चेन्न; संबन्धाभावप्रतियोगितयोः एकरूपत्वाभावेनाभावीयविलक्षणप्रतियोगितायां साध्यव्यापकतावच्छेदकत्वनिवेशसूचकत्वेऽपि तदर्थाप्रवेशादिति ।

कालिकसंबन्धावच्छिन्नप्रतियोगिताकगगनाभावाभावत्वस्य वह्न्यादिव्यापकतानवच्छेदकत्वात् वह्न्यादिसाध्यकेऽदोषात् अयमात्मेति । स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन साध्यवद्वृत्तित्वं वाच्यम्; अन्यथा

[1] "तन्निवेश एवास्तु"—अ.

वह्न्याद्यधिकरणे वह्न्याद्यभावस्य कालिकसंबन्धेन सत्त्वात् वह्नित्वादेः साध्यव्यापकतावच्छेदकत्वं न स्यादित्याशयः । समनियताभावैक्यमते तु नैतत्शंकावतारः तन्मते वाच्यत्वत्वादिरूप[1]प्रतियोगितावछेदकावच्छिन्न-सामानाधिकरण्यसंभवात् । स्वरूपसंबन्धेन साध्यवद्वृत्तित्वं निविष्टमित्यभि-प्रायेण समाधत्ते—"आकाशेति" ।

ननु वह्निमान् धूमादित्यादौ घटवृत्तिरूपध्वंसवदन्यत्वाभावादेः का-लिकसंबन्धेन हेतुसमानाधिकरणस्य भावरूपप्रतियोग्यप्रसिद्धेः घटत्वाभावादि-साध्यके यावदन्तर्गतघटत्वाभावत्वेन पटाद्य[2]भावस्य तत एवाव्याप्तिः । एवं गगनाभावत्वेन ह्रदत्वाभावत्वेन वा पटाद्यभावमादायासंभवश्चेत्यतः भाव-भिन्नत्वं परित्यज्य प्रकारान्तरमनुसरति—"अस्तु वेति" ।

केचित्तु—प्रतियोगितावच्छेदकावच्छिन्नभावनिवेशो न कार्यः ; किन्तु प्रतियोगितावच्छेदके अभाववृत्तित्वं निवेश्यम् ; एवं च पूर्वोक्तह्रद-वृत्तित्वविशिष्टस्वाभावविशिष्टत्वावच्छिन्नाभावस्यानतिरिक्तत्वेऽपि नातिव्या-प्तिः तत्प्रतियोगितावच्छेदकस्याभाववृत्तित्वात् ; एवं च घटभिन्नत्वेन घटधूमान्यतराभाव[3]वारणेऽपि अभावभिन्नत्वेन धूमघटाभावान्यतराभाववार-णायैव स्वन्यूनवृत्तिभिन्नप्रतियोगितावच्छेदकाद्युपादानमित्याहुः ।

"इदमिति" । न च तादृशग्रन्थासङ्गतिभयेन स्वप्रतियोगिता-वच्छेदकसंबन्धावच्छिन्नत्वविवक्षणमसङ्गतमिति वाच्यम् । नित्यज्ञानं नित्य-सविषयकत्वादित्यादौ समवायावच्छिन्ननित्यज्ञानत्वाद्यभावस्य विषयता-संबन्धेन साध्यव्यापकप्रतियोगिकस्य तेन संबन्धेन प्रतियोगितावच्छेदका-वच्छिन्नसामानाधिकरण्यादतिव्याप्तिवारणाय वीप्सामपेक्ष्य लाघवेन तद्भि-

[1] "वाच्यत्वादिरूप"—अ.

[2] पटाद्यभावभावस्य—अ.

[3] "अभावादिवारणेऽपि"—अ.

वक्षणात् । एवं च व्यापकताघटकसंबन्धावच्छिन्नप्रतियोगिताकस्य तेन संबन्धेन प्रतियोगिसामानाधिकरण्योक्तौ समवायविषयितयोर्व्यापकताघटकतया दोषावारणेन तादृशयत्संबन्धावच्छिन्नप्रतियोगिताकत्वमित्येतावत्पर्यन्ताभिधानवारणायेत्थमुक्तम् । अयोगोलकनाशजन्यसंयोगनाशसंभवात् उक्तमनुयोगितेति । अयोगोलकत्वप्रकारकप्रमाविषयत्वस्य कालत्वसंदेहात् कालिकसंबन्धोपेक्षा भाववृत्तित्वनिवेशपक्षे इदम् ।

वस्तुतस्तु प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्याविवक्षणे भावत्वं व्यर्थम् । तन्निवेशेऽपि कालिकसंबन्धेन धूमत्वविशिष्टवह्न्यादिसामानाधिकरण्यादिति ।

इदमापाततः—उक्तसंयोगादिध्वंसादिर्वारणायैव[1] भावत्वनिवेशसंभवात् । तावतापि प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यनिवेशप्रतिक्षेपसिद्धेः ; एतन्निवेशेन भावत्वनिवेशाप्रतिक्षेपाच्च ।

"व्यापकतावच्छेदकतायामपीति"। न च विषयितासंबन्धेन द्रव्यत्वत्वादिमज्ज्ञानाभावस्य किञ्चिद्विशिष्टस्वाभावत्वनिष्ठप्रतियोगितावच्छेदकताघटकीभूतस्वरूपसंबन्धेन द्रव्यत्वत्वविशिष्टो यो द्रव्यत्वादिरूपाभावः तत्सामानाधिकरण्यात् नाव्याप्तिरित्येतद्विशेषणवैयर्थ्यमिति वाच्यम् । शब्दवान् एतत्त्वादित्यादौ प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकं यत् सत्त्वादि विषयितासंबन्धेन तद्विशिष्टज्ञानाभावस्य हेतुमति दर्शितरीत्या समवायेन तादृशज्ञानसामानाधिकरण्याभावादव्याप्तेः तदुपादानादिति । अधिकमनुपदं वक्ष्यामः ।

"दर्शिताभावानामिति"। यद्यपि विषयितासंबन्धेन वाच्यत्वत्वविशिष्टज्ञानाभावादेः किञ्चिद्विशिष्टस्वाभावत्वनिष्ठस्वप्रतियोगितावच्छेदक-

[1] "वारणार्थमेव"—अ.

त्वघटकीभूतस्वरूपसंबन्धेन साध्यव्यापकतावच्छेदकवाच्यत्वत्वनिष्ठप्रतियोगितावच्छेदकताकत्वात् लक्षणघटकत्वमेव। न च प्रतियोगितावच्छेदकावच्छिन्नभावेत्यादिस्थले भाववृत्ति[1]प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टो यः तत्सामानाधिकरण्यनिवेशेऽपि व्यभिचारिणि दोषवारणसंभवात् उक्ताभावानां लक्षणाघटकत्वमेव तेषां भाववृत्ति[2]प्रतियोगितावच्छेदकताघ[3]टकविषयतासंबन्धेन वाच्यत्वत्वविशिष्टज्ञानासामानाधिकरण्याद्व्याप्तिवारणाय भाववृत्तिप्रतियोगितावच्छेदकताघटकसंबन्धेन साध्यव्यापकतावच्छेदकत्वस्यावश्यकत्वादित्या[4]शय इति वाच्यम्। तथा सति घटत्वाभाववान् [5]प्रमेयत्वादित्यादौ घटत्वाभावप्रकारकप्रमाविषयत्वाभावस्य स्वरूपसंबन्धेन स्वाभावरूपप्रतियोगिसामानाधिकरण्यादतिव्याप्तेः। घटत्वाभावप्रमाभावस्तु न प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकप्रतियोगिकः; तथापि तत्प्रतियोगितावच्छेदकताघटकसंबन्धेन व्यापकतावच्छेदकत्वं तद्वैशिष्ट्यं च विवक्षितमित्यदोषः। साध्यव्यापकतावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकत्वोक्तौ स्वाभावत्वनिष्ठप्रतियोगितावच्छेदकतायाः तादृशस्वरूपसंबन्धावच्छिन्नत्वं न हीयते इति तादृशाभावस्य लक्षणघटकत्वापत्तिः। तत्र तत्प्रतियोगितोपादानेऽपि धूमाद्यभावत्वादौ कालिकसंबन्धस्यापि व्यापकतावच्छेदकघटकतया अतिव्याप्तिरतो यत्संबन्धपर्यन्ताभिधानं स्यादतः तन्नोक्तम्।

ननु व्यापकतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टाभिधानेनातिव्याप्तिवारणसंभवात स्वप्रतियोगितावच्छेदकताघटकसंबन्धेन तद्वै-

[1] "भाववृत्तिवृत्ति"—अ.

[2] "भाववृत्तिवृत्ति"—अ.

[3] "घटकीभूतविषयिता"—अ.

[4] इत्याशयः इति नास्ति—अ.

[5] "मेयत्वादित्यादौ"—अ.

शिष्ट्यं निवेश्य वह्निमान् धूमादित्यादौ अव्याप्तिं प्रदर्श्य तेनैव संबन्धेन व्यापकत्वावच्छेदकत्वकथनमयुक्तमिति चेन्न; कालिकसंबन्धस्यापि धूमत्वनिष्ठ-व्यापकतावच्छेदकत्वघटकतया अतिव्याप्त्यनुद्धारापत्तेः; व्यापकतावच्छेद-कताघटकयावत्संबन्धनिवेशे गौरवात्। न च धूमवत्त्वप्रकारकप्रमाविषयत्वा-भावमादायैव नातिव्याप्तिः। एवमपि तादृशप्रमाविषयत्वस्यानुयोगिता-विशेषसंबन्धेन साध्यव्यापकतावच्छेदकत्वात् अतिव्याप्तेः। यादृशायोगोलके संयोगध्वंसो नियतः तन्मात्रान्तर्भावेन व्यभिचारिण्यतिव्याप्तेश्च। प्रतियोगि-तावच्छेदकावच्छिन्नभावोक्तावपि विषयताया विषयादिरूपत्वेन जन्यत्व-संभवात् वह्निमत्ताज्ञानविषयत्वे कालिकसंबन्धेन धूमप्रकारकप्रमाविषयतात्व-सत्त्वेनातिव्याप्तेरिति।

ननु वह्नावपि संयोगेन वह्नित्वं न वर्तते इति संयोगसंबन्धावच्छिन्न-वह्नित्वनिष्ठप्रतियोगितावच्छेदकताकाभावस्यापि साध्यवन्निष्ठाभावप्रतियोगि-तायाः सामानाधिकरण्येनानवच्छेदकत्वघटितलक्षणघटकतया प्रतियोगिताव-च्छेदकीभूतसंयोगेन तद्वैशिष्ट्यं दुर्घटमित्यव्याप्तिरतो दिगिति। तेन संबन्धेन वृत्तित्वस्यापि व्यापकतावच्छेदकत्वनिरुक्तिघटकत्वादिति।

इदं तु बोध्यम्—प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्ये प्रयोजनाभावेनाभावनिष्ठत्त्वत्यागे प्रतियोगितायामेव यावत्त्वोपादाने वा तन्निरूपकाभावस्यापि त्यागात् स्वविशिष्टत्वहेतुसामानाधिकरण्ययोः वैयर्थ्यम परंतु अवतारकत्वं न हीयत इति द्रष्टव्यम्। दीधितौ ज्ञेयत्वत्वादिना वाच्यत्वादीनामिति लक्षणद्वयाभिप्रायकतया प्रतियोगिविशेषणस्य प्रतियोगि-तावच्छेदकत्वार्थं चोक्तम्।

[1] "व्यापकतावच्छेदकत्व"—अ.

[2] विषयत्वत्वस्य—अ.

"वह्न्यादिभेदस्येति"। संबन्धभेदानिवेशेन कालिकसंबन्धेन तस्य प्रतियोगिवृत्तित्वसंभवेऽपि न क्षतिः। आदिना द्रव्यत्वादिभेदपरिग्रहात्। न च समनियताभावैक्यमते तस्य द्रव्यत्वत्वाभावतया द्रव्यत्वत्वरूपप्रतियोगिवृत्तित्वमिति वाच्यम्। समनियताभावभेदपक्षानुरोधेन प्रतियोगितावच्छेदकसंबन्धेन व्यापकताया आवश्यकत्वात्। [1]प्रतियोगितावच्छेदकसंबन्धेन साध्यव्यापकताया उक्तत्वात् व्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाद्यभावानां वह्निमान् धूमादित्यादौ तादात्म्यसंबन्धघटितसाध्यव्यापकतावच्छेदकं यद्द्रव्यत्वादि विषयितासंबन्धेन तद्विशिष्टज्ञानादिभेदस्य प्रतियोग्वृत्तित्वेनाव्याप्तिरिति स्वप्रतियोगितावच्छेदकताघटकसंबन्धावच्छिन्नव्यापकतावच्छेदकताया निवेशनीयतया विषयितासंबन्धावच्छिन्नवाच्यत्वत्वप्रतियोगितावच्छेदकताकाभावानां लक्षणाघटकत्वेन प्रतियोग्यवृत्तिश्चेति मूलावतारः। प्रतियोगिवैयधिकरण्याघटितव्यापकताकल्पे स्वरूपसंबन्धेन साध्यवन्निष्ठत्वस्य निवेशनीयतया कपिसंयोगात्मकाभावस्य लक्षणघटकत्वमत आह—"[2]दैशिकेति"। दीधित्यनुसारेणाह—"भावभिन्नत्वेति"।

इदमनास्थयोक्तम्। रूपान्यत्वप्रकारकप्रमाविषयत्वाभाववारणाय दैशिकविशेषणताया आवश्यकत्वात्।

"[3]अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्येति"। न च समनियताभावैक्यमतेऽयोगोलकतदन्यत्वप्रकारकप्रमाविषयत्वान्यतराभावस्यायोगोलकान्यत्वप्रकारकप्रमाविषयत्वत्वेनायोगोलक — अयोगोलकान्यत्वप्रकारकप्र-

[1] "प्रतियोगिताघटकसंबन्धेन"—अ.

[2] "दैशिकतयेति" प्रतीकधारणम्—अ; "दैशिकविशेषणतया" इत्येव पाठः गादाधर्यां दृश्यते। "दैशिकतयेति" प्रतीकधारणात् पाठान्तरमपि वर्तत इति ज्ञायते—स्व.

[3] "अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाद्यभावस्येति पाठः "अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाभावस्ये"ति पाठश्च गादाधर्यां दृश्यते—स्व.

माविषयत्वान्यतराभावस्य अयोगोलकावृत्तित्वावच्छिन्नाभावस्य च दर्शिताभावसमनियततया तदात्मकत्वेनायोगोलकरूपप्रतियोगिवृत्तित्वात् अतिव्याप्तितादवस्थ्यमेवेति वाच्यम्; तन्मते उभयावृत्तिप्रतियोगिताश्रयवृत्तित्वस्य वाच्यत्वात्; सद्धेतौ च वह्नित्वादिना [1]तद्घटाभावप्रतियोगितामादाय लक्षणसमन्वयः। उभयावृत्तित्वं च स्वप्रतियोगिवृत्तित्वस्वसामानधिकरण्योभयसंबन्धेन भेदविशिष्टान्यत्वम्।

वस्तुतस्तु—अयोगोलकत्वप्रकारकप्रमाविशेष्यत्वाभावत्वस्यापि धूमव्यापकतावच्छेदकतया तदवच्छिन्नप्रतियोगिताकस्य तादृशप्रमाविशेष्यत्वरूपाभावस्य अभावमात्रवृत्तिप्रतियोगिताकस्य भाववृत्तिप्रतियोगिताकायोगोलकावृत्तित्वावच्छिन्नाभावादतिरिक्तस्य प्रतियोग्यवृत्तित्वेनातिव्याप्तिविरहात् उभयावृत्तित्वं प्रतियोगिताविशेषणं व्यर्थमेव। न चैवमपि घटत्वाभावभिन्नं [2]प्रमेयत्वादित्यादौ घटत्वाभावत्वप्रकारकप्रमाविशेष्यत्वाभावाभावस्य [3]घटत्वाभावत्वस्वरूपतया घटत्वाभावत्वेन रूपेण विशेषणतासंबन्धेन स्वप्रतियोगिनि तादृशविशेष्यत्वाभावे सत्त्वादतिव्याप्तिः। एवमयमात्मा ज्ञानादित्यादौ घटान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य स्ववृत्तिघटादिवृत्तित्वविशिष्टगोत्वाभावाभावात्मकतया तादृशगोत्वाभावाभावत्वेन हेत्वधिकरणवृत्तेः तस्य तादृशविशेष्यत्वरूपप्रतियोग्यवृत्तित्वेनाव्याप्तिरिति वाच्यम्; प्रतियोगिवृत्तित्वहेतुमद्वृत्तित्वयोः तादृशाभावत्वेन निवेशनीयत्वादिति।

नन्वेतल्लक्षणे इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वेन वाच्यत्ववृत्तित्वविशिष्टवाच्यत्वाभावस्य वाच्यत्वरूपप्रतियोग्यवृत्तित्वेनाव्याप्तिः। न च तस्य ज्ञेयत्वत्वेन वाच्यत्ववृत्तित्वविशिष्टज्ञेयत्वाभावरूपतया ज्ञेयत्वरूपप्रति-

[1] "तद्घटाद्यभाव"—अ.

[2] "मेयत्वादित्यादौ"—अ.

[3] "घटत्वाभावस्वरूपतया"—अ.

योगिवृत्तित्वमिति वाच्यम् ; समनियताभावभेदमतेऽगतेरिति चेन्न ; वह्नित्वेन महानसीयवह्न्यभावानुपगंतृभिः ईदृशाभावानुपगमादिति । यत्समानाधिकरणानां साध्यव्यापकतावच्छेदकप्रतियोगिताकयावदभावानां प्रतियोगिवृत्तित्वोक्तौ वाच्यत्ववृत्तित्वेन वाच्यत्वाद्यभावमादाय अव्याप्तेः तल्लक्षणे तथा नोक्तमिति स्मर्तव्यम् ।

इति कृष्णम्भट्टीये द्वितीयस्वलक्षणम् ॥

---

[1] आदिपदाघटितपाठः—अ.

न्यायरत्ने चतुर्दशलक्षणी

"[1]साध्यप्रतियोगिकाभावस्येत्यादि"। अत्रेदं बोध्यम्। साध्यमात्रप्रतियोगिकाभावनिवेशस्य शंकाबीजत्वे, व्यासज्यवृत्तिधर्मावच्छिन्नाभावो न लक्षणघटकः; गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे विशिष्टाभावोऽपीति। "साध्यतावच्छेदकापर्याप्ते"ति। साध्यतावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नापर्याप्तिकेत्यर्थः। तेन, तद्वह्नित्वनिष्ठावच्छेदकताया उभयपर्याप्तत्वे एकपर्याप्तत्वाभावासत्वेऽपि न[2] क्षतिः। इदं च समानाधिकरणधर्मावच्छिन्नाभावसंग्रहाय।

यत्तुः—तन्न देयमेव, न च तदनिवेशे समानाधिकरणधर्मावच्छिन्नाभावस्य लक्षणाघटकत्वेन व्यधिकरणधर्मावच्छिन्नाभावमादाय असंभवोऽतिव्याप्तिश्चेति वाच्यम्; तस्य लक्षणघटकत्वेऽप्यसंभवातिव्याप्त्योः प्रागेवोक्तत्वादिति।

[1] "साध्यप्रतियोगिकाभावस्ये"ति गादाधर्यां पाठो न दृश्यते—स्व.

[2] न क्षतिरितिः—वह्निमान् धूमादित्यादौ यद्यपि वह्नित्वनिष्ठसाध्यतावच्छेदकता निरवच्छिन्नैव तथापि साध्यतावच्छेदकतापर्याप्त्यवच्छेदकं वह्नित्वनिष्ठं तद्व्यक्तित्वम् तच्च न तद्वह्नित्वादिनिष्ठावच्छेदकतापर्याप्त्यवच्छेदकम्; व्यासज्यवृत्तिधर्मपर्याप्तेरेकमात्रवृत्तिधर्मस्यानवच्छेदकत्वात्; अन्यथा आकाशौ इति प्रयोगापत्तेः; न चैवं घटपटावित्यादौ घटमात्रवृत्तिधर्मस्य कथं घटपटगतद्वित्वपर्याप्त्यवच्छेदकत्वेन भानमिति वाच्यम्; एकमात्रवृत्त्युद्देश्यतावच्छेदकताकस्थल एव द्वित्वपर्याप्त्यनवच्छेदकत्वस्योद्देश्यतावच्छेदके भानोपगमात्; तथा च तद्वह्नित्वनिष्ठावच्छेदकतायां साध्यतावच्छेदकापर्याप्तत्वसत्वात् तद्वह्न्यभाववारणं संभवतीति नाव्याप्तिरिति भावः।

तन्न—व्यधिकरणधर्मावच्छिन्नाभावमस्वीकृत्य प्रथमतो महानसीयवह्न्यभावमादाय लक्षणाव्याप्तिवारणार्थं "साध्यतावच्छेदकापर्याप्ते"त्यादि परिष्कृते ततः अप्रसिद्धावुद्भावितायां, व्यधिकरणधर्मावच्छिन्नाभावं स्वीकृत्य शंकायाः कृतत्वात्, तादृशाशंकायामेव असंभवातिव्याप्त्योः पूर्वमुक्तत्वात्।

एतेनावच्छेदकतायां साध्यतावच्छेदकापर्याप्तत्वाविवक्षणे स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदन्यत्वस्य निवेशनीयतया कूटसंकोचार्थमेव तन्निवेश इति निरस्तम्। उक्तरीत्या साध्याभावसंग्रहायैव सार्थक्यसंभवात्।

"[1]प्रमेयत्वविशिष्टापर्याप्ते"ति। प्रमेयत्वानवच्छिन्नेत्यर्थः। ननु साध्याभावपदेन, साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावविवक्षणे "वह्निमान् धूमादि"त्यादौ, तार्णातार्णव[2]ह्न्युभयाभावमादायाव्याप्तिः, व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वे, वह्निधूमोभयसाध्यके तदन्यतराभावमादाय लक्षणसमन्वयेऽपि, तादृशोभयसाध्यकव्यभिचारिणि तमादायातिव्याप्तिः। साध्यतावच्छेदकानवच्छिन्नत्वव्यासज्यवृत्तिधर्मावच्छिन्नत्वोभयाभावस्य प्रतियोगिताविशेषणत्वे, गौरवमत आह—"साध्यतावच्छेदकापर्याप्त[3]साध्यवृत्तिधर्मनिष्ठे"त्यादि। नन्वेतत्कल्पे वाच्यत्वसाध्यके घटाभावस्यापि लक्षणघटकत्वात्, मूलकृतां सौन्दलमतानुधावनं निर्बीजमिति चेन्न; [4]तादृशमतानुधावनस्य प्रमेयसाध्यकस्थलाभिप्रायकत्वात्। वाच्यत्वसाध्यके समवायितया वाच्यत्वाभावप्रदर्शनं साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेणेति ध्येयम्। यद्वा—"साध्यवृत्तिधर्म-

[1] प्रमेयत्वादिविशिष्टप्रमेयापर्याप्तमिति गदाधरीपाठः—स्व.

[2] दहनोभयाभावम्—ग.

[3] साध्यनिष्ठधर्मवृत्तीति गदाधरीपाठः—स्व.

[4] तादृशानुधावनस्य—ग.

निष्ठे"त्यनेन, "यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत्" इत्यग्रे विवक्षितं; तेनैव वाच्यत्वसाध्यके [2]घटाभावो न लक्षणघटक इति बोध्यम्। "साध्यवृत्तिधर्मनिष्ठेत्यनेने"ति। अत्र यत्पर्याप्त्यधिकरणधर्मविशिष्टं साध्यमित्युक्तौ, प्रमेयसाध्यके गगनत्वेन प्रेमयसामान्याभावसंग्रहानुपपत्तिरतोऽधिकरणमिति, साध्यवदिति च।

नन्वेवं विवक्षणे समवायितया वाच्यत्वाभावो लक्षणघटको न स्यादत आह—"[3]वस्तुतस्त्वि"ति। अत्रेदं बोध्यम्। यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणमित्यत्र अधिकरणं साध्यतावच्छेदकसंबन्धेन वक्तव्यम्, तथा च समवायित्वेन वाच्यत्वाभावस्य लक्षणघटकत्वं संभवति। एवं सति, वाच्यत्वसाध्यके घटाभावोपेक्षणं साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशकल्पाभिप्रायेणेति।

नन्वथेत्यादिग्रन्थस्य, यदि कूटघटितलक्षणाभिप्रायकत्वं [4]दीधितिकृतामभिमतं, तदा तद्दूषणे संदर्भविरोधः, स्वानभिप्रेतस्यैव दूषणीयत्वादतः, संदर्भशुद्धिमाहः—"व्यधिकरणे"ति। तथा च, अथेति ग्रन्थस्य कूटघटितलक्षणाभिप्रायकत्वमगत्या स्वस्याभिमतम्; तत्तु न दूषितम्; "प्रतियोग्यवृत्तिश्चे"ति ग्रन्थावतारकत्वमेव, तस्य दुष्टत्वान्न स्वाभिमतं, तत्तु दूषितमिति, न संदर्भविरोध इति भावः।

"[5]तत्पदबोद्धव्यत्वे"ति। तत्पदजन्यबोधविषयतेत्यर्थः। "यद्धर्म्यंश इत्यादि"—यद्धर्म्यंशे यद्धर्मिविशेष्यकत्वावच्छेदेन, यस्य प्रकारता,

[1] ईदृशरीत्या गादाधर्यां पाठान्तरकल्पनं व्यर्थैवेति कृष्णम्भट्टीये—स्व.

[2] न घटाभावो लक्षणघटकः—ग.

[3] गादाधर्यां वस्तुतः इति पाठः। कृष्णम्भट्टीयेऽपि "वस्तुत इति" प्रतीकधारणम्—स्व.

[4] दीधितिकृतः—ग.

[5] तत्तत्पदेति गदाधरीपाठः—स्व.

यन्निष्ठप्रकारताकत्वम् अथवा यद्धर्म्यंशे यन्निष्ठविशेष्यतानिरूपितेत्यर्थः। अन्वयश्चास्य प्रकारतायाम्। "तद्धर्मप्रकारकत्वविशिष्टवत्त्वोपगमादिति"। तन्निष्ठप्रकारतानिरूपितविशेष्यतायाः एव विशेष्यतासंबन्धेन तत्प्रकारकत्वविशिष्टाधिकरणतायां तन्त्रत्वादिति भावः। अथ तत्पदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छाधिकरणत्वस्य तत्पदवाच्यत्वव्यवहारे विषयत्वं स्वीकृत्य पटो घटपदवाच्य इति व्यवहारवारणेऽपि पटे घटपदवाच्यत्वमिति व्यवहारापत्तिर्दुर्वारा, विशिष्टस्य शुद्धविशेष्यानतिरेकितया घटपदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छारूपे घटपदवाच्यत्वपदार्थे पटवृत्तिताया अक्षतत्वादिति चेन्न; तादृशप्रतीत्या घटपदवाच्यत्वत्वाच्छेदेनैव पटवृत्तित्वस्य विषयीकरणात्, तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तदाधेयतावच्छेदकत्वोपगमात्, घटपदवाच्यत्वत्वे पटवृत्तितावच्छेदकत्वाभावेन विषयबाधात्।

स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्व-स्वावच्छिन्नत्वोभयसंबन्धेन धर्मविशिष्टान्यत्वं व्यधिकरणधर्मावच्छिन्नत्वमित्यभिप्रायेण शङ्कते—"न चेति"। विशिष्टाभावीयप्रतियोगितायाः विशेषणान्तर्भावेन पर्याप्तौ मानाभावः। न च विशिष्टाभावोपलक्षिताभावयोः वैलक्षण्यानुपपत्तिरेव प्रमाणमिति वाच्यम्; विशिष्टाभावीयप्रतियोगितायाः विशेषणसाधारण्योपगमेनैव निर्वाहादित्याशयेन समाधत्ते—"यत इति"। "विशेष्यांशमात्र"इति। विशेष्यांशमात्रवृत्तिधर्मावच्छिन्ने इत्यर्थः। तेन विशेषणसाधारण्येऽपि न क्षतिः।

ननु घटपटौ न स्त इति प्रतीतिः, केवलोभयत्वे, नावच्छेदकत्वमवगाहते, तथा सति यत्किञ्चिदुभयवति तादृशप्रतीत्यनुदयापत्तेरतो घटत्वसमानाधिकरणपटत्वसमानाधिकरणद्वित्वेऽवच्छेदकत्वमवगाहत इति वक्तव्यम्; तत्र च द्वित्वसमानाधिकरणं घटत्वं पटत्वं वेति विनिगमनाविरहात्

प्रतियोग्यंशे भासमानत्वाद्वा घटत्वपटत्वयोरप्यवच्छेदकत्वावगाहनौचित्यात् त्रयाणामेवावच्छेदकत्वप्रसक्तौ तेषां चैकधर्मावच्छिन्नापर्याप्तिकत्वरूपविरोधाश्रयत्वात् विरुद्धोभयधर्मावच्छिन्नाभाववत् घटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वं स्यादिति शङ्कते— "यद्यपीति"। समाधत्ते "तथापी"ति। "स्वातन्त्र्येणापी"ति। प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रकारत्वाप्रयोज्यत्वम् अवच्छेदकतायां स्वातन्त्र्यम्।

अयं भावः—घटत्वेन घटपटोभयं नास्तीत्यत्र घटत्वे द्विविधमवच्छेदकत्वम्; एकं द्वित्वधर्मितावच्छेदकत्वेन, अपरं च व्यधिकरणत्वेन, तत्र प्रथमावच्छेदकतायाः तदभावीयप्रतियोगिविशेषणतापन्नत्वावच्छिन्नावच्छेदकतात्वरूपेण घटत्वपटत्वद्वित्वैतत्त्रितयपर्याप्तता तदवच्छेदकं तत्त्रित्वम्, द्वितीयावच्छेदकत्वस्य घटत्वमात्रपर्याप्ततया तदवच्छेदकं घटत्वनिष्ठतद्व्यक्तित्वम्, तथा च प्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकताव्यापकावच्छेदकताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणतयैव अभावस्य विरोधात् घटपटोभयाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकताव्यापिकाया घटत्वपटत्वद्वित्वैतत्त्रित्वनिष्ठा घटपटोभयवत् भूतलमिति प्रतीतिसिद्धघटपटोभयत्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकतापर्याप्त्यवच्छेदकता तत्पर्याप्तिका या तादृशत्रितयनिष्ठा निरूपकतावच्छेदकता तत्का या तादृशोभयनिष्ठाधेयत्वरूपा निरूपकता तन्निरूपिताधिकरणता घटपटोभयाधिकरणे वर्तते इति न तादृशोभयत्वावच्छिन्नाभावस्य केवलान्वयित्वम्। घटत्वेन घटपटोभयं नास्तीति प्रतीतिविषयाभावप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकतायाः तादृशत्रित्वघटत्वनिष्ठतद्व्यक्तित्वयोः सत्वेन घटत्वेन घटपटोभयवदिति प्रतीतिविरहेण तादृशावच्छेदकताव्यापकावच्छेदकतापर्याप्तिकावच्छेदकताकनिरूपकताया अप्रसिद्धत्वेन विरोधिनोऽभावात् तादृशाभावस्य केवलान्वयित्वमिति।

"एकदेशिमतानुयायितये"ति। अथ विषयताया विषयस्वरूपत्वेऽपि घटादिरूपविषयताया विषयतात्वेनैव स्वरूपसंबन्धेन घटादिवृत्तित्वं, न घटत्वादिनेति घटत्वादिना विषयत्वं नास्तीति प्रतीतिविषयाभाव इव समवायित्वेन स्वरूपसंबन्धेन वाच्यत्वाभावस्य घटादौ आवश्यकत्वात् तादृशाभावस्य लक्षणघटकत्वसंभवे मूलस्य मतविशेषपरतया संगमनमनुचितम्। न च तथापि मूलोक्तं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं तस्य न संभवति, समवायित्वस्य प्रतियोगितासमानाधिकरणत्वादिति वाच्यम्। प्रतियोग्यंशे प्रकारीभूतधर्मावच्छिन्ना या प्रतियोगिनिष्ठाधेयता तदनवच्छेदकत्वस्य तादृशधर्मावच्छिन्ननिरूपकताकाधेयत्वाभावस्य वा प्रतियोगिताव्यधिकरणत्वपदार्थत्वात् समवायित्वादौ तादृशविषयतात्वावच्छिन्नाधेयतानवच्छेदकत्वस्य तादृशविषतात्वावच्छिन्ननिरूपकताकाधेयत्वाभावस्य च सत्वात् तदवच्छिन्नाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाक्षतेरिति चेन्न; अथेत्यादिग्रन्थस्य कूटघटितलक्षणाभिप्रायकतया व्याख्यातत्वात् तत्र च साध्याभावे समानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वविशेषणस्य आवश्यकतया समवायितया वाच्यत्वाभावस्य विषयताया विषयस्वरूपत्वे समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतया तदन्यत्वविरहात्। न च तत्रापि समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणस्यावश्यकतया तस्यापि लक्षणघटकत्वं संभवतीति वाच्यम्। समानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिताभेदस्य साध्याभावीयप्रतियोगितायां निवेशकल्पे तदना-[1]वश्यकत्वात्।

[1] सत्तावान् ,जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धया प्रसक्ताव्याप्तेः साध्याभावप्रतियोगितायां तादृशप्रतियोगिताभेदनिवेशेनैव वारणात् समानाधिकरणधर्मे तादृशविशेषणमनावश्यकमिति भावः—स्व.

"इत्यत" इति। यद्यपि प्रमेयसाध्यके संयोगाद्यवच्छिन्नसमवायित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावः सुलभः; तथापि वस्तुगतिमनुरुध्येदम्।

"वह्नित्वेने" ति। अथ एतादृशाभावप्रदर्शनं किं स्वरूपसंबन्धेन प्रमेयसाध्यके, उत समवायसंयोगाभ्यां वा। नाद्यः; निर्वह्नावित्यसंगतेः, स्वरूपेण तादृशाभावस्य केवलान्वयित्वात्। नान्त्यः; संयोगसमवायादिसंबन्धावच्छिन्नाभावस्य गुणसामान्यादौ वर्तमानतया वह्नित्वेनेत्यसंगतेरिति, चेन्न; संयोगादिना प्रमेयसाध्यके जलत्वादिहेतुके संयोगादिना प्रमेयसामान्याभावस्य गुणादौ सत्वेऽपि साधनसामानाधिकरण्याभावात् वह्नित्वेनेति संगतम्। न च जल इत्येव वक्तुमुचितम्; न निर्वह्नाविति शंक्यम्। जलत्वगुणत्वसत्त्वादिहेतुकस्थलसाधारण्येन तदुक्तेः। वस्तुतस्तु कूटघटितलक्षणे भावानाम[1]पि दैशिकविशेषणतया वृत्तित्वस्य व्यवस्थापितत्वा[2]त् स्वरूपसंबन्धेन प्रमेयसाध्यकस्थलाभिप्रायकमेवेदमिति ध्येयम्।

"[3]वह्निभिन्नत्वेने" त्यादि। ननु वह्निभिन्नत्वेन वह्निगगनान्यतराभावीयप्रतियोगिताया वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगित्वाभिन्नतया वह्निमात्रनिष्ठत्वासंभवात् कथं तस्याः साध्यतावच्छेदकसमनैयत्यमिति चेन्न; अव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयताविशिष्टप्रतियोगितात्वेन समनैयत्यस्य विवक्षणीयतया तेन रूपेण तादृशप्रतियोगिताया वह्निमात्रनिष्ठत्वात्; एतदभिप्रायेणैव तन्मात्रनिष्ठत्वकथनमपि। वस्तुतस्तु—नायमभासोऽवतरति; विषयितया वह्नेः साध्यक एव तथोक्तेः;

[1] "अपि" शब्दो नास्ति—ग.

[2] घटे न घटत्वाभावः इत्यादि नञुल्लेख्यप्रतीतिव्यवहारयोरनुपपत्तिः इत्यादियुक्त्येत्यर्थः—स्व.

[3] वह्निभिन्नत्वादिना इति गदाधरीपाठः—स्व.

तत्र वह्निभिन्नत्वेन वह्निगगनान्यतराभावीयप्रतियोगित्ववह्निभिन्नत्वेनवह्न्य-भावीयप्रतियोगित्वयोः ऐक्याभावात् । एतेन पूर्वकल्पे [1]तादात्म्यसंबन्धा-वच्छिन्नसाध्यताकस्थलानुरोधेन साध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धिताया विवक्षणावश्यकत्वेन दर्शितप्रतियोगिताया गगनसाधारण्येऽपि न क्षतिः ।

" [2]विषयितासंबन्धेन प्रमेयमात्रसाध्यक " इति । इदमत्र चिन्त्यम्—संयोगेन प्रमेयसाध्यकेऽपि अप्रसिद्धिसंभवात् तावत्पर्यन्तानुधावनं व्यर्थम्; न च तत्र संयोगेन गगनत्वेन प्रमेयसामान्याभावस्तथेति शंक्यम्; तस्य हेतुसामानाधिकरण्याभावात् । वृत्त्यनियामकसंबन्धेन गगनस्य संबन्धित्वात् । न च [3]वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदक-त्वमताभिप्रायेणेदमिति वाच्यम् । विषयिताया अपि तथात्वेन तत्संबन्धा-वच्छिन्नाभावप्रदर्शनासंगतेरिति । परंतु विषयिताया वृत्तिनियामकत्व-मताभिप्रायेणेदमित्यवधेयम् ॥

इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम् ।

---

[1] " तादात्म्यसंबन्धेन साध्यकस्थलानुरोधेन "—ग.

[2] विषयितासंबन्धेन प्रमेयसामान्यं साध्यमिति गदाधरीपाठः—स्व.

[3] " वृत्त्यनियामकसंबन्धावच्छिन्ना यथा निरूपकता न भवति तत्संबन्धावच्छिन्न-प्रतियोगितापि तथा न स्वीक्रियते "—स्व.

न्यायरत्ने प्रथमस्वलक्षणम्

“घटत्वादिना वह्न्यभावादिरेवे”ति । हेतुसामानाधिकरण्यघटकवृत्तौ संबन्धनिवेशनमभिप्रेत्येदम्; जन्यानां[1] कालत्वानंगीकरणेन वा, तेन वह्निसाध्यके समानाधिकरणधर्मावच्छिन्नवह्न्यभावस्य कालिकसंबन्धेन हेतुसामानाधिकरण्येऽपि न क्षतिः । “अयमात्मे”ति । अथायमात्मा ज्ञानादित्यादावात्मत्वसामान्याभाववारणाय प्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वमेवोपादेयम् । न चैवमपि द्रव्यत्वाभावमादाय दोष इति वाच्यम्, साध्यनिष्ठत्वस्यापि निवेशात्; न चात्मत्वनिष्ठतद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिरिति वाच्यम्; साध्यतावच्छेदकानवच्छिन्नत्वमित्यनेन साध्यवृत्तिधर्मानवच्छिन्नत्वस्य विवक्षणात्[2] । यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत् तन्निष्ठावच्छेदकताकान्यत्वस्य तदर्थत्वात् न प्रमेयसाध्यके तादृशाभावाप्रसिद्धिः; घटत्वपटत्वोभाभ्यां प्रमेयसामान्याभावस्य तादृशस्य प्रसिद्धेः; एवं च साध्यनिष्ठत्वं न देयमेव; एतेन प्रतियोगितायां साध्यनिष्ठत्वनिवेशे “विशिष्टसत्तावान् जाते”रित्यादावतिव्याप्तिरिति निरस्तम्; तादृशद्रव्यत्वाभावमादाय तद्वारणादिति चेन्न; हेतुसामानाधिकरण्यविशेषणापेक्षया गौरवात् ।

[1] प्रतियोगिवैयधिकरण्याघटितव्यापकताकल्पे हेतुसामानाधिकरण्यघटकवृत्तौ संबन्धनिवेशे गौरवमिति भट्टाचार्यैः वक्ष्यमाणत्वादाह “जन्यानामिति”—स्व.

[2] आत्मत्वनिष्ठतद्व्यक्तित्वावच्छिन्नाभावस्य साध्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वात् नाव्याप्तिरिति भावः—स्व.

यत्तु स्वव्यधिकरणधर्मावच्छिन्नत्वमेव प्रतियोगितायां देयम्, तच्च; अवच्छिन्नत्वसामानाधिकरण्योभयसंबन्धेन धर्मविशिष्टान्यत्वरूपमेव, स्ववि-शिष्टेति न देयमिति न गौरवावकाश इति; तन्न; समनियताभावैक्यमते घटत्वेन धूमाभावस्य घटत्वेन वह्न्यभावाभिन्नतया वह्निरूपप्रतियोगिसामा-नाधिकरण्यमादायातिव्याप्तेः। न च यत्सामानाधिकरण्यनिवेशेऽपि समनि-यताभावैक्यमतेऽतिव्याप्तेरेतल्लक्षणे वक्ष्यमाणतया तौल्यमिति वाच्यम्; तथापि लक्षणद्वयानुरोधेन यत्सामानाधिकरण्योक्तेः लक्षणान्तरत्वाच्च न क्षतिः। एतेन यत्सामानाधिकरण्यमपहाय प्रतियोगितायां गगनावच्छिन्नत्व-निवेशोऽपि समाहितः।

"न तत्राव्याप्तेर्वारणं तत्फलमि"ति। यद्यपि वह्निसाध्यकेऽपि चरमक्रियात्मकाभावस्य लक्षणघटकतया तस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्धेः अव्याप्तेर्वारणं तत्फलं संभवति, तथापि महाकालानुयोगिकधूमसंयोगस्य धूमांशे वत्तिनियामकताया अग्रे ग्रन्थकृद्भिः[1] प्रतिपादनात्[2] महाकाल एव तादृशाभावविशिष्टं हेत्वधिकरणं संभवतीति न तत्राव्याप्तिरिति ध्येयम्। "पृथिव्याद्यष्टद्रव्ये"ति। तादृशाष्टद्रव्यातिरिक्तं द्रव्यमात्मैव परिभाषित-स्तेन यत्किञ्चिदष्टद्रव्यातिरिक्तत्वस्य सकलद्रव्यसाधारण्येऽपि न क्षतिः। द्रव्यं विशिष्टसत्त्वादित्यादौ द्रव्यत्वसामान्याभावस्य काले वैशिष्ट्यसंभवात् स्ववैशिष्ट्यांशे संबन्धानिवेशात् एतावदनुधावनम्। यदित्यादिविशेषणस्य नेदमसाधारणप्रयोजनमिति शंकते—"यद्यपी"ति। नन्वेकार्थसमवाय-संबन्धेन कपिसंयोगात्मकाभावस्य जातौ वैशिष्ट्यसंभवात् नाव्याप्तिः। न च परंपरासंबन्धानां संबन्धत्वनिराकरणान्नेदं युक्तमिति शंक्यम्;

[1] ग्रन्थकृता—ग.

[2] येन संबन्धेन हेतुरित्यादिदीधितिव्याख्यानावसरे—स्व.

असमवायिकारणद्वैविध्यानुरोधेन समवाय-एकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वं भावत्वं, तदभावोऽभावत्वमिति भावाभावयोर्लक्षणानुरोधेन च तस्य विशिष्टबुद्धिनियामकत्वरूपसंबन्धताया आवश्यकत्वात्; तदतिरिक्तैकज्ञानविषयत्वादिरूपपरंपराणामेव संबन्धताया निराकरणादत आह—"सत्तावानि"ति ।

केचित्तु—कपिसंयोगात्मकाभावस्य प्रतियोगिवैयधिकरण्याघटितव्यापकतानिवेशकल्पे लक्षणघटकत्वं न संभवतीत्यतः तत्कल्पेऽपि दोषदानायाह—"सत्तावानि"ति । अथ प्रतियोगिवैयधिकरण्याघटितव्यापकत्वकल्पे साध्यवन्निष्ठत्वांशे स्वरूपसंबन्धनिवेशावश्यकतया कपिसंयोगात्मकाभावस्य साध्यवति स्वरूपसंबन्धेनासत्वात् व्यापकताघटकत्वासंभवेन लक्षणघटकत्वं संभवत्येव; अन्यथा सत्ताभावीयप्रतियोगित्वावच्छिन्नाभावस्यापि कालिकसंबन्धेन साध्यवति सत्वात् तस्यापि लक्षणघटकत्वानुपपत्तिः । न च स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन साध्यवद्वृत्तित्वं निविष्टमित्यभिप्रायेणेदमिति वाच्यम् । एवं सति प्रतियोगिवैयधिकरण्याघटितव्यापकत्वकल्पे पर्वतत्वात्मकाभावमादाय दोषवारणाय यत्सामानाधिकरण्यघटकवृत्तौ स्वरूपसंबन्धनिवेशावश्यकत्वं प्रदर्श्य नानास्थाने संबन्धनिवेशप्रयुक्तगौरवोद्भावनस्यासांगत्यापत्तेरिति चेन्न; साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्यवद्वृत्तित्वनिवेशाभिप्रायेणास्वरसस्य गौरवोद्भावनस्य च संगतेरित्याहुः ।

[1][तदसत्; सत्ताभाववान् जातित्वादित्यादौ तादृशसंबन्धेन साध्यवद्वृत्तित्वाप्रसिद्धेः तथा विवक्षितुमशक्यत्वात्] साध्यसामानाधिकरण्यघटकवृत्तौ स्वरूपसंबन्धावच्छिन्नत्वनिवेशे सत्ताभावमादायाव्याप्तिविरहेऽपि आत्मवृत्तित्वविशिष्टसत्ताभावमादायाव्याप्तिर्बोध्या ।

[1] [ ] एतत्चिह्नमध्यस्थपाठो नास्ति—ग.

"व्यभिचारविरोधी"ति। व्यभिचाराभावव्याप्य इत्यर्थः। इह हेतावुपाधिर्नेह [1]हेतावुपाधिरिति व्यवहारद्वयप्रदर्शनेनाव्याप्यत्वसंबन्धस्य विशिष्टबुद्धिनियामकत्वमभावप्रतियोगितावच्छेदकत्वं च दर्शितम्। "अव्याप्यत्वस्ये"ति। अव्याप्यत्वं च स्वाभाववत्संबन्धत्वम्। तेनात्मत्वाभावाभाववति आत्मनोऽवृत्तित्वेऽपि न क्षतिः।

यावत्पदस्यासाधारणप्रयोजनं नास्तीत्यभिप्रायेण "अत एवे"ति ग्रंथमवतारयति—"नन्वि"ति। एतेन "साध्यतावच्छेदकावच्छिन्नेत्यादि विशेषणस्य व्यावृत्तेः पश्चाद्वक्ष्माणतयेत्यादि" जगदीशानां उपरि वक्ष्यमाणदूषणमेतन्मते निरवकाशम्। "स्वव्यापकतत्कत्वमि"ति। अत्र स्वव्यापकत्वं स्वसमानाधिकरणप्रतियोग्यवृत्तिभेदप्रतियोगितानवच्छेदकत्वं भेदे प्रतियोग्यवृत्तित्वनिवेशात् [2]व्यासज्यवृत्तिधर्मावच्छिन्नसाध्यके साध्याभावीयप्रतियोगितायाः प्रत्येकवृत्तितया तत्रोभयत्वावच्छिन्नप्रतियोगिताकभेदस्य सत्वेऽपि न साध्यतावच्छेदकव्याप्यप्रतियोगिताया अप्रसिद्धिः; [3][स्वसमानाधिकरणप्रतियोग्यवृत्तिरित्यनेन स्वाधिकरणावच्छेदेन प्रतियोगिताश्रयवृत्तित्वाभाववत्वं प्रतियोगितानधिकरणस्वाधिकरणवृत्तित्वं वा विवक्षितमिति न परकीयकुचोद्यावकाशः]। अत एव भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगिताया अपि साध्यतावच्छेदकव्याप्यत्वात् तन्निरूपकाभावस्य लक्षणघटकत्वनिर्वाहः। यद्यप्येतत्कल्पे स्वविशिष्टत्वनिवेशे प्रयोजनाभावेन यावद्धेत्वधिकरणजलपरमाणौ केनापि संबन्धेन भूतत्वमूर्तत्वोभयाभावासत्वात् न तादृशाभावस्य विव-

[1] अत्र पाठभेदाः गादाधर्यां दर्शिताः। जागदीश्यां नेह उपाधिरिति प्रतीकधारणम्। हेताविति अनुषज्यते इति वर्णितं जगदीशेन उपाधिवादे। दीधितावपि पाठभेदः वर्तते इति गम्यते—स्व.

[2] व्यासज्यवृत्तित्वं च एकत्वावच्छिन्नानुयोगिताकपर्याप्तिकान्यत्वम्—स्व.

[3] एतत्पाठो नास्ति—ग.

क्षणीयप्रतियोगिसामानाधिकरण्यमिति नातिव्याप्तिस्तथापि नित्यानामपि मूर्तानां दिगुपाधित्वमित्यभिमानेनेदमिति ध्येयम् ।

अथवा भूतत्वमूर्तत्वोभयघटकभूतत्वं बहिरिन्द्रियग्राह्यविशेषगुणरूपमेवेति न क्षतिः ।

"व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशने[1]ऽसंभवादि"ति । प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वस्य स्वरूपसंबन्धेनैव सत्वात् तादृशप्रतियोगिताकस्य वह्न्याद्यभावस्य स्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्याभावात् संयोगेन वह्न्यादिसाध्यके धूमादिहेतावव्याप्तेरिति भावः । "पर्वतभिन्नभेदस्ये"ति । अथ प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशेऽसंभवः कुतो नोक्तः? न च प्रमेयसाध्यके पक्षभिन्नभेदस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविरहेण घटत्वपटत्वोभाभ्यां प्रमेयसामान्याभावमादाय लक्षणसमन्वयः संभवतीति वाच्यम्; तत्रापि हेत्वधिकरणवृत्तितानवच्छेदकसंबन्धावच्छिन्नाभावस्य तेन संबन्धेन हेत्वधिकरणे प्रतियोगिसामानाधिकरण्यासंभवात् ।

अत्र केचित्—प्रतियोगितायां तादात्म्यसंबन्धावच्छिन्नत्वदाने प्रमेयसाध्यके लक्षणगमनात् नासंभवोऽभिहित इत्याहुः ।

वस्तुतस्तु—विषयितासंबन्धस्य वृत्त्यनियामकतया [2]अभावप्रतियोगितानवच्छेदकत्वे [3]प्रमेये साध्ये भूतलत्वादिहेतौ लक्षणसमन्वयः संभवति तत्र विषयित्वातिरिक्तसंबन्धानां हेत्वधिकरणवृत्तितावच्छेदकत्वात् ।

[1] "निवेशासंभवादि"त्येव गादाधर्यो पाठो दृश्यते—स्व.

[2] यत्संबन्धेन प्रतियोगिनः सत्वेन प्रत्यक्षमापादयितुं शक्यते तस्यैव प्रतियोगितावच्छेदकत्वमित्याशयः—स्व.

[3] प्रमेयसाध्यकभूतलत्वादिहेतुके—ग.

"वक्ष्यमाणस्थलान्तरे"ति। घटत्वाभाववान् मेयत्वादित्यादावित्यर्थः। "अतिव्याप्ति"रिति। पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायेत्यादिः। "[1]नास्माकं दोष"इति। पूर्वमतेऽपि सत्वादिति भावः। यद्वा यादृशप्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः तादृशप्रतियोगिताश्रयसामानाधिकरण्यस्यैव प्रतियोगिसामानाधिकरण्यमित्यनेन स्वमते विवक्षणीयत्वात् पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वावच्छिन्नप्रतियोगिताया अतादृशत्वात् नास्माकं मतेऽतिव्याप्तिरित्यभिप्रायः। "भावरूपप्रतियोगिसामानाधिकरण्यमि"ति। साध्यतावच्छेदकसंबन्धेनेति क्वचित् पाठः। स च प्रामादिकः। व्यभिचारिणि सर्वेषामेवाभावानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिवारणाय भावरूपप्रतियोगिनिवेशसार्थक्येऽपि साध्यतावच्छेदकसंबन्धेनेत्यस्य [2]व्यर्थत्वात्। न च तदनिवेशे व्यभिचारिणि महाकालभिन्नः कालत्वादित्यादौ सर्वेषामभावानां कालिकसंबन्धेन प्रतियोगिसमानाधिकरणत्वात् गगनादीनां कालवृत्तित्वस्वीकारात्, गगनाभावस्यापि तथात्वात्; गगनादीनां कालावृत्तित्वेऽपि, "ईश्वरज्ञानभिन्नं गुणत्वादि"त्यादौ सवेषामेवाभावानां विषयितासंबन्धेन प्रतियोगिसमानाधिकरणत्वात् तन्निवेश आवश्यक इति वाच्यम्; भावात्मकानां महाकालभेदेश्वरज्ञानभेदाभावानां भावरूपप्रतियोगिसामानाधिकरण्याभावात्। न च तादृशाभावानां महाकालेश्वरज्ञानभिन्नाभावानां च लाघवात् महाकालत्वेश्वरज्ञानत्वादिरूपत्वस्वीकारात् प्रसिद्ध्यत्येव तेषां भावः

[2] "नास्माकमेव दोष" इत्यपि गादाधर्यो पाठः। नास्माकमेवेति कृष्णम्भट्टीये प्रतीकधारणम्—स्व.

[1] कृष्णम्भट्टीये "साध्यतावच्छेदकसंबन्धनिवेशो आवश्यकः" इति—स्व.

प्रतियोगीति वाच्यम्; तथापि सर्वत्र व्यभिचारिण्येतद्रूपध्वंसाभावस्य यावदन्तर्गतस्य भावरूपप्रतियोग्यप्रसिद्ध्यैवातिव्याप्तिवारणस्य सुकरत्वात्।

"यत्किञ्चिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च[1]"ति। नन्वेवं वह्निमान् धूमादित्यादौ महानसीयवह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकमहानसीयवह्न्यभावमादायाव्याप्तिसंभवे सत्तासाध्यकानुधावनं निर्बीजमिति चेत्;

अत्र केचित्—यत्किञ्चिद्रूपे साध्यतावच्छेदकव्यापकत्वनिवेशे महानसीयवह्न्यभावस्योक्तस्थले न लक्षणघटकत्वमिति तत्पर्यन्तानुधावनमित्याहुः।

वस्तुतस्तु—साध्यतावच्छेदकावच्छिन्नत्वनिवेशस्य विशिष्टसत्तासाध्यकजातिहेतौ व्यावृत्तेः पूर्वमुक्तत्वात् सत्ताया जातेश्चोपस्थितत्वात् तत्राव्याप्तिरुक्तेति ध्येयम्।

"न तु तथाविधविशेष्यतात्वेने"ति। विशेषरूपेण संसर्गतास्वीकारे व्यभिचारिणि साध्यवदनुयोगिकस्वरूपसंबन्धस्यापि व्यापकताघटकतया तेन संबन्धेन वाच्यत्वाभावस्य व्यभिचारनिरूपकाधिकरणे प्रतियोगिसामानाधिकरण्याभावात् अभावे यावत्वं व्यर्थम् स्यादिति भावः। ननु संबन्धसामान्येन धूमं प्रति धूमान्यत् यत्समवेतं तदन्यप्रमेयस्यापि स्वरूपसंबन्धेन व्यापकतया तदभावस्य संयोगसंबन्धावच्छिन्नधूमनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंबन्धसामान्यान्तर्गतसंयोगेनायोगोलकादौ प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिरिति चेन्न; स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकतादृशप्रमेयाभावस्य सर्वत्र वाच्यत्वाभावादिरूपतादृशप्रमेयसत्त्वेनाप्रसिद्धतया संयोगादिसंबन्धावच्छिन्नाभावस्य च धूमत्वस्यैवावच्छेदकत्वसंभवेनाप्रसिद्धेः।

"यत्त्वि"त्यादि। विशिष्टसत्तासाध्यके व्यभिचारिणि गुणान्यत्वद्रव्यत्वाभावप्रतियोगिनां साध्यवद्गुणादिनिष्ठभेदप्रतियोगितावच्छेदकतया न

[1] निवेशे च सत्तावानि"ति—ग.

तेषां लक्षणघटकता संभवतीति सत्ताद्यभावमादायातिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति । "एतन्मते तदनिवेशेन लाघवादि"ति । ननु भेदत्वस्य तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वरूपस्य निवेशात् न लाघवावकाशः । न च भेदत्वमखण्डोपाधिरिति मतेनेदमिति वाच्यम् ; एवं सत्यपि वह्निमान् धूमादित्यादौ साध्यव्यापकत्वेनाभिमतद्रव्यत्ववाच्यत्वादेरपि साध्यवन्निष्ठो यो द्रव्यात्यन्ताभावादिस्तस्यापि स्वावच्छिन्नभिन्नभेदस्वरूपत्वात् भेदत्वेन तत्प्रतियोगितावच्छेदकत्वेन साध्यव्यापकस्यैवाप्रसिद्धेः साध्यवन्निष्ठाभावीया या तादात्म्यसंबन्धावच्छिन्नप्रतियोगिता तदनवच्छेदकत्वरूपस्यैव साध्यव्यापकत्वस्य निवेशनीयत्वात् ।

अत्र केचित्—भेदत्वमनुयोगिताविशेषः ; एवं च साध्यवद्वृत्तितावच्छेदकतादृशानुयोगितानिरूपकतानवच्छेदकत्वरूपव्यापकत्वस्यैव निवेश्यत्वात् न साध्यव्यापकाप्रसिद्धिः । न चैवं लाघवानवकाशः ; वह्न्याद्यभावीयप्रतियोगित्वावच्छिन्नाभावे विद्यमानो यो घटत्वाभावादिभेदः तस्य अधिकरणस्वरूपानतिरिक्ततया साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य वह्न्याद्यभावप्रतियोगितायां दुर्घटत्वात् व्यापकताघटकसंबन्धावच्छिन्ना या साध्यवद्वृत्तितावच्छेदकाभावत्वनिरूपकता तदनवच्छेदकत्वपर्यन्तनिवेशावश्यकत्वात् । अथैवमपि व्यधिकरणधर्मावच्छिन्नावच्छेदकताकभेदमादाय व्यापकत्वाप्रसिद्धिवारणाय स्वव्यधिकरणधर्मानवच्छिन्नावच्छेदकताया एव निवेशनीयतया न लाघवावकाशः इति चेन्न ; तन्निवेशस्य सामानाधिकरण्येनानवच्छेदकत्वनिवेशेन समानत्वात् । व्यधिकरणधर्मावच्छिन्नावच्छेदकताकात्यन्ताभावाभ्युपगमे त्वेतन्मतेऽप्यवच्छेदकतायां स्वव्यधिकरणधर्मानवच्छिन्नत्वनिवेशावश्यकत्वाच्चेति वदन्ति ।

"घटत्वविशिष्टपर्याप्ततये"ति । घटत्वघटोभयत्वाच्छेदेन पर्याप्ततयेत्यर्थः । "शुद्धघटस्ये"ति । घटत्वावच्छेदेन तत्पर्याप्त्यनधिकरणत्वादि-

त्यर्थः। "लक्षणघटकत्वापातादि"ति। अथ पर्वतत्वात्मकाभावस्य लक्षणघटकत्वेऽपि न क्षतिः; तस्य व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वादिति चेत्;

अत्र केचित्—घटत्वाभाववान् मेयत्वादित्यादौ घटत्वात्मकाभावस्य तादृशप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेर्वारणाय प्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायां व्याप्यवृत्तितानिरूपकत्वस्य यादृशप्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः तादृशत्वरूपस्य स्वाभावत्वानवच्छिन्नत्वस्य वा निवेशनीयत्वात्; न च तत्र घटत्वाभावप्रकारकप्रमाभावमादायातिव्याप्तिवारणं संभवति; जन्यप्रमायाः प्रतियोगिवैयधिकरण्याघटितव्यापकत्वासंभवात्; प्रमासामान्याभावस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव प्रसिद्धेः तस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वात्; न च तत्र घटभिन्नस्य तादात्म्यसंबन्धेन साध्यव्यापकतया तद्भेदस्य व्यापकताघटकतादात्म्यसंबन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहेण नातिव्याप्तिरिति वाच्यम्। प्रतियोगितायाः प्रतियोगिस्वरूपत्वे[1] घटभिन्नभेदीयप्रतियोगिताया व्यापकतानवच्छेदकत्वादित्याहुः।

अत्रेदं बोध्यम्—प्रतियोगितायाः प्रतियोगिस्वरूपत्वे गवाभावमादाय लक्षणद्वयसाधारणयावद्धेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यनिवेशव्यावृत्तिदानासंगतिः, तस्य लक्षणघटकत्वासंभवात्; धूमाभावस्य लक्षणघटकत्वाभावेन जलादिवृत्तीत्यादिग्रन्थानुत्थितिश्चेति प्रतियोगितायाः प्रतियोगिस्वरूपत्वं नानुमतं ग्रन्थकृतामिति[2] घटभिन्नभेदस्यापि उक्तस्थले लक्षणघटकत्वं दुर्वारम्।

[1] प्राचीनमते सामान्याभावीयप्रतियोगिता प्रतियोगितदभावोभयस्वरूपा, विशेषाभावीयप्रतियोगिता च केवलप्रतियोगिस्वरूपा—स्व.

[2] ग्रन्थकर्तुरिति—ग.

वस्तुतस्तु—वक्ष्यमाणरीत्या व्यापकतावच्छेदकप्रतियोगितायां भेदानवच्छिन्नत्वविशेषणावश्यकतया न घटभिन्नभेदस्य लक्षणघटकत्वमित्यवधेयम्।

"हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपी"ति। अथैवमपि घटत्वेन पर्वतत्वाभावाभावमादायाव्याप्तिर्दुर्वारैव। न च समनियताभावानामैक्यमते तस्य घटत्वेन वह्न्यधिकरणत्वाभावाभिन्नतया वह्न्यधिकरणत्वरूपप्रतियोगिसामानाधिकरण्यं संभवत्येवेति वाच्यम्; तन्मते धूमवान् वह्नेरित्यादौ वक्ष्यमाणातिव्याप्तिवारणाय [2]यद्यत्प्रतियोगिताकाभावा इति निवेशस्यावश्यकत्वात्।

अत्र केचित्—भावप्रतियोगिकत्वरूपस्य भावभिन्नत्वस्यैव तादृशविशेषणेन विवक्षितत्वात् घटत्वादिना पर्वतत्वाभावाभावस्यातथात्वान्न दोषः। न चैवं सति पर्वतावृत्तित्वावच्छिन्नाभावस्य लाघवेन पर्वतत्वात्मकस्य साध्यवति दैशिकविशेषणतया वृत्तित्वविरहेण लक्षणघटकत्वापत्तिरिति वाच्यम्; भावमात्रप्रतियोगिकत्वस्य तदर्थत्वात्; निरूक्ताभावस्य पर्वतावृत्तिपर्वतत्वाभावादिप्रतियोगिकत्वात्। न च तथापि पर्वतावृत्तिजातित्वावच्छिन्नाभावस्य लाघवेन पर्वतत्वात्मकस्य लक्षणघटकत्वं दुर्वारमिति वाच्यम्; भावभिन्नत्वमित्यनेन साध्यवद्वृत्तिः यो भावः तत्प्रतियोगिप्रतियोगिकान्यत्वस्य विवक्षणान्न कोऽपि दोष इत्याहुः।

[1] धूमवान् वह्नेरित्यादौ अतिव्याप्तिवारणाय भेदानवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयम्; तथा सति सद्धेतौ साध्यशून्यभिन्नस्यापि तादात्म्यसंबन्धेन साध्यव्यापकतया तद्भेदस्यापि लक्षणघटकतया अव्याप्तिप्रसक्तिः; तद्वारणाय व्यापकतावच्छेदकप्रतियोगितायां भेदानवच्छिन्नत्वमावश्यकमिति वक्ष्यमाणरीत्येत्यर्थ—स्व.

[2] धूमाभावस्य धूमत्वेन प्रमेयसामान्याभावाभिन्नतया घटत्वादिना धूमाभावस्य घटत्वादिना वह्न्यभावाभिन्नतया अतिव्याप्तेः; तद्वारणाय यद्यत्प्रतियोगिताकाः यावन्तोऽभावाः तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यमिति विवक्षायाः आवश्यकत्वादिति—स्व.

परेतु—पर्वतत्वाभावत्वावच्छिन्नप्रतियोगितायाः सामान्याभावीय-प्रतियोगितायाः [1]प्रतियोगितावच्छेदकधर्मस्वरूपत्वमिति जगदीशोक्तरीत्या[2] पर्वतत्वाभावत्वस्वरूपत्वात् तदवच्छिन्नाभाव एव पर्वतत्वस्वरूपः, घटत्वेन पर्वतत्वाभावाभावीयप्रतियोगिताया [3]अतिरिक्ततया तदवच्छिन्नाभावो न पर्वतत्वस्वरूप इति तस्य दैशिकविशेषणतया साध्यवद्वृत्तित्वात् न तादृश-प्रतियोगिताया व्यापकतावच्छेदकत्वमिति तादृशाभावस्य लक्षणघटकत्वमेव नास्तीति पूर्वपक्ष एवायं नावतरतीति वदन्ति।

"[4]सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्ये"ति। प्रतियोगिता-समानाधिकरणवृत्त्यवच्छेदकतात्वावच्छिन्नपर्याप्तिशून्यत्वस्येत्यर्थः; तेन वह्न्या-दिनिष्ठप्रतियोगित्वतदवृत्तिप्रतियोगित्वाभ्यां वह्न्यभावमादाय न वह्न्यादि-निष्ठप्रतियोगितानां व्यापकतावच्छेदकत्वानुपपत्तिः वह्निनिष्ठप्रतियोगित्वेन वह्नितदन्योभयाभावीयप्रतियोगितावच्छेदकत्वं तु तादृशोभयत्वान्तभावेनैव पर्याप्तम्।

केचित्तु—समानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिता प्रतियो-गितावच्छेदकरूपा; व्यधिकरणधर्मावच्छिन्नप्रतियोगिता चातिरिक्ता एवं

[1] सामान्याभावीयप्रतियोगितायाः प्रतियोगितावच्छेदकधर्मस्वरूपत्वे घटाभावादि-प्रतियोगितावच्छेदकीभूतघटत्वादेरवच्छेदकत्वमवच्छेद्यत्वं च स्यात्; न चेष्टापत्तिः; अवच्छे-दकावच्छेद्यभावस्य भेदनियतत्वादिति चेन्न; केवलस्य घटत्वादेरवच्छेदकत्वमभावनिरूपि-तत्वविशिष्टस्यावच्छेद्यत्वमित्यभ्युपगमात्। यद्यपि प्रतियोगितावैलक्षण्याधीनमेवाभाववैलक्ष-ण्यमिति संयोगेन घटाभावात् समवायेन घटाभावस्य वैलक्षण्यं न भवति तथापि प्रतियो-गितायाः प्रतियोगितावच्छेदकरूपत्वस्वीकारेऽपि न निखिलसंबन्धावच्छिन्नत्वमिति न दोषः—स्व.

[2] चक्रवर्तिलक्षणे—स्व.

[3] व्यधिकरणधर्मावच्छिन्नाभावस्थले च प्रतियोगिता न प्रतियोगितावच्छेदकस्वरूपा, किन्तु अतिरिक्ता अन्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनैव सार्धमभावस्य विरोधात् तदवच्छिन्नवति तादृशाभावस्यासत्त्वप्रसङ्गात्—स्व.

[4] "सामानाधिकरण्यप्रत्यासत्यवच्छिन्नत्वनिवेशेन" इत्येव गादाधर्यां पाठो वर्तते—स्व.

चात्र सामानाधिकरण्यमभेदः; तथा च तादृशप्रतियोगित्वाभेदतदवच्छेदकत्वोभयाभावः सामानाधिकरण्येनानवच्छेदकत्वमिति न कोऽपि दोष इति वदन्ति ।

"गौरवादि"ति—ननु प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वघटकावच्छिन्नत्वाधिकरणत्वादौ तत्संबन्धावच्छिन्नत्वस्य यादृशयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं साध्यवतः तादृशतादृशप्रतियोगितावच्छेदकत्वाभावकूटस्य तन्मते निवेशनीयतया नैतन्मते गौरवमिति चेन्न; तन्मते साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकत्वाभावस्यानुगतस्यैव निवेशनीयत्वात् । "वह्निसंयोगादी"ति । यद्यप्यत्र तत्तत्संयोगाभावः सर्वत्रैव लक्षणघटक इत्यसंभव एव वक्तुमुचितः तथापि साध्यसमानाधिकरणनिष्ठत्वेन व्यापकतावच्छेदकप्रतियोगिताविशेषणत्वे "एतद्रूपवानेतद्रसादि"त्यादौ लक्षणसमन्वयः तादृशप्रतियोगिताकाभावस्य हेतुमति प्रतियोगिसामानाधिकरण्यनियमादित्यभिप्रायः ।

साध्यतावच्छेदकसंबन्धेन प्रतियोग्यधिकरणत्वनिवेशे त्वाह—"कालस्सर्ववानि"ति । "सामान्यादिमात्रवृत्ती"ति । भावानां स्वरूपसंबन्धः अभावानां दैशिकविशेषणतासंबन्धश्च विलक्षणः; एवं च वाच्यत्वसाध्यके घटत्वादिना वाच्यत्वाभावमादाय लक्षणसमन्वय इति मात्रपदम्, तथा च जात्यभावसाध्यके व्यभिचारिणि दैशिकविशेषणतायाः व्यापकताघटकत्वाभावे घटत्वादिना वाच्यत्वाभावमादायातिव्याप्तिसत्वेऽपि साध्यवत्वप्रकारकप्रमाभावमादायातिव्याप्तिवारणं संभवतीति प्रघट्टकार्थः । "[1]प्रतियोग्यनधिकरणसाध्यवतोऽप्रसिद्धिरि"ति । अथ घटादिभिन्नत्वेन घटाद्यभावीयप्रतियोगिताया घटादिमात्रवृत्तिताया अन्यत्रोक्तत्वात् यादृश-

[1] "प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिः" इति गादाधर्यां पाठो विद्यते—स्व.

पदेन तादृशप्रतियोगितामादाय तदाश्रयानधिकरणत्वं साध्यवतोऽस्त्यैवेति कथमप्रसिद्ध्यभिधानम्? घटभिन्नत्वेन घटगगनान्यतराभावीयप्रतियोगितायास्तादृशप्रतियोगित्वाभिन्नत्वे बाधकाभावात्, तादृशप्रतियोगिताया घटमात्रवृत्तित्वासंभवस्तु न शंक्यः तथापि अप्रसिद्धेरभावात्।

अत्र केचित्—अप्रसिद्धिरित्यस्य यादृशप्रतियोगिताश्रयानधिकरणं साध्यवत् तादृशसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताया अप्रसिद्धिः; तथा चासंभवः; घटभिन्नत्वेन घटाभावस्यापि लक्षणघटकत्वात् तस्य यावद्धेत्वधिकरणेषु प्रतियोगिसामानाधिकरण्याभावात्। न च समनियताभावैक्यमते तस्य घटत्वादिना वह्न्यभावाभिन्नतया वह्निरूपप्रतियोगिसामानाधिकरण्यसंभवः इति वाच्यम्; समनियताभावैक्यमतेऽतिव्याप्तिवारणाय यद्यत्प्रतियोगिताका इत्यादिविवक्षणावश्यकत्वात् इत्याहुः।

अपरे तु—यादृशयादृशप्रतियोगिताश्रयानधिकरणं साध्यवत् तादृशतादृशप्रतियोगितावच्छेदकत्वाभावकूटनिवेशे घटत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वाभावनिवेशे गौरवात् प्रतियोगित्वनिष्ठा या समानाधिकरणतया अवच्छेदकता तन्निरूपकप्रतियोगित्वावच्छिन्नप्रतियोगितैव यादृशप्रतियोगितेत्यनेनोपादेया; तथा च तादृशप्रतियोगिताया अप्रसिद्धिः घटभिन्नत्वावच्छिन्नप्रतियोगिताया अप्युपादानासंभवादिति वदन्ति।

ननु समनियताभावैक्यमते प्रतियोगितावच्छेदकविशिष्टत्वस्य व्यावृत्तिरसंगतैव; तन्मते गोत्वाभावादीनां गोत्वत्वेन प्रमेयसामान्याभावाभिन्नतया सर्वत्र प्रमेयरूपप्रतियोगिसामानाधिकरण्यसंभवात् साध्यतावच्छेदकेत्यादिविशेषणस्यैव वैयर्थ्यात्। न च तदनैक्यमताभिप्रायेणैव तद्विशेषणमिति वाच्यम्; तदनैक्यमताभिप्रायेणप्रविष्टसाध्यतावच्छेदकेत्यादिदलप्रविष्टप्रतियोगितावच्छेदकविशिष्टत्वव्यावृत्तेस्तदैक्यमताभिप्रायेणकथनस्यायुक्तत्वादिति चेन्न; समनियताभावैक्यमतेऽपि साध्यतावच्छेदकेत्यादिविशेषण-

व्यावृत्तेः संभवात्; तथा हि तन्मते तुल्ययुक्त्यातिव्याप्तिवारणाय यद्यत्प्रतियोगिताका यावन्तोऽभावाः स्वावच्छेदकसंबन्धेन प्रतियोगिसमानाधिकरणा इति विवक्षाया आवश्यकत्वात्। "सत्तावान् जाते"रित्यादौ संयोगादिना घटाभावस्य तादृशयावदन्तर्गतस्य यावद्धेत्वधिकरणान्तःपातिगुणादौ संयोगेन प्रतियोगिसामानाधिकरण्याभावात् साध्यतावच्छेदकेत्यादिविशेषणस्यावश्यकत्वादिति [1]दिक्।

"फलतः साध्यवदि"ति। वह्निसाध्यके महानसीयवह्न्यभावीयप्रतियोगित्वावच्छिन्नस्य साध्यवत्संबन्धत्वसामान्याभावविरहेण तादृशाभावीयप्रतियोगिताया व्यापकतावच्छेदकत्वापत्तिवारणाय यत्किञ्चिदिति। नन्वत्र सामान्यपदं व्यर्थम्। न च तदनुपादाने वह्निसाध्यके वह्निसामान्याभावीयप्रतियोगित्वावच्छिन्नयत्किञ्चिन्महानसीयवह्नेः साध्यवद्यत्किञ्चित्पर्वतासंबद्धत्वेन वह्निसामान्याभावीयप्रतियोगिताया व्यापकतावच्छेदकत्वानुपपत्तेस्तदावश्यकमिति वाच्यम्। तादृशप्रतियोगिताया व्यापकतानवच्छेदकत्वेऽपि द्रव्यत्वाभावमादायैव लक्षणसमन्वयसंभवात्।

अत्र केचित्। सामान्यपदानुपादाने वह्न्यभावद्रव्याद्यभावीयानेकप्रतियोगिताभेदकूटनिवेशापत्तेः गौरवात् कूटसंकोचार्थं सामान्यपदोपादानम्; न च तथा सति तादृशानेकाभावानां लक्षणघटकतापत्तेस्तेषां प्रत्येकं प्रतियोगिसामानाधिकरण्यनिवेशे गौरवमिति वाच्यम्; अनुयोगिन्येकमात्रवृत्तित्वस्यापि निवेशादित्याहुः।

तदसत्; तथा सति गवाभावस्येति ग्रन्थासंगतेः, जलादिवृत्तित्वविशिष्टेत्यादिग्रन्थासंगतेश्च दुर्वारत्वात्; तादृशग्रन्थानुरोधेनैव सामान्यपदोपादानमित्यस्यैव वक्तुं शक्यत्वाच्च।

[1] अवेहि—ग.

वस्तुतस्तु—"वाच्यं ज्ञेयत्वादि"त्यादौ सत्ताभावीयप्रतियोगिताया अपि समवायेन व्यापकतावच्छेदकत्वापत्तिः तत्र तादृशप्रतियोगितायाः स्वपदेनोपादाने तदवच्छिन्नस्य साध्यवद्द्रव्यगुणकर्मरूपव्यक्तिसंबद्धत्वनियमात् समवायेन सामान्यादिसंबद्धत्वाप्रसिद्धेश्च घटाद्यभावीयप्रतियोगिताया एव स्वपदेनोपादेयत्वात् तदन्यत्वस्य तादृशप्रतियोगितायामक्षतत्वात्, सत्ताभावस्यापि लक्षणघटकतया तस्य च व्यापकताघटकसमवायेन यावद्धेत्वधिकरणसामान्याद्यन्तर्भावेन प्रतियोगिसामानाधिकरण्याभावादव्याप्तेर्वारणाय व्यापकताघटकसंबन्धावच्छिन्नस्वावच्छिन्नाधिकरणतासामान्ये साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धत्वमेव निवेशनीयं, तत्र च सामान्यपदानुपादानेऽधिकरणताया अधिकरणस्वरूपत्वमते वह्न्यादिसाध्यके व्यापकतावच्छेदकप्रतियोगिताया अप्रसिद्ध्यापत्तेः द्रव्यत्वाभावीयप्रतियोगित्वावच्छिन्नाधिकरणतायाः महानसादिरूपायाः साध्यवद्यत्किञ्चित्पर्वतासंबद्धत्वादतः सामान्यपदोपादानम्। अथैवमपि द्रव्यत्वाभावीयप्रतियोगितायाः [1]संयोगादिरूपव्यधिकरणसंबन्धघटितव्यापकतावच्छेदकत्वापत्तिः; संयोगसंबन्धावच्छिन्नतदवच्छिन्नाधिकरणत्वाप्रसिद्ध्या तस्या स्वपदेनोपादानासंभवात्; तथा सति तादृशप्रतियोगिताकाभावस्य यावद्धेत्वधिकरणगुणादौ तादृशसंयोगेन प्रतियोगिसामानाधिकरण्याभावात् "सत्तावान् जातेरित्या"दावव्याप्तिर्दुर्वारैवेति वाच्यम्। यादृशसंबन्धावच्छिन्नाधिकरणतासामान्ये यादृशप्रतियोगित्वावच्छिन्ननिरूपकताकत्वसाध्यवद्यत्किञ्चिद्व्यक्तिवृत्तित्वोभयाभावस्तदन्यत्वमेव तेन संबन्धेन व्यापकतावच्छेदकत्वमित्यस्य विवक्षणादिति दिक्।

"आत्ममहाकालान्यतरत्वादि"ति। विषयितासंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वप्रकारकयत्किञ्चित्प्रमाभावस्य प्रति-

[1] संयोगेन व्यापकतावच्छेदकत्वापत्तिः—अ.

योग्यसमानकालीनखण्डकाले प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिरिति हेतुकोटौ महेत्युक्तम् । "कारणत्वादी"ति । आदिपदेन परमार्थसत्वपरिग्रहः तस्य कालसंबन्धरूपत्वात् । अवृत्तित्वप्रवादानुरोधेनाह— "नित्ये"ति । अत्रापि कालान्यत्वप्रकारकयत्किञ्चित्प्रमाभावस्य ज्ञानभेदप्रकारकयत्किञ्चित्प्रमाभावस्य च प्रतियोग्यसमानकालीने खण्डकाले प्रतियोग्यविषयके ज्ञाने च प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरतो महेतीश्वरेति चोपात्तमिति ध्येयम् ।

"इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादि"ति । अथ नित्यज्ञानत्वाभावीयप्रतियोगिताया विषयितासंबन्धघटितव्यापकतावच्छेदकत्वं न संभवति साध्यवति नित्यज्ञाने सर्वस्यैव विषयितासंबन्धेन सत्वात् तेन संबन्धेन स्वप्रतियोग्यनधिकरणसाध्यवतोऽप्रसिद्धत्वात् । विषयितासंबन्धेन साध्यवन्नित्यज्ञानासंबद्धस्वविशिष्टसामान्यकप्रतियोगिताया अप्रसिद्धत्वाच्च । एतेन ज्ञानेच्छयोः समानविषयकत्वनियमात् गंगापदजन्यबोधविषयत्वविशिष्टतीरत्वावच्छिन्नाधिकरणता ज्ञाने न स्वीकर्तुं शक्यते; तथा सति तीरे गंगापदशक्तिरेव स्यात्, एवं नित्यज्ञानान्यत्वविशिष्टघटत्वावच्छिन्नाधिकरणतापि इति स्वीकारेऽपि न निस्तारः साध्यवद्यत्किञ्चिदित्यादिपरिष्कारस्य आवश्यकत्वात्; तत्र च घटत्वाद्यनन्तभेदनिवेशे गौरवेण लाघवेन प्रतियोगिताया एव स्वपदेनोपादेयतया तादृशतीराभावीयप्रतियोगिताया नित्यज्ञानान्यत्वविशिष्टघटाभावीयप्रतियोगितायाश्च विशेष्यीभूततीरघटमात्रनिष्ठतया तदवच्छिन्नस्य नित्यज्ञानासंबद्धत्वविरहात् ।

अत्र केचित्—प्रतियोगिवैयधिकरण्याघटितव्यापकत्वाभिप्रायकमिदम्; तथा च साध्यवन्निष्ठो यो व्यधिकरणधर्मेण विषयितया प्रतियोगित्वावच्छिन्नाभावस्तत्प्रतियोगितायां सामानाधिकरण्येनानवच्छेदकत्वरूपं विषयि-

तया साध्यव्यापकतावच्छेदकत्वं नित्यज्ञानत्वाभावीयप्रतियोगितायामक्षतम् । न च तादृशप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकत्वाप्रसिद्धिः शंक्या ; सामानाधिकरण्यावच्छेदकत्वोभयाभावस्य[1] । [[2]प्रतियोगितासमानाधिकरणवृत्तित्वावच्छिन्नावच्छेदकत्वनिष्ठप्रतियोगिताकाभावस्य वा सामानाधिकरण्येनानवच्छेदकत्वमित्यनेन विवक्षणात् ।] प्रतियोगिवैयधिकरण्यघटितव्यापकत्वकल्पे तु नित्यज्ञानान्यत्व-स्वनिष्ठतद्व्यक्तित्वोभयविषयकं जन्यज्ञानं पक्षः तन्निष्ठतद्व्यक्तित्वं साध्यं तद्व्यक्तिनित्यज्ञानान्यतरत्वं हेतुस्तत्र तद्व्यक्तित्वनित्यज्ञानान्यत्वाभावप्रतियोगिनोर्विषयितासंबन्धेन व्यापकतया तेन संबन्धेन तादृशाभावयोः प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिवारणाय येन येनेति वीप्सा आवश्यकीत्याहुः ।

वस्तुतस्तु—नित्यज्ञानमित्यत्र नित्यत्वविशिष्टं ज्ञानत्वमेव साध्यत्वेन विवक्षितम्, वैशिष्ट्यं च स्वरूपस्वाभावविशिष्टघटाविषयकसर्वविषयकज्ञानत्ववत्त्वान्यतरसमवायोभयसंबन्धघटितसामानाधिकरण्यसंबन्धेन ; तथा च साध्यवत्घटाविषयकसर्वविषयकज्ञाननिष्ठो यो घटाभावीयप्रतियोगित्वावच्छिन्नस्य विषयितासंबन्धावच्छिन्नप्रतियोगिताकोऽभावस्तत्प्रतियोगितानवच्छेदकत्वस्य नित्यज्ञानत्वाभावीयप्रतियोगितायामक्षतत्वात् न काचिदपि क्षतिः इति सुधियो विभावयन्तु ।

समनियताभावैक्यमते घटत्वादिना द्रव्यत्वाभावस्य घटत्वादिना वह्न्यभावाभिन्नतया साध्यतावच्छेदकसंयोगसंबन्धेन वह्निरूपप्रतियोगिसामानाधिकरण्यसंभवमाशंक्याह—"घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिने"ति । हेतुसामानाधिकरण्यसंपत्तये घटवृत्तित्वविशिष्टेति ।

[1] सामानाधिकरण्यावच्छेदकत्वोभयाभावस्यैव निविष्टत्वात्—ग.

[2] [ ] एतत्पाठो नास्ति—ग.

"उभयाभावघटिते"ति । स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसंबन्धसामान्यकत्वरूपेत्यर्थः । "अव्याप्तेरिति" । [1]नन्वेवमभावपदस्य पूर्वोक्तभावभिन्नार्थकत्वात् न घटत्वाभावसाध्यकेऽव्याप्तिरिति चेन्न; तथा सति कपिसंयोगात्मकाभावमादाय स्वविशिष्टत्वविशेषणव्यावृत्त्यसंगतेः। ननु "सत्तावान् जाते"रित्यादौ तद्व्याप्तिः संभवतीत्यत आह—"एवमि"ति ।

"उक्तातिव्याप्तेरि"ति । "घटत्वाभाववान् मेयत्वादि"त्यादौ इत्यर्थः । अभावे भावभिन्नत्वस्य प्रतियोगिनि भावत्वस्य च निवेशे त्वाह—"[2]आत्मत्वसाध्यके"ति ।

"बाधबुद्धिप्रतिबन्धकताया"इति । तद्वत्ताज्ञाननिष्ठतत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशाल्यनाहार्यज्ञानत्वावच्छिन्नप्रतिबद्ध्यतानिरूपिततदभाववत्ताज्ञाननिष्ठप्रतिबन्धकताया इत्यर्थः । "संबन्धविशेषनियन्त्रितत्वानुरोधा[3]दि"ति । [4]तद्धर्मावच्छिन्नप्रतियोगित्वांशे तत्संबन्धावच्छिन्नत्वावगाहित्वघटिततद्धर्मावच्छिन्नत्वानुरोधादित्यर्थः । "अन्यथा" । तेन संबन्धेन तद्वत्ताज्ञानं प्रति केवलतदभावावगाहिनिश्चयस्य प्रतिबन्धकत्वे । "अविरोधित्वप्रसंगादि"ति । अत्र वस्तुगत्या घटसंयोगविरोधी योऽभावः तद्वृत्त्यनुयोगितासंबन्धावच्छिन्नप्रतियोगिप्रकारतानिरूपिताभावत्वावच्छिन्नप्र-

[1] नन्वभावपदस्य—ग.

[2] "आत्मत्वादि साध्यकस्थले" इति गादाधर्यां पाठो दृश्यते—स्व.

[3] "संबन्धविशेषनियन्त्रितत्वानुरोधेन" इति गादाधर्यां दृश्यते—स्व.

[4] तद्धर्मविषयतावच्छिन्न-अवच्छिन्नत्वविषयतावच्छिन्न-प्रतियोगित्वविषयतात्वेन प्रतियोगित्वविषयता निवेशनीया; तेन, गुरुधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि कम्बुग्रीवादिमान् नास्तीत्याकारकबाधबुद्धिप्रतिबन्धकतायां नानुपपत्तिः—स्व.

कारताकज्ञानत्वेन प्रतिबन्धकत्वात् न दोषः इति नाशंकनीयम्; तादृशानुयोगितात्वेनान्यानुयोगितावगाहिज्ञानस्याप्रतिबन्धकत्वप्रसंगात्। "उपनीतकाञ्चनमयत्वादिना [1]वह्न्यनुमिती"ति। काञ्चनमयत्वज्ञानरूपसन्निकर्षसहकारेण वह्नित्वावच्छिन्नव्याप्यवत्तापरामर्शजन्यकाञ्चनमयत्वप्रकारेण वह्न्यनुमितीत्यर्थः।

"प्रकारान्तरानुसरणे" इति। हेत्वधिकरणवृत्तितावच्छेदकस्वप्रतियोगितावच्छेदका ये ये संबन्धाः प्रत्येकं तेन संबन्धेन प्रतियोगिसामानाधिकरण्ये सति तेन संबन्धेन प्रतियोगिसामानाधिकरण्यमिति निवेशानुसरणे इत्यर्थः। "अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्येत्येव पाठः तदुत्तरं तदुपादाय वा साध्यतावच्छेदकव्यापकप्रतियोताकाभावनिवेश इति" पाठः प्रामादिक[2] एव; तथाहि—साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशकल्पे घटत्वादिना रूपसामान्याभावाभावस्यापि लक्षणघटकतया तस्य प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिः। न च तस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवात् भवत्येवातिव्याप्तिरिति वाच्यम्; घटत्वाभाववान् मेयत्वादित्यादावतिव्याप्तिवारणाय प्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायां निरुक्तव्याप्यवृत्तितानिरूपकत्वस्य निवेशनीयत्वात्। ग्रन्थकृद्भिः[3] ध्वंसप्रागभावरूपप्रतियोगिसामानाधिकरण्यस्यैवोक्तत्वाच्च; न च समनियताभावैक्यमते घटत्वादिना रूपाभावाभावस्य घटत्वादिना वायुत्वाभावाभावाभिन्नतया वायुत्वाभावरूपप्रतियोगिसामानाधिकरण्यमस्त्येवेति वाच्यम्; तत्कल्पे यद्यदित्यादिविवक्षाया बहुशः आवेदितत्वात्; अन्यथा व्यभिचारिसामान्य

[1] "वह्न्याद्यनुमिती"ति गादादर्शो पाठः—स्व.

[2] कृष्णम्भट्टीये तादृशपाठः अङ्गीकृतः—स्व,

[3] "ग्रन्थकृता"—ग.

एवातिव्याप्तेरिति । नन्वेवमपि रूपसामान्याभावे साध्य इति ग्रन्थोऽत-एवेतिग्रन्थोत्तरमेव लेखनीय इति संदर्भाशुद्धिर्दुर्वारैवेति चेत्;

अत्र केचित्—उक्तरीत्या अत एवेति ग्रन्थेऽवतारिते यावत्त्व-विशेषणस्य साध्यतावच्छेदकेत्यादिविशेषणनिर्वाह्यतया तद्व्याावृत्तिप्रदर्शक-ग्रन्थ आवश्यकः; एवमपि अयमात्मा ज्ञानादित्यादावव्याप्तिवारणाय येनेत्यादिग्रन्थः ततश्च मनोन्यत्वाभावस्य परंपरासंबन्धेन प्रतियोगिसाम-नाधिकरण्यसंभवात् नोक्तातिव्याप्त्युद्धार इति शंकायामेवं दलान्तरेऽपीति लिखित्वा प्रकृतं समाप्य रूपादीत्यादिनोपेक्षाबीजदर्शनमिति न संदर्भा-शुद्धिरिति वदन्ति ।

"[1]रूपात्मकाभावस्य स्वध्वंसप्रागभावरूपप्रतियोगी"ति । भावस्य प्रागभावध्वंसयोरतिरिक्तत्वेऽपि ध्वंसस्य प्रागभावः प्रतियोगिस्वरूप एव, एवं प्रागभावस्य ध्वंसोऽपि प्रतियोगिरूप एव, लाघवात् तथा च रूपध्वंसप्रागभावस्य रूपप्रागभावध्वंसस्य च रूपस्वरूपत्वात् प्रागभाव-ध्वंसयोश्च सप्रतियोगिकत्वनियमात् रूपप्रतियोगित्वं तत्ध्वंसप्रागभावयोरव्या-हतमित्यभिप्रायः ।

यत्तु—रूपवद्भिन्नभेदस्य रूपस्वरूपत्वस्वीकारात् तादृशभेदप्रति-योगिरूपवद्भिन्नान्तःपातिरूपध्वंसप्रागभावयोः रूपप्रतियोगित्वमित्यभिप्राय-वर्णनम्;

तदसत्; "धूमवान् वह्ने"रित्यादौ सर्वस्यैवातिव्याप्तिवारकधूमा-भावादेः विषयितया स्वावच्छिन्नभिन्नभेदस्वरूपत्वात् तत्प्रतियोगिविषयि-तया स्वावच्छिन्नभिन्नवह्न्यादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्या-प्तिवारणाय प्रतियोगितायां भेदानवच्छिन्नत्वविशेषणमावश्यकम् । न चैवं

[1] रूपाद्यात्मकाभावस्येति गदाधरीपाठः—स्व.

सद्धेतौ साध्यशून्यभिन्नस्यापि तादात्म्यसंबन्धेन साध्यव्यापकतया तद्भेदस्यापि लक्षणघटकतया तस्य व्यापकताघटकतादात्म्यसंबन्धेन भेदानवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्यविरहादव्याप्तिरिति वाच्यम्; व्यापकतावच्छेदकप्रतियोगितायामपि भेदानवच्छिन्नत्वस्य विवक्षितत्वात्; एवं च रूपवद्भिन्नभेदीयरूपध्वंसप्रागभावनिष्ठप्रतियोगिताया अतादृशत्वात् ध्वंसादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्त्यप्रसक्तेः।

"महाप्रलये" इति। खण्डप्रलये परमाणुषु रूपसामान्याभावो न संभवति; तथा सति भाविसर्गे रूपानुत्पादप्रसंगः असमवायिकारणाभावात् तदर्थं परमाणुषु पाककल्पने वरं पूर्वसिद्धरूपस्वीकारेणेत्यतः प्रलय इत्यस्य महाप्रलय इत्यर्थकरणम्। "मानाभावादि"ति। रूपध्वंसादिः न तदत्यन्ताभावविरोधी तत्त्वे साधकाभावादिति प्रयोगो बोध्यः। ननु घटो रूपसामान्याभाववान् नित्यरूपवदन्यत्वादित्यनुमानमेव घटे रूपात्यन्ताभावे प्रमाणमित्यत आह—"अनुमानं चे"ति। "अप्रयोजकम्"। व्यभिचारशंकानिवर्तको यो दर्शितसाध्यहेत्वोः कार्यकारणभावाद्यनुपपत्त्यापादकः तर्कः तच्छून्यमित्यर्थः। "प्रमात्मके"ति। तथा च रूपसामान्याभावो यदि रूपप्रागभावध्वंसावच्छिन्नावृत्तिः स्यात् तदा तद्ध्वंसप्रागभाववत्श्यामघटधर्मिकप्रमाविषयो न स्यादिति तर्केण रक्तरूपध्वंसप्रागभावयो रक्तरूपसामान्याभावाविरोधित्वानुमानेऽप्रयोजकत्वशंकानिरासः। "यत्र घटादौ पाकादि"ति।

अत्रेदं बोध्यम्—अन्तरा श्यामे पूर्वरक्तापररक्ते, चतूरूपीघटेऽपि मध्यरक्तताद‍शायां रक्तं रूपं नास्तीत्यापत्तिसंभवे पञ्चरूपीघटपर्यन्तानुधावनं निर्बीजम्; न च तत्र पूर्वरक्तापरप्रथमरक्तध्वंसप्रागभावयोः सामान्य-

[1] भेद—ग.

धर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वस्वीकारात् रक्तं रूपं नास्तीति प्रतीतिविषयतादृशव्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणतायाश्च तत्रासत्वात् नापत्तिसंभव इति वाच्यम्। पञ्चरूपस्थलेऽपि प्राथमिकरक्तध्वंसमध्यरक्तप्रागभावयो मध्यरक्तध्वंसचरमरक्तप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वोपगमेन तत्राप्यापत्तेरसंभवादिति।

प्राचीनैर्विशेषाभावादन्यस्य सामान्याभावस्यास्वीकारादिष्टापत्तिरतो दूषणान्तरमाह—"एवमि"ति। विनिगमनाविरहेण सर्वस्यैवाभावस्याधिकरणविशेषकालविशेषावच्छेदेन घटत्वपटत्वादिधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्या नाभावभेदविलोप इत्यतो दूषणान्तरमाह—"एवमि"ति। "तत्समानाधिकरणतत्समनियते"ति। अत्र समानाधिकरणेत्यनेन देशतो व्याप्यत्वं विवक्षितम्, समनियतेत्यनेन कालतः समनैयत्यं विवक्षितम्, तेन समनियतस्य सामानाधिकरण्यनियमात् समानाधिकरणेति व्यर्थमिति शंकानवकाशः। यत्र संयुक्तयोः रक्तघटयोः एकस्मिन् घटे रक्तरूपनाशः अन्यस्मिन् रक्तघटे संयोगनाशश्चैकदोत्पन्नः कालतो रक्तध्वंससमनियततादृशसंयोगध्वंसे रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्या तादृशसंयोगध्वंसावगाहिरक्तघटे रक्तं रूपं नास्तीति प्रतीतेः प्रमात्ववारणाय देशतो व्याप्यत्वनिवेशः। एकाधिकरणे भिन्नकालोत्पन्नस्य श्यामरूपनाशस्यापि देशतो रक्तरूपध्वंसव्याप्यत्वात् श्यामनाशस्यापि रक्तकाले रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्या श्यामरूपध्वंसावगाहिन्याः रक्तकाले रक्तं रूपं नास्तीति प्रतीतेः प्रमात्वापत्तिवारणाय कालतः समनैयत्यनिवेशः। "हेत्वधिकरणसामान्यान्तर्भावेनेत्यर्थ"इति। स्वविशिष्टहेतुमद्वृत्तयो यावन्तो धर्माः स्वप्रतियोग्यधिकरणतत्तत्प्रत्येकाश्रयवृत्तित्वमित्यर्थः। एतेनैकमात्रवृत्तिहेतुके

[1] तत्सामान्यान्तर्भावेनेति गदाधरीपाठः। कृष्णम्भट्टीयेऽपि तत्सामान्येति प्रतीकधारणम्—स्व.

हेत्वधिकरणसामान्याप्रसिद्धिः स्वविशिष्टहेत्वधिकरणताव्यापकस्वप्रतियोग्यधिकरणताकत्वनिवेशे कपिसंयोगात्मकाभावस्य प्रतियोग्यधिकरणताया हेत्वधिकरणताव्यापकत्वेनाव्याप्तिविरहात् स्वविशिष्टत्वविशेषणवैयर्थ्यापत्तिरित्यादि दूषणानवकाशः। "धूमवत्त्वप्रकारकप्रमाविषयत्वा[1]भावस्ये"ति। महाकालस्य संयोगेन न धूमवत्त्वमित्यभिप्रायेणेदम्, अन्यथा तादृशप्रमाविषयत्वस्य महाकाले सत्वात् तत्रैव तादृशप्रमाविषयत्वाभावस्य प्रतियोगिसामानाधिकरण्यं संभवतीति बोध्यम्। नन्वत्र धूमाभावमादायातिव्याप्तिवारणसंभवात् तावत्पर्यन्तानुधावनं निर्बीजमिति चेत्;

अत्र केचित्—संयोगेन द्रव्यस्याव्याप्यवृत्तितामते[2] धूमाभावस्यापि प्रतियोगिसामानाधिकरण्यं पर्वतादावस्तीति न तमादायातिव्याप्तिवारणमिति तावत्पर्यन्तानुधावनम्; न च विशेष्यताया अपि ज्ञानसमानकालीनत्वमतेऽव्याप्यवृत्तित्वात् तादृशाभावस्यापि प्रतियोगिसामानाधिकरण्यमक्षतम्, तस्या अतथात्वमतावलम्बने च द्रव्यस्य व्याप्यवृत्तित्वमतावलम्बने[3] संभवात् प्रसिद्धधूमाभावत्यागो निर्बीज एवेति वाच्यम्; धूमनिष्ठप्रकारतानिरूपितप्रमीयविशेष्यतायाः सर्वमत एव व्याप्यवृत्तित्वं, [4]तादृशविशेष्यतात्वस्य ईश्वरीयप्रमाविशेष्यतासाधारण्यात्; धूमस्य व्याप्यवृत्तित्वं तु न तथेति विशेषात्। नन्वेवमपि तस्यापि व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्ति-

[1] "विषयत्वाद्यभावस्ये"ति गादादर्शे दृश्यते; अत्रैवानुपदं आदिपदस्यार्थवर्णनमपि दृश्यते—स्व.

[2] इह पर्वते नितम्बे हुताशनो न शिखर इति प्रतीतेः संयोगेन द्रव्यस्याव्याप्यवृत्तेः। वृत्तेः अव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसंभावितत्वात् इति दीधितिकारेण अन्यत्र प्रतिपादितत्वात्—स्व.

[3] अवलम्बनेन—ग.

[4] व्याप्यवृत्तित्वे हेतुं वर्णयति तादृशविशेष्यतात्वस्येत्यादिना—स्व.

त्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यं दुर्वारमेवेति चेन्न; भावरूपप्रतियोगिसामानाधिकरण्यनिवेशे नातिव्याप्तिरित्यभिप्रायादित्याहुः[1]।

[2]वस्तुतस्तु—महाकालक्रियायोगोलकान्यतमासमवेतत्वावच्छिन्नाभावमादायातिव्याप्तिवारणं बोध्यम्; तादृशाभावस्यापि आदिपदग्राह्यत्वात्।

"[3]महाकाले चेत्युक्तमि"ति। अथ चरमध्वंसात्मकस्यापि अभावस्य एतत्कालीनघटध्वंसादौ प्रलयकालावच्छेदेन सत्वात् एतत्कालावच्छेदेन प्रतियोगिनश्च सत्वात् संभवत्येव खण्डकाले प्रतियोगिसामानाधिकरण्यम्; न च क्रियामात्रस्यैव[4] कालोपाधित्वमित्यभिप्रायेणेदमिति वाच्यम्; तथा सति प्रलयस्यापि कालत्वानुपपत्त्या प्रलयावृत्तिमान् कालत्वादित्यस्य सद्धेतुत्वप्रसंगेन तत्रातिव्याप्तिदानस्यासांगत्यापत्तेरिति चेन्न; प्रलयत्वं हि जन्यद्रव्यानधिकरणत्वे सति द्रव्याधिकरणत्वं, प्रलयस्याकालत्वे च तादृशप्रलयत्वमेव न स्यादिति क्रियातिरिक्तस्य प्रलयात्मकध्वंसस्यैव कालत्वं स्वीक्रियते न तदतिरिक्तध्वंसस्येत्यभिप्रायात् न कोऽपि दोषः।

"अन्यथा पुनः सत्तावानि"ति। यद्यपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वकल्पे हेतुसामानाधिकरण्यांशे स्वरूपसंबन्धावच्छिन्नत्वस्य निवेशावश्यकत्वं पूर्वमुक्तं तदिदानीं कथं स्वविशिष्टत्वानिवेशे तेन संबन्धेन हेतुसामानाधिकरण्यनिवेशं विस्मृत्य सत्ताभावमादायाव्याप्तिप्रदर्शनं संगच्छत इति शंका अवतरति; तथापि गगनादिवृत्तित्वविशिष्टसत्ताभावमादायैव स्वविशिष्टेत्यस्य व्यावृत्तिः विवक्षितेति बोध्यम्।

[1] "इत्याहुः" इति पाठो नास्ति—ग.

[2] वृत्तिनियामकसंयोगेनकाले धूमवत्त्वस्य भट्टाचार्येणाङ्गीकृतत्वादाह—वस्तुतस्त्वति—स्व.

[3] "महाकाले चे"ति गदाधरीपाठः—स्व.

[4] ध्वंसादीनां व्यावृत्त्यर्थम् एवकारः—स्व.

यत्तु विशिष्टाभावमादाय सर्वत्रैतल्लक्षणसमन्वयात् प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारकत्वानुपपत्तेः विशिष्टाभावस्य संबन्धाभावरूपत्वमवश्यं वक्तव्यमिति तादृशाभावस्य लक्षणघटकता न संभवतीति केनचिदुक्तं, तन्न; प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारकत्वानुपपत्तेरेव एतल्लक्षणं परित्यज्य द्वितीयलक्षणानुसरणे बीजत्वस्य वक्ष्यमाणत्वात् ।

अत्रेदं बोध्यम्—द्वितीयलक्षणे व्यापकतायाः प्रतियोगिवैयधिकरण्याघटिताया एव निवेशेन तत्र हेतुसामानाधिकरण्यांशे स्वरूपसंबन्धनिवेशावश्यकतया सत्तासाध्यके सत्ताभावस्य स्वरूपसंबन्धेन हेतुसामानाधिकरण्यविरहेण विशिष्टसत्ताभावस्य तल्लक्षणाघटकत्वेनाव्याप्तिविरहात् स्वविशिष्टेति व्यर्थमिति, "शेषं पूर्वदिशा अवसेयमि"ति दीधितिरसंगता । न च तल्लक्षणे भावभिन्नत्वमेव निविष्टं, न हेतुसामानाधिकरण्यांशे स्वरूपसंबन्धनिवेश इति वाच्यम्; कपिसंयोगात्मकाभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यविरहेण भावभिन्नत्वविरहेण चेति द्वितीयलक्षणे ग्रन्थकृदुक्तविशेषणद्वयनिवेशे प्रयोजनाभावेन भावभिन्नत्वविरहेणेत्यस्य स्वरूपसंबन्धेन हेत्वसामानाधिकरण्ये हेत्वर्थकताया आवश्यकत्वेन स्वरूपसंबन्धस्यैव हेतुसामानाधिकरण्ये निवेशनीयत्वात् । न च भावभिन्नत्वविरहे स्वरूपसंबन्धेन हेत्वसामानाधिकरण्यं हेतुः संभवति तादृशद्रव्यत्वाभावादेः भावभिन्नत्वविरहाभावात् । न च समुच्चयार्थकतत्रत्यचकारासंगतिरिति वाच्यम्; प्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेणेत्यनेनैव समुच्चयस्य विवक्षितत्वात् । न च प्रतियोगिवैयधिकरण्याघटितव्यापकतायां साध्यवन्निष्ठत्वांशे स्वरूपसंबन्धावच्छिन्नत्वनिवेशावश्यकतया कपिसंयोगात्मकाभावस्य स्वरूपसंबन्धेन साध्यवन्निष्ठत्वविरहेण लक्षणघटकत्वं संभवत्येवेति वाच्यम्; स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेनैव साध्यवद्वृत्तित्वस्य विवक्षणीयत्वादिति ।

"जलवृत्तिद्रव्यमि"ति। इदं च "जलादी"ति दीधितिग्रन्थानुरोधेन। वह्निमद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावाधिकरणकस्य धूमाभावस्वरूपस्य वह्निमद्वृत्तिद्रव्यरूपप्रतियोगिसामानाधिकरण्यमादाय प्रसिद्धहेतुकव्यभिचारिण्यातिव्याप्तिसंभवात्।

इदं तु बोध्यम्—एवंरीत्या गदाधरग्रन्थसंगमनेऽपि दीधित्यसंगतिर्दुर्वारैवेति।

अत्र केचित्—कालिकसंबन्धेन जलवृत्तित्वविशिष्टस्य यः कालिकसंबन्धेनाभावः तस्य धूमाभावाधिकरणकस्य धूमाभावस्वरूपतासंभवात् कालिकसंबन्धेन जलवृत्तिद्रव्यरूपप्रतियोगिसामानाधिकरण्यमादाय "धूमवान् वह्ने"रित्यत्रैवातिव्याप्त्यभिप्रायकता दीधितिग्रन्थस्य संभवति; न च तादृशाभावस्य नित्यमात्रवृत्तेः न जलत्वाभावरूपता संभवतीति वाच्यम्, समवायसंबन्धावच्छिन्नप्रतियोगिताकजलत्वाभावासमनैयत्येऽपि कालिकसंबन्धावच्छिन्नप्रतियोगिताकजलत्वाभावसमनैयत्येन तद्रूपतासंभवादित्याहुः।

तन्न, जन्यस्य कालोपाधितानभ्युपगन्तृमतसाधारण्येनैव जलादीति ग्रन्थस्य व्यभिचारिविशेषपरत्वस्य गदाधरैरुक्तत्वात्। अथैवमपि अयोगोलकभिन्नस्यापि तादात्म्यसंबन्धेन धूमं प्रति व्यापकतया अयोगोलकभिन्नभेदस्य लक्षणघटकतया व्यापकताघटकतादात्म्यसंबन्धेनायोगोलकादौ तद्भिन्नरूपप्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिः; न च तादृशभेदाधिकरणकजलवृत्तित्वविशिष्टगोत्वाभावतादात्म्यसंबन्धेनायोगोलकवृत्तिद्रव्यान्यतराभावस्य तादृशभेदस्वरूपतया तादात्म्येनायोगोलकवृत्तिद्रव्यस्यापि तत्प्रतियोगित्वात् तत्सामानाधिकरण्यमादायातिव्याप्तिरस्त्येवेति वाच्यम्; तथा सति जलादीति ग्रन्थस्य व्यभिचारिविशेषपरत्वेन संगमनस्यायुक्तत्वात् धूमाभावाधिकरणकजलवृत्तित्वविशिष्टगोत्वाभाववह्निमद्वृत्तिद्रव्यान्यतराभावस्यापि धूमाभावरूपतासंभवेन "धूमवान् वह्ने"रित्यादौ एवातिव्याप्तिसंभवा-

दिति चेन्न; पूर्वोक्तयुक्त्या प्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायां भेदानवच्छिन्नत्वविशेषणावश्यकतया "एतद्रूपवान् एतद्रसादित्या"दौ पटभिन्नभेदस्य [1]व्यापकताघटकतादात्म्यसंबन्धेन भेदानवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्याभावादव्याप्तिवारणाय व्यापकतावच्छेदकप्रतियोगितायामपि तादृशविशेषणस्यावश्यकतया अयोगोलकभिन्नभेदस्य लक्षणघटकत्वाभावात् ।

इति प्रथमस्वलक्षणम् ।

---

[1] "यावदन्तर्गतस्य" अधिकपाठः—ग.

न्यायरत्ने द्वितीयस्वलक्षणम्

"एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नाभावमि"ति[1] । वाच्यत्वगगनोभयत्वाद्यवच्छिन्नाभावमित्यर्थः । तादृशोभयत्वावच्छिन्नाभावीयप्रतियोगिताया अव्यासज्यवृत्तितया साध्यवति तादृशप्रतियोगित्वावच्छिन्नाभावासत्वात् लक्षणघटकत्वमव्याहतम् ।

अथ द्वितीयचक्रवर्तिलक्षणे यथा व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे सामानाधिकरण्येनानवच्छेदकत्वमित्यत्र सामानाधिकरण्येनेति व्यर्थं स्यादिति तदावश्यकत्वं तथा अत्रापि व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे साध्यवन्निष्ठाभावीयप्रतियोगितायां सामानाधिकरण्येनानवच्छेदकत्वरूपसाध्यव्यापकतावच्छेदकत्वघटकसामानाधिकरण्येनेत्यस्य वैयर्थ्यं स्यादिति तदावश्यकत्वम्; यदि च प्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकत्वस्य गौरवग्रस्तत्वात् तद्घटितव्यापकतावच्छेदकत्वमेव ग्रन्थकृदभिमतमिति मन्यते; तदापि तादृशव्यापकतावच्छेदकत्वस्य यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकत्वरूपस्य शरीरे यादृशप्रतियोगितावच्छेदकविशिष्टत्ववैयर्थ्यस्य दुर्वारत्वादिति चेन्न; साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वरूपस्यैव प्रतियोगिवैयधि-

[1] "उभयत्वावच्छिन्नप्रतियोगिताकं साध्याभावम्" इत्येव पाठो गादाधर्यां दृश्यते—स्व.

करण्यघटितव्यापकतावच्छेदकत्वरूपतायाः प्राक् दर्शितत्वात् तत्र च प्रतियोगितावच्छेदकविशिष्टत्वादेरनिवेशात् ।

ननु तादृशावच्छेदकतानवच्छेदकत्वं तादृशावच्छेदकत्वत्वाच्छिन्नतादृशावच्छेदकत्वनिष्ठप्रतियोगिताकत्वम् ; तत्र च तादृशावच्छेदकतात्वेन घटाभावस्य घटाभावीयप्रतियोगितासाधारण्येन घटाभावस्यापि लक्षणघटकत्वादसंभववारणायोपादेयप्रतियोगितायामवच्छेदकत्वनिष्ठत्वं व्यर्थम् स्यादिति व्यधिकरणधर्मावच्छिन्नाभावस्यावश्यकत्वमस्त्येवेति ; मैवम् ; प्रतियोगितासंबन्धेन तादृशावच्छेदकत्वत्वविशिष्टविशिष्टाभावस्यैव निवेशात् समानाधिकरणधर्मावच्छिन्नाभावस्यैव तथात्वात् तस्य घटाभावीयप्रतियोगितासामानाधिकरण्यविरहात् । एवं [1]सति स्वविशिष्टसामान्ये साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धत्वघटितपरिष्कारेऽपि स्वविशिष्टत्वावच्छेदेनैव प्रतियोगितया साध्यवद्यत्किञ्चिद्व्यक्तिसंबद्धत्वत्वविशिष्टविशिष्टाभाव एव निवेशनीय इति न कोऽपि पूर्वपक्षावकाशः इत्यलम् ।

“द्रव्यत्वेन धूमो नास्तीति”। अथ द्रव्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेदकत्वेऽपि प्रतियोगितावच्छेदकेत्यनेन प्रतियोगिताया अनतिरिक्तवृत्ति सत् यदवच्छेदकमित्यादिविवक्षाया आवश्यकत्वेन तादृशाभावीयप्रतियोगितायां द्रव्यत्वादेः अतिरिक्तवृत्तित्वेनैव नातिव्याप्तिः । अथ सामान्यधर्मस्य विशेषाभावीयप्रतियोगितायामवच्छेदकत्वस्वीकारे मिश्रलक्षणे प्रमेयत्वेन गगनाभावस्य साध्याभावव्यापकतया तत्प्रतियोगितावच्छेदकत्वस्य प्रमेयत्वे सत्वात् वाच्यत्वसाध्यकप्रमेयहेतुकेऽव्याप्तिकथनं दीधितिकृतो विरुध्येत ; न च प्रमेयत्वस्य प्रमाविषयत्वरूपस्य विषयत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वं न संभवतीत्यव्याप्तिसंगतिरिति वाच्यम् ; एवं सति प्रमेयत्वस्य गुरुत्वेनानवच्छेदकत्वादित्युपेक्ष्य

[1] “सति” नास्ति—ग.

प्रमेयत्वव्यधिकरणप्रतियोगिताया अप्रसिद्धत्वादिति लेखनस्वारस्यभङ्गादिति चेन्न; "धूमवान् वह्ने"रित्यादौ धूमाभावव्यापको यो वह्नित्वेनायोगोलकवृत्तिवह्नितदन्यवृत्तिवह्न्युभयाभावः तत्प्रतियोगितावच्छेदकत्वमादायातिव्याप्तिवारणाय स्वसमानाधिकरणस्वनिरूपकाभाववद्वृत्तितानवच्छेदकस्वावच्छेदकस्य प्रतियोगितावच्छेदकेत्यनेन विवक्षणीयतया उक्तस्थले प्रमेयत्वस्यातथात्वेनाव्याप्तिकथनविरोधाभावात्;

अत्र केचित्—प्रतियोगिताया न्यूनवृत्तिभिन्नं सत् यदवच्छेदकमिति प्रथमपरिष्कारातिव्याप्तिवारणानुरोधेन वस्तुगतिमनुरुध्य वा द्रव्यत्वस्य तादृशाभावप्रतियोगितावच्छेदकत्वनिराकरणमित्याहुः।

ननु द्रव्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेदकत्वास्वीकारे शुद्धधूमवत्तानिश्चयोत्तरं द्रव्यत्वेन धूमाभाववत्ताबुद्ध्यनापत्तिः; तस्याः धूमवत्तानिश्चयप्रतिबद्ध्यतावच्छेदकधूमत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताशालिबुद्धित्वाक्रान्तत्वादिति चेन्न; शुद्धधूमत्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नशुद्धधूमत्वावच्छिन्नप्रकारताघटितधर्मस्यैव धूमवत्तानिश्चयप्रतिबद्ध्यतावच्छेदकत्वोपगमात्; तादृशप्रतीतौ द्रव्यत्ववैशिष्ट्यस्याधिकस्य धूमांशे भानात् नोक्तापत्तिः; [1]द्रव्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेदकत्ववादिनोऽपि महानसीयधूमो नास्तीति बुद्धेः धूमवत्तानिश्चयप्रतिबद्ध्यत्ववारणाय निरुक्तरूपस्य प्रतिबद्ध्यतावच्छेदकत्वोपगमस्य आवश्यकत्वाच्च।

धूमशून्येऽङ्गारशेषे धूमवद्वृत्तित्वविशिष्टवह्न्यभावासत्वात् तादृशाभावस्य न धूमाभावसमनैयत्यसंभव इति धूमकालावच्छिन्नेति धूमवद्वृत्तित्वे

[1] निरुक्तरूपस्य प्रतिबध्यतावच्छेदकत्वोपगमेऽपि सिद्धान्तिमते गौरवं नास्तीति प्रतिपादयति—"द्रव्यत्वेनेत्यादिना"—स्व.

विशेषणम्; उक्तप्रतीतेः वह्नित्वेऽवच्छेदकतावगाहित्वेऽपि तद्विषयस्य सामान्यरूपेण विशेषाभावत्वाप्रसक्तेः इत्यभिप्रायेणाह—"अस्तु वे"ति। "घटभिन्नत्वेने"ति। अत्र धूमत्वस्यावच्छेदकताप्रयोजकतृतीयान्तोल्लेख्यत्वाभावात् घटधूमभेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वरूपान्यतरत्वावच्छिन्नरूपप्रतियोगिनि साक्षात् विशेषणत्वाभावाच्च न तादृशाभावप्रतियोगितावच्छेदकत्वशंकेति ध्येयम्। "भेदत्वेने"ति। अत्राप्ययोगोलकभेदशून्ये घटाभाववति तादृशप्रतीत्यनुदयापत्तेः न तादृशान्यतरत्वमात्रस्य प्रतियोगितावच्छेदकत्वम्। भेदत्वेनायोगोलकभेदघटान्यतराभावस्य संयोगसंबन्धावच्छिन्नप्रतियोगिताकस्य केवलान्वयित्वेन नायोगोलकभेदाभावसमनैयत्यं; स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य तत्समनैयत्यसंभवेऽपि अयोगोलकभेदशून्यस्य स्वरूपसंबन्धेन तादृशान्यतरत्वावच्छिन्नवतोऽप्रसिद्धत्वेनातिप्रसङ्गविरहात् तादृशान्यतरत्वस्यैव प्रतियोगितावच्छेदकत्वसंभवेनातिव्याप्त्यप्रसक्तेः तादृशाभावोपेक्षेति ध्येयम्। "न्यूनवृत्तित्वं चे"ति। यद्यपि वाच्यत्वसाध्यके लक्षणघटकज्ञेयत्वत्वेन वाच्यत्वाभावीयप्रतियोगिताया न्यूनवृत्त्यैव ज्ञेयत्वत्वं न्यूनवृत्तित्वनिरुक्तौ स्वपदेन तदभावीयप्रतियोगिताया एवोपादेयतया समनियताभावैक्यमते तादृशाभावस्य वाच्यत्वत्वेन ज्ञेयत्वाभावाभिन्नतया तदीयप्रतियोगिताया ज्ञेयत्वेऽपि सत्वात्, तथापि स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व-स्वावच्छेदकत्व-सामानाधिकरण्यैतत्त्रितय-संबन्धावच्छिन्नंप्रतियोगिताकतदभावीयप्रतियोगित्वाभाववत्तदभावीयप्रतियोगितावच्छेदकं न्यूनवृत्तिभिन्नं सत् यदवच्छेदकमित्यनेन विवक्षणीयमिति न दोषः। एतत्कल्पे साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपि स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं देयम्; तेन वह्निसाध्यके वह्नित्वेन महानसीयवह्निघटान्यतराभावस्य यावदन्तर्गतस्य प्रतियोगिताया न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्धावपि न क्षतिः।

वह्न्याद्यभावीयप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वे त्वाह—"अथवे"ति। "स्वव्यापकतत्कान्यत्वे"ति। स्वनिरूपकत्व-स्वाश्रयसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व-स्वाश्रयसामानाधिकरण्यैतत्त्रितयसंबन्धेनावच्छेदकताविशिष्टान्यप्रतियोगितावच्छेदकमेव तादृशोभयाभाववत्प्रतियोगितावच्छेदकमित्यनेन विवक्षणीयमिति नाननुगमादिः दोषः; एतत्कल्पे व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपि निरुक्तत्रितयसंबन्धेनावच्छेदकताविशिष्टान्यत्वं देयं; तेन वह्नित्वेन महानसीयवह्निघटान्यतराभावीयतादृशावच्छेदकत्वस्याप्रसिद्धावपि नाव्याप्तिः।

अत्र स्वव्यापकत्वशरीरे स्वाधिकरणत्वस्य प्रतियोगितावच्छेदकताघटकसंबन्धेनैव विवक्षणीयतया यादृशाभावप्रतियोगितावच्छेदकताघटकः कालिकसंबन्धो विषयितासंबन्धो वा तदभावीयतादृशप्रतियोगितावच्छेदकत्वस्य स्वव्यापकतत्कान्यत्वाप्रसिद्ध्या अप्रसिद्धिरत आह—"[1]स्वन्यूनवृत्तिभिन्नायाः प्रतियोगितायाः" इति। अवच्छिन्नत्व-सामानाधिकरण्य-समानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्त्रितयसंबन्धेन धर्मविशिष्टान्यायाः इत्यर्थः; तेन नाननुगमः। एतत्कल्पे व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपि निरुक्तत्रितयसंबन्धेन धर्मविशिष्टान्यत्वं देयं, तेन न वह्नित्वेन महानसीयवह्निघटान्यतराभावीयप्रतियोगितायाः तादृशत्वविरहेऽपि अव्याप्तिः।

निरुक्तकल्पत्रयेऽपि भावरूपप्रतियोगिसामानाधिकरण्यनिवेशावश्यकतया गौरवात् आह—"तत्प्रतियोगितासमानाधिकरणे[2]"ति। एतत्कल्पे प्रतियोगिनि भावत्वनिवेशः प्रयोजनाभावाद्[3]ध्येयः।

[1] अत्र पाठभेदः गादाधर्यां दर्शितः—स्व.

[2] सामानाधिकरणमिति गदाधरी—स्व.

[3] विशेषणताविशेषेण किञ्चिद्विशिष्टस्वाभावनिष्ठतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामान्याधिकरण्यमस्तीति व्यभिचारिणि अतिव्याप्तिः; तद्वारणाय प्रतियोगिता-

"असंभव" इति। हेतुसामानाधिकरण्यांशे स्वरूपसंबन्धनिवेशपर्यवसितभावभिन्नत्वनिवेशा[1]भिप्रायेण। "अव्याप्तिर्वे"ति। व्यापकतावच्छेदकरूपे भाववृत्तित्वनिवेशकल्पाभिप्रायेण; तत्कल्पे [2]भावभिन्नत्वानिवेशात्। "प्रमेयसाध्यकस्थल" इति। ननु एतत्कल्पे धूमसाध्यके कालिकसंबन्धेन धूमाभावप्रतियोगितावच्छेदकविशिष्टवह्निसामानाधिकरण्यमादायातिव्याप्तिवारणाय प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यं निवेशनीयं; तथा च वह्निसाध्यकसद्धेतौ विषयितया वह्नित्वविशिष्टाभावस्य प्रतियोगितावच्छेदकताघटकविषयितया प्रतियोगितावच्छेदकविशिष्टज्ञानादिना पर्वतादौ सामानाधिकरण्याभावादव्याप्तिवारणाय साध्यतावच्छेदकनिष्ठावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वनिवेशावश्यकतया कथं संयोगादिसंबन्धावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकाभावमादाय लक्षणसमन्वय इति चेन्न; अतिव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंबन्धेनैव प्रतियोगितावच्छेदकवैशिष्ट्यस्य निवेश्यत्वात् साध्यतावच्छेदकनिष्ठावच्छेदकतायां तत्संबन्धावच्छिन्नत्वानिवेशात्। "लघुरूपसमनियते"ति। प्रमेयवह्नित्वाद्यवच्छिन्नसाध्यक इत्यर्थः; यद्यपि गुरुधर्मस्यावच्छेदकत्वं सिद्धान्ते आवश्यकम्; अन्यथा साध्यवन्निष्ठगोत्वाभावीयप्रतियोगितायां लाघवेन गोसमवेतत्वस्यैवावच्छेदक-

वच्छेदकावच्छिन्नभावसामानाधिकरण्यं भट्टाचार्यैः विवक्षितम्। एतत्कल्पे प्रतियोगिनि भावत्वं न निवेशनीयमिति प्रतिपादयति "एतत्कल्प इति—स्व.

[1] यद्यपि भट्टाचार्यैः कपिसंयोगात्मकाभावस्य देशिकविशेषणतया हेतुसामानाधिकरण्यविरहेण भावभिन्नत्वविरहेण च इति वक्ष्यमाणत्वात् भावभिन्नत्वविशेषणमपि आवश्यकमिति प्रतिभाति तथापि हेतुसामानाधिकरण्ये स्वरूपसंबन्धनिवेशेन दोषवारणात् भावभिन्नत्वनिवेशो अनास्थयोक्तमित्यभिप्रायः—स्व.

[2] भावभिन्नत्वानिवेशादित्यस्य हेतुसामानाधिकरण्यांशे स्वरूपसंबन्धानिवेशादित्यर्थः—स्व.

तया तद्भिन्नगवेतरासमवेतत्वसकलगोवृत्तित्वाभ्यां गोत्वभिन्नाभावस्य यावदन्तर्गतस्य गोत्वरूपप्रतियोगिसामानाधिकरण्याभावादसंभवापत्तेः ; तथापि तत्समनियताभावान्तरमादाय तस्यापि प्रतियोगिसामानाधिकरण्यात् नासंभव इति तदनावश्यकम् ।

ननु प्रमेयवह्निसाध्यके विषयितया प्रमेयवह्नित्वविशिष्टाभावस्यैव प्रसिद्धेः नाव्याप्तिः ; न हि वह्नित्वस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वं संभवति ; प्रमेयवह्न्यविषयकवह्निविषयकज्ञानवति तादृशाभावासत्वप्रसंगात् ; न च संयोगेन प्रमेयवह्निसाध्यके विषयितया प्रमेयवह्नित्वविशिष्टस्य संयोगेन योऽभावः तस्य केवलान्वयितया वह्नित्वस्यावच्छेदकत्वेऽपि संयोगेन विषयितया वह्नित्वविशिष्टस्यासत्वादेव नातिप्रसंग इति वाच्यम् ; प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रयोजनाभावेनानिवेशात् समवायेन तादृशाभावप्रसिद्धेः । न च प्रमेयत्वविशिष्टात्मत्वसाध्यकईश्वरत्वहेतुके विषयितया साध्यतावच्छेदकविशिष्टाभावस्य हेतुसामानाधिकरण्याभावेन व्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्धेः अव्याप्तिरिति वाच्यम् ; आत्मत्वमात्रविषयकज्ञान-प्रमेयत्वमात्रविषयकज्ञानान्यतरत्वविशिष्टस्य साध्यतावच्छेदकरूपेणाभावस्यैव प्रसिद्धेरिति चेन्न ; प्रमेयत्वविशिष्टेश्वरावृत्तिसाध्यकईश्वरत्वहेतुके विषयितया साध्यतावच्छेदकविशिष्टाभावस्य हेतुसामानाधिकरण्यविरहेण व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेः साध्यतावच्छेदकनिष्ठावच्छेदकतायां विषयितासंबन्धानवच्छिन्नत्वनिवेशस्यावश्यकतयोक्तगुरुधर्मावच्छिन्नसाध्यके तादृशावच्छेदकताकाभावाप्रसिद्ध्या अव्याप्तेर्दुर्वारत्वात् ।

"पूर्वोक्तदिशातिव्याप्तेरि"ति । पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेरित्यर्थः । ननु पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वे तत्प्रतियोगितासमानाधिकरणतत्प्रतियोगितानिरूपकाभावव-

द्वृत्तितावच्छेदकान्यतत्प्रतियोगितावच्छेदकत्वाभावात् नोक्तातिव्याप्तिरिति चेन्न ; तादृशविवक्षाकल्पे वह्निसाध्यके यावदन्तर्गतवह्नित्वेन महानसीयवह्नि-घटान्यतराभावस्य तादृशप्रतियोगितावच्छेदकाप्रसिद्ध्या अव्याप्तिवारणाय साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपि स्वसमानाधिकरण-स्वनिरूपकाभाववद्वृत्तितावच्छेदकधर्मावच्छिन्ना या या प्रतियोगिता तत्त-दन्यत्वनिवेशावश्यकतया संयोगेन द्रव्यस्य अव्याप्यवृत्तित्वमते धूमाभावस्य लक्षणघटकत्वानुपपत्त्या व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेर्वारणाय प्रतियोगितायाः अनतिरिक्तवृत्ति सत् यदवच्छेदकमित्येतादृशविवक्षणस्यैवादर-णीयत्वेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वे तादृशावच्छेदकत्वाक्षतेरतिव्याप्तेर्दु-र्वारत्वात् ; न च तादृशप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्य-निवेशान्नातिव्याप्तिः ; सिद्धान्तेऽपि प्रतियोगितावच्छेदकावच्छिन्ने भावत्व-निवेशस्यावश्यकतया मन्मते तन्निवेशे गौरवविरहादिति वाच्यम् ; सिद्धान्ते तत्प्रतियोगितासमानाधिकरणेत्यादिकल्पस्यैवादरणीयतया पूर्वक्षणवृत्तित्वविशि-ष्टस्वाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादायातिव्या-प्त्यप्रसक्तेः तदनावश्यकत्वात् ; किञ्च एतन्मते संयोगेन द्रव्यस्याव्याप्य-वृत्तित्वमते संयोगेन वह्न्यादिसाध्यके साध्यतावच्छेदकसंबन्धघटितव्यापक-ताप्रसिद्ध्यर्थम् साध्यवन्निष्ठाभावे प्रतियोगिवैयधिकरण्यनिवेशावश्यकतया वाच्यत्वसाध्यकेऽपि दर्शितविशिष्टाभावमादाय लक्षणसमन्वयसंभवे प्रति-योग्यवृत्तिश्चेति ग्रन्थानुत्थितिः गौरवं च ।

अत्र यद्यपि स्वप्रतियोगितावच्छेदकसंबन्धघटितव्यापकत्वमिति सिद्धान्तेऽपि व्यधिकरणधर्मावच्छिन्नाभावसंग्रहो न संभवति, संयोगेन वाच्य-त्वाभावस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठा या स्वप्रतियोगिता तद-वच्छेदकस्वरूपसंबन्धघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिता-कत्वेन लक्षणघटकतया तस्य च तादृशस्वरूपसंबन्धेन वाच्यत्वत्वरूपप्रति-

योगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादाय सर्वत्र लक्षणसमन्वयात्; न च संयोगेन वाच्यत्वाभावीयप्रतियोगितायाः स्वसमानाधिकरणस्वनिरूपकाभाववद्वृत्तितावच्छेदकवाच्यत्वत्वावच्छिन्नत्वेन तदन्यत्वविरहात् तादृशाभावस्य न लक्षणघटकतेति वाच्यम्; स्वनिरूपकाभाववद्वृत्तित्वांशे स्वावच्छेदकसंबन्धावच्छिन्नत्वनिवेशावश्यकत्वेन तादृशसंयोगेन वाच्यत्वादेरवृत्तेः वाच्यत्वत्वस्य तादृशवृत्तितावच्छेदकत्वविरहात्; न चैवं तादृशाभावस्य लक्षणघटकत्वेऽपि तत्प्रतियोगितासमानाधिकरणेत्याद्यवच्छेदकत्वस्य वाच्यत्वत्वेऽसंभवेन न तदवच्छिन्नसामानाधिकरण्यमादाय लक्षणयोग इति वाच्यम्; तत्रापि स्वनिरूपकाभाववद्वृत्तित्वांशे स्वावच्छेदकसंबन्धावच्छिन्नत्वविवक्षाया आवश्यकत्वेन वाच्यत्वत्वे तादृशावच्छेदकत्वानपायात्; न च स्वनिरूपकाभाववद्वृत्तित्वांशे स्वावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे वह्न्यादिसाध्यके सत्तासामान्याभावस्यापि लक्षणघटकतया यावदन्तर्गततादृशाभावीयप्रतियोगितानिरूपकाभाववति सामान्यादौ स्वावच्छेदकसमवायसंबन्धेन वृत्तेरप्रसिद्ध्या तत्प्रतियोगितासमानाधिकरणेत्याद्यवच्छेदकाप्रसिद्ध्या अव्याप्तिरिति वाच्यम्; सत्ताभावस्य स्वरूपसंबन्धेन हेतुसामानाधिकरण्याभावेन लक्षणघटकत्वविरहादिति पूर्वपक्षोऽवतरति; तथापि व्यधिकरणधर्मावच्छिन्नाभावास्वीकारे तत्प्रतियोगितावच्छेदकसंग्रहायोपात्ततत्प्रतियोगितासमानाधिकरणेति विशेषणवैयर्थ्यं स्यादिति तदावश्यकता द्वितीयचक्रवर्तिलक्षणवदिति बोध्यम्; एवं वह्नित्वेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टाभावस्य धूमाभावसमनियततया तदवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यमादायातिव्याप्तिवारणाय प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमेव तदवच्छेदकेत्यनेन विवक्षणीयम्; तथा च महानसीयवह्न्यभावस्यातथात्वादव्याप्तिरतो व्यापकतावच्छेदकरूपपर्याप्तावच्छेदकताकप्रतियोगिताकाभावस्यैव विवक्षणीयतया न सर्वत्र विशिष्टाभावमादाय लक्षणसत्त्वशंकेति ध्येयम्।

"पूर्वोक्तदिशे"ति । "सत्तावान् जाते"रित्यादौ कालिकसंबन्धेन हेतुसमानाधिकरणसत्ताभावमादायेत्यर्थः । ननु भावभिन्नाभावनिवेशे वह्निसाध्यके घटवृत्तिरूपध्वंसवदन्यत्वाभावस्य कालिकसंबन्धेन हेतुसमानाधिकरणस्य भावरूपप्रतियोगिसामानाधिकरण्याभावादव्याप्तिरत आह—"अस्तु वे"ति । "संयोग[1]ध्वंसेने"ति । तत्प्रतियोगितासमानाधिकरणेत्यादिप्रतियोगितावच्छेदकनिवेशाभिप्रायेणेदं ; तत्कल्पे प्रतियोगिनि भावत्वत्यागस्योक्तत्वात् ; अयोगोलकनाशजन्यसंयोगनाशसंभवस्थलानुरोधेनाह—"अनुयोगिते"ति । वह्निप्रकारकप्रमाविषयत्वादेः कालत्वसंदेहात् कालिकसंबन्धपरित्यागः । "[2]प्रतियोगिवृत्तय"इति । प्रतियोगितावच्छेदकसमानाधिकरणा इत्यर्थः ; तेनायोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य तादृशविषयत्वत्वादिना प्रमेयाभावाभिन्नत्वेन प्रमेयमात्रस्य तत्प्रतियोगित्वेन तादृशाभावस्य प्रमेयरूपप्रतियोगिवृत्तित्वेऽपि नातिव्याप्तिरिति बोध्यम् ।

इति द्वितीयस्वलक्षणम्

---

[1] "संयोगादिध्वंसेने."ति गादाधर्यां पाठो दृश्यते—स्व.

[2] "प्रतियोगिवृत्तयः" इति गदाधरीपाठो न दृश्यते—स्व.

श्रीरामचन्द्रपरब्रह्मणे नमः ।

पट्टाभिरामटिप्पण्यां प्रथमस्वलक्षणम्

श्रीदक्षिणामूर्त्तिरशेषमर्थं व्यबोधयच्चेतसि मे निषण्णः ।
तत्प्रेरिता मां रसनाग्रमेत्य वाग्वादिनी वादयतु प्रसन्ना ॥

"यत्समानाधिकरणा इत्यादि" तत्प्रतियोगितायां व्यधिकरणधर्मावच्छिन्नत्वनिवेशेनैवोपपत्तौ यत्समानाधिकरणा इति स्वविशिष्टेति च व्यर्थम् ; तथा हि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिः । "वह्निमान् धूमात्" "अयमात्मा ज्ञानात्" "कपिसंयोगाभाववान् मेयत्वादित्यादौ" तादृशस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वात् लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ तादृशस्य घटत्वेन धूमाभावस्य हेत्वधिकरणीभूतायोगोलकान्तर्भावेन धूमाद्यात्मकप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः । न च धूमाभावस्य धूमत्वेन वह्न्यभावसमनियतत्वेन तदभिन्नतया तादृशाभावस्य अयोगोलकान्तर्भावेनापि वह्निरूपप्रतियोगिसामानाधिकरण्यसत्वात् अतिव्याप्तिरिति वाच्यम् ; समनियताभावैक्यपक्षे लक्षणे बहुदोषप्रसक्त्यैव नन्वित्यादिना भट्टाचार्येण द्वितीयलक्षणस्य अवतारयिष्यमाणतया प्रथमलक्षणस्य समनियताभावभेदाभि-

प्रायकत्वावगतेः । भवानन्देन द्वितीयलक्षणावतरणग्रन्थे प्रथमलक्षणस्य समनियताभावभेदाभिप्रायकतायाः कण्ठत एव कथितत्वाच्च ।

अथ एतल्लक्षणस्य समनियताभावभेदाभिप्रायकत्वे जलादिवृत्तित्वविशिष्टगोत्वाभावस्याभावस्तु जलत्वाद्यभाव इत्यादिदीधितिग्रन्थविरोधः । तत्र जलवृत्तित्वविशिष्टगोत्वाभावत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वसमनियतजलत्वाभावाभिन्नत्वोपपादनादिति चेन्न ; तत्र हि जलवृत्तित्वविशिष्टगोत्वाभावस्य जलत्वाद्यभावरूपत्वव्यवस्थापने न दीधितिकृतामभिनिवेशः । किन्तु धूमाद्यभावरूपताप्रतिक्षेप एव । तथा हि धूमाद्यभावस्यायोगोलकादौ गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय "धूमवान् वह्नेरि"त्यादौ अतिव्याप्तिप्रसक्तावयं ग्रन्थः प्रवृत्तः तत्र हि जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावरूपत्वप्रतिक्षेप एव उपयुज्यते । न तु तस्य जलत्वाद्यभावत्वव्यवस्थापनमपि । ननु तादृशाभावस्य जलत्वाभावरूपत्वे यदि निर्भरो न स्यात् तर्हि अतिसंक्षिप्तलेखननिर्बन्धितार्किकशिरोमणिः जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावो न धूमाद्यभाव इत्येव अभिदध्यात् । तस्य जलत्वाद्यभावरूपतावाचकपदं किमिति प्रायुङ्क्त । मैवम् । तस्यापाततो युक्त्यन्तराभिप्रायकत्वात् । तथा हि जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावरूपतापक्षेऽतिरिक्ताभावव्यक्त्यकल्पनाप्रयुक्तलाघवम् । तद्रूपतानभ्युपगमे तु गौरवमिति यदि परोऽभिदधीत तदा तं प्रति यदि जलवृत्तित्वविशिष्टगोत्वाभावत्वावच्छिन्नाभावस्य किञ्चिद्रूपता वक्तव्येति तवाभिनिवेशः तदा तस्य जलत्वाद्यभावरूपतैव वक्तुमुचिता । न तु धूमाद्यभावरूपता । तथा सति जलादावपि तादृशप्रत्ययप्रसङ्गादिति वक्तव्यम् ; अतः तस्य जलत्वाद्यभावरूपतावाचकं प्रायुङ्क्त दीधितिकारः ।

ननु सर्वमेतदेवं स्यात् यदि प्रथमलक्षणस्य समनियताभावभेदाभिप्रायकत्वे बीजं किञ्चित् स्यात् ; तदेव तु नेक्षामहे । मैवं—धूम-

वान् वह्नेरित्यादौ धूमत्वेन धूमाद्यभावस्य वह्निधूमोभयत्वेन वह्निधूमोभयाभावाभिन्नतया अयोगोलकाद्यन्तर्भावेन वह्न्यादिसामानाधिकरण्यमादायातिव्याप्त्यापत्तेरेव बीजस्य जागरूकत्वात् तदर्थमवगम्यते समनियताभावभेदाभिप्रायेणैव प्रथमलक्षणमारभ्य वर्णितम् । जलादिवृत्तित्वविशिष्टेत्यनेन ग्रन्थेन समनियताभावैक्यमङ्गीकृताभिप्रायं जातम् ; ततः समनियताभावैक्यपक्षमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिः स्मृतिपदमारूढा ततो द्वितीयलक्षणमनुभूतमिति । अत एव प्रथमलक्षणान्ते एव जलवृत्तित्वविशिष्टेत्यादिना समनियताभावैक्यं स्मारितं न तु मध्ये तदिह यदि समनियताभावैक्यमादाय व्यभिचारिण्यतिव्याप्तिः मां प्रत्युद्भाव्यते ; तदा यथाश्रुतलक्षणेऽपि तदैक्यमादायातिव्याप्तिः मयोद्भावनीया । यदि समनियताभावैक्यनिबन्धनो दोषः नात्र लक्षणे उद्भावनीय इति यथाश्रुतलक्षणवादिना समयः क्रियते ; तदा तुल्यम् ममापि । दृश्यते चात्र यथाश्रुतात् कोऽपि विशेषः ; यथाश्रुते हि समवायादिसंबन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावं घटवृत्तित्वादिविशिष्टवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकाभावञ्चादायैव लक्षणसङ्गमनात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिरूपदोषः प्रसज्यते ; स चात्र कल्पे नास्तीति यथाश्रुतादत्र विशेषः प्रतिभाति ।

अथ प्रथमलक्षणस्य समनियताभावभेदाभिप्रायकत्वे बहुतरभट्टाचार्यग्रन्थसन्दर्भविरोधः प्रसज्यते । तथा हि यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितावच्छेदकत्वं व्यापकतावच्छेदकत्वमिति अस्मिन् परिष्कारे यादृशप्रतियोगितावदनधिकरणत्वं विहाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशस्य घटाद्यभावानां घटत्वादिना प्रमेयसामान्याभावाभिन्नत्वमादाय व्यावृत्तिः दर्शिता ; तच्च विरुध्यते ; न तु प्रथमलक्षणस्य समनियताभावभेदाभिप्रायकत्वनिर्भरेण तादृशग्रन्थः प्रवृत्तः । किन्तु समनियताभावैक्यपक्षे तद्भेदपक्षे च प्रतियोगितावच्छेदक-

निवेशव्यावृत्तिः भट्टाचार्यः प्रथमतः तदैक्यपक्षे व्यावृत्तिमाख्याय पश्चात् तद्भेदपक्षे तामाख्यातवान्; अत एव समनियताभावैक्यादित्यनभिधाय समनियताभावैक्यमते इत्युपक्रान्तम्; अत एवानुपदं तादृशाभावानामभेद इति सप्तम्यन्तनिर्देशेन तादृशाभावाभेदस्य विवादत्वं सूचितम् सविवादत्वनिबन्धनादेव स्वरसात् समनियताभावानामभेदाभ्युपगन्तृनयेऽपीत्यादिग्रन्थेन प्रतियोगितावच्छेदकनिवेशव्यावृत्तिरन्यथा दर्शिता। तत्र समनियताभावानभ्युपगन्तृनयेत्विति तु शब्दमप्रयुज्य अपिशब्दं प्रयुञ्जानो भट्टाचार्यः पूर्वकल्पेऽस्वरसम् अत्र कल्पे निर्भरञ्च सूचयतीति चेन्न; एवमपि संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतघटत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नत्वकथनमनुपदमुत्तरत्र विरुध्यते।

यत्समानाधिकरणा इत्यादि अत्र स्वविशिष्टहेत्वधिकरणान्तर्भावेन प्रतियोगिसमानाधिकरणा इतिस्थाने व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका इति वक्तुं युक्तम्; वह्निमान् धूमादित्यादिसद्धेतौ सर्वत्र घटत्वाद्यवच्छिन्नवह्न्यादिनिष्ठतादृशप्रतियोगिताकानां यावतामेवाभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वात् लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावस्यापि लक्षणघटकत्वात् तस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् नातिव्याप्तिरिति।

ननु सत्तावान् द्रव्यत्वादित्यादौ हेत्वधिकरणे महाकाले कालिकसंबन्धेन वर्तमानस्य सत्तात्वाद्यवच्छिन्नसत्तानिष्ठप्रतियोगिताकाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावादव्याप्तिः। न च स्वप्रतियोगितावच्छेदकावच्छिन्नवत्ताग्रहविरोधितानियामकसंबन्धेन हेत्वधिकरणवृत्तित्वविवक्षणात् नायं दोषः इति वाच्यम्; समवायसंबन्धेन संयोगवत्ताबुद्धेरपि व्याप्यवृत्तित्वग्रहशून्यकालीनायाः संयोगाभाववत्ताबुद्धिप्रतिबन्धकताया भट्टा-

चार्यसम्मततया संयोगाभाववान् मेयत्वादित्यादौ तादृशसमवायसंबन्धेन हेत्वधिकरणवृत्तिसंयोगात्मकाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावेन तथाप्यव्याप्तेरपरिहात्; स्वरूपसंबन्धेन हेत्वधिकरणवृत्तीनामतथात्वेनाव्याप्तेरनपायात् ।

अथ व्यापकतावच्छेदकप्रतियोगितायां साध्यनिष्ठत्वनिवेशात् नायं दोषः । साध्यनिष्ठप्रतियोगिताकस्य संयोगस्य हेत्वधिकरणे स्वरूपसंबन्धेन वृत्तित्वाभावात् हेत्वधिकरणे स्वरूपसंबन्धेन वर्तमानस्य संयोगाधिकरणत्वादेः साध्यनिष्ठप्रतियोगिताकत्वाभावात् व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव लक्षणघटकत्वादिति चेन्न; एवमपि संयोगाधिकरणत्वाद्यभावसाध्यकप्रमेयत्वादिहेतौ साध्यनिष्ठप्रतियोगिताकस्य संयोगाधिकरणत्वाद्यात्मकाभावस्य तथात्वादव्याप्तेरपरिहारात् । ननु अभावपदं भावभिन्नपरं; नातः संयोगाधिकरणत्वाद्यात्मकाभावमादाय दोषः; हेत्वधिकरणवृत्तित्वं तु स्वरूपसंबन्धेन; तेन सत्तावान् द्रव्यत्वादित्यादौ कालिकसंबन्धेन हेत्वधिकरणवृत्तिसत्ताभावमादाय न दोषः । साध्यनिष्ठत्वं तु प्रतियोगितायां न निवेशनीयं; प्रयोजनाभावादिति चेन्न; एवमपि संयोगेन द्रव्यस्याव्याप्यवृत्तितया वह्निमान् धूमादित्यादौ वह्नित्वावच्छिन्नवह्न्यभावं संयोगी गुणाद्यन्यत्वविशिष्टसत्वादित्यादौ संयोगत्वावच्छिन्नसंयोगाभावञ्चादायाव्याप्तेः तथापि अपरिहारात् इति । मैवं—साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वगर्भनिविष्टाभावे प्रतियोगिवैयधिकरण्यस्य प्रयोजनाभावेनानिवेशनीयतया संयोगाभावनिष्ठप्रतियोगितायाः साध्यवन्निष्ठसंयोगाद्यात्मकाभावप्रतियोगितावच्छेदकत्वात् वह्निसंयोगादिनिष्ठप्रतियोगितायाश्च साध्यवन्निष्ठवह्न्यभावाद्यात्मकाभावप्रतियोगितावच्छेदकत्वात् तादृशाभावानां लक्षणघटकत्वाभावात् । अथैवमपि सत्तावान् द्रव्यत्वादित्यादौ हेत्वधिकरणे कालिकसंबन्धेन वर्तमानसत्तात्वावच्छिन्नाभावमादाय दोषस्य स्वरूपसंबन्धेन हेत्व-

धिकरणवृत्तित्वनिवेशेन वारणेऽपि तत्र लक्षणघटकीभूताभावाप्रसिद्धिः । तत्र हि घटत्वेन सत्ताभावो लक्षणघटको वाच्यः ; तच्च न संभवति । सत्ताभावप्रतियोगित्वावच्छिन्नप्रतियोगिताकाभावस्य सत्ताभावात्मकाभावस्य साध्यवति काले कालिकसंबन्धेन वर्तमानस्य प्रतियोगितावच्छेदकत्वात् सत्ताभावप्रतियोगितायाः । न च घटत्वेन वाच्यत्वाभाव एव सर्वत्र लक्षणघटको भविष्यति तत्प्रतियोगितायाः केवलान्वयितावच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेरिति वाच्यम् ; तथा सति द्रव्यं सत्त्वादित्यादौ अतिव्याप्तेः व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव साध्यवति महाकाले कालिकसंबन्धेन वर्तमानो योऽभावः तत्प्रतियोगितावच्छेदकतया केवलान्वयितावच्छेदकीभूतवाच्यत्वादिनिष्ठप्रतियोगिताया एव लक्षणघटकत्वेन तन्निरूपकाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनियमात् ।

अथ साध्यतावच्छेदकसंबन्धेन साध्यवत्ताज्ञानं प्रति विरोधितानियामको यस्संबन्धः तेन संबन्धेन साध्यवन्निष्ठत्वमभावस्य निवेशनीयम् ; तेन द्रव्यं सत्त्वादित्यादौ तादृशविशेषणतासंबन्धेन साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकद्रव्यत्वत्वावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगिताकाभावस्य तथात्वान्नातिव्याप्तिरित्ति चेत् ; तर्हि सत्ताभाववान् जात्यभावादित्यादौ साध्यवत्सामान्यनिरूपिततादृशसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्त्यापत्तेः । ननु विशेषणतासंबन्धेनैव साध्यवन्निष्ठत्वं विवक्षितम् । न चैवं वह्निमान् धूमादित्यादौ पर्वतत्वात्मकाभावीयप्रतियोगितायाः साध्यवति विशेषणतासंबन्धेन वर्तमानो योऽभावः तत्प्रतियोगितावच्छेदकतया पर्वतत्वात्मकाभावं संयोगाभाववान् मेयत्वादित्यादौ तथाविधसंयोगात्मकाभावञ्चादायाव्याप्तिरिति वाच्यम् ; हेत्वधिकरणे विशेषणतासंबन्धेन तादृशाभावानां लक्षणघटकत्वासंभवादिति चेत् ; एवमपि सर्वासामेव प्रतियोगितानां साध्यवन्निष्ठाभावीयव्यधिकरणसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात् व्यापकता-

वच्छेदकप्रतियोगित्वाप्रसिद्धिः उत्तरत्र पुनरपि व्यापकताघटकसंबन्धग्रहणाभावेन भट्टाचार्योपदर्शितरीतेः असंभवदुक्तिकत्वात् ; प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे वह्निमान् धूमादित्यादौ साध्यतावच्छेदकीभूतसंयोगसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकप्रतियोगित्वाप्रसिद्ध्याव्याप्तिः । न च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं निवेश्यते । तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवह्न्यभावप्रतियोगिनो वह्नेः संयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य वह्निमति प्रतियोगिव्यधिकरणत्वाभावेन तादृशाभावो व्यधिकरणधर्मावच्छिन्नवह्न्यभाव एवेति कथमव्याप्तिरिति वाच्यम्; एवं सति वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगिताया अपि तद्रीत्या व्यापकतावच्छेदकत्वेन तस्य च व्यधिकरणधर्मप्रतियोगिताकत्वाभावादव्याप्तेः दुर्वारत्वात् । अत एव स्वावच्छिन्ननिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणतावद्भिन्नसाध्याधिकरणकं यद्यत् स्वं तद्भिन्नव्यापकतावच्छेदकत्वमित्यपि निरस्तम् । तादृशवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावमादायाव्याप्त्यापत्तेः । अथ साध्यवन्निष्ठाभावीययत्किञ्चित्संबन्धावच्छिप्रतियोगितानवच्छेदकत्वं व्यापकतावच्छेदकत्वम् । वह्निमान् धूमादित्यादौ तादृशसमवायस्वरूपादिसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतघटत्वाद्यवच्छिन्नवाच्यत्वादिनिष्ठप्रतियोगिताकाभावानामेव तथात्वात् लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ अयोगोलकान्यत्वत्वेनायोगोलकान्यत्वाभावस्यापि लक्षणघटकत्वात् नातिव्याप्तिरिति चेत् तर्हि ज्ञानवान् आत्मत्वादित्यादौ तादृशाभावीयविषयतासंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतसमवायसंबन्धावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्य सुषुप्त्यादिकालावच्छेदेन हेतुसमानाधिकरणस्यातथात्वादव्याप्तेः सर्वत्रैव समवायस्वरूपादिसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतकालिकविशेषणताविषयतादिसंबन्धावच्छिन्नद्रव्यत्वत्ववाच्यत्वत्वाद्यवच्छिन्नद्रव्यत्ववाच्यत्वादिनिष्ठप्रतियोगि-

ताकस्य लक्षणघटकस्यातथात्वादसंभवस्य वा प्रसक्तेः। अथ लक्षणघटकीभूताभावप्रतियोगितायां स्वरूपसंबन्धावच्छिन्नत्वनिवेशात् नायं दोषः स्वरूपसंबन्धावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपसंबन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य च केवलान्वयित्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभिन्नत्वात् स्वरूपसंबन्धावच्छिन्नवाच्यत्वाद्यभावस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव लक्षणघटकत्वादिति चेत्, एवमपि भगवत्समवेतभेदस्य विषयतासंबन्धेन साध्यतायां नित्यज्ञानत्वादिहेतौ विषयतासंबन्धघटितव्यापकतावच्छेदकीभूतस्वरूपसंबन्धावच्छिन्नभगवत्समवेतभेदत्वावच्छिन्नप्रतियोगिताकाभावस्य भगवत्समवेतत्वरूपतया स्वरूपसंबन्धेन हेतुसमानाधिकरणस्यातथात्वादव्याप्तेर्दुर्वारत्वात्। ननु भगवत एव विषयतासंबन्धेन भगवज्ज्ञानसंबन्धितया तन्निष्ठात्यन्ताभावीयविषयतासंबन्धावच्छिन्नप्रतियोगितैवाप्रसिद्धेति कथं तत्संबन्धघटितव्यापकतावच्छेदकत्वम् तस्या इति स्वरूपादिसंबन्धघटितव्यापकतावच्छेदकीभूतप्रतियोगिताकवाच्यत्वाद्यभावस्यैव तत्र लक्षणघटकत्वात् नाव्याप्तिः। न च घटत्वेन पटो विषयतासंबन्धेन नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितैव तादृशी प्रसिद्ध्यतीति वाच्यम्; तर्हि भगवत्समवेतभेदनिष्ठप्रतियोगित्वेन घटो विषयतासंबन्धेन नास्तीति प्रतीतिसिद्धाभावीयविषयतासंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वमेव भगवत्समवेतभेदनिष्ठप्रतियोगितायाः इति कथं तत्संबन्धघटितव्यापकतावच्छेदकत्वं तस्याः। नन्वेवं सति सद्धेतौ सर्वत्र वाच्यत्वादिनिष्ठप्रतियोगिताया अपि वाच्यत्वादिनिष्ठप्रतियोगित्वेन घटो नास्तीति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदकत्वेन व्यापकतावच्छेदकप्रतियोगित्वाप्रसिद्धिः। न च घटत्वपटत्वाभ्यां किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितैव व्यापकतावच्छेदिका तस्याः केवलान्वयित्वेन तद्व्यधिकरणप्रतियोगित्वाप्रसिद्धेः इति वाच्यम्; तद्रीत्या व्यभिचारिण्यपि

तादृशप्रतियोगिताया एव व्यापकतावच्छेदकत्वापत्त्या अतिव्याप्तेः । अतः साध्यवन्निष्ठाभावीययत्किञ्चित्संबन्धावच्छिन्नप्रतियोगितानिरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकताशून्यत्वमेव व्यापकतावच्छेदकत्वम् । व्यभिचारिणि व्यभिचारनिरूपकाधिकरणान्यत्वनिष्ठप्रतियोगिताया अपि साध्यवन्निष्ठाभावीयविशेषणतासंबन्धावच्छिन्नप्रतियोगितानिरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकताशून्यतया तन्निरूपकाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहात् नातिव्याप्तिरिति वक्तव्यम् । तथा च दर्शितस्थले भगवत्समवेतभेदनिष्ठप्रतियोगितायाः विषयतासंबन्धावच्छिन्नप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वेऽपि सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकताशून्यत्वमक्षतमेवेति चेत्; तत्र विषयतासंबन्धावच्छिन्नप्रतियोगितानिरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकताया एवाप्रसिद्धत्वेन तच्छून्यत्वस्य तादृशप्रतियोगितायां दुरुपपादत्वात् ।

अथ सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकत्वं हि तत्प्रतियोगितासमानाधिकरणत्वे सति तत्प्रतियोगितावच्छेदकत्वम् । तथा च विरुद्धघटत्वपटत्वाभ्यां विषयतासंबन्धेन किमपि प्रमेयं नास्तीति सिद्धाभावीया या विषयतासंबन्धावच्छिन्ना प्रतियोगिता तत्समानाधिकरणत्वे सति तदवच्छेदकत्वं घटत्वपटत्वोभये प्रसिद्धम् । घटत्वपटत्वोभयस्य प्रत्येकं प्रतियोगितासमानाधिकरणत्वात् तदवच्छेदकत्वाच्च तच्छून्यत्वं भगवत्समवेतभेदनिष्ठप्रतियोगितायामक्षतमिति चेत्; तर्हि तद्रीत्या भगवत्समवेतभेदनिष्ठप्रतियोगित्वघटत्वाभ्यां विषयतासंबन्धेन किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावीया या विषयतासंबन्धावच्छिन्ना प्रतियोगिता तत्समानाधिकरणत्वे सति तदवच्छेदकत्वस्य भगवत्समवेतभेदनिष्ठप्रतियोगितायां सत्त्वेन तच्छून्यत्वरूपं व्यापकतावच्छेदकत्वं तस्या दुर्घटमेवेति ।

वस्तुतस्तु यादृशप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नस्य तत्प्रतियोगिताधिकरणवृत्तित्वं सैव सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्ना प्रतियोगितावच्छेदकता । तथा च घटत्वपटत्वाभ्यां किमपि प्रमेयं विषयतया नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगिताया अपि सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकत्वाप्रसिद्धिर्दुर्वारेत्यधिकमन्यत्र विवेचनीयमास्ते । तथा च कथं भगवत्समवेतभेदसाध्यकाव्याप्तिरिति । मैवं—तत्र भगवत्समवेतभेदविषयकयत्किञ्चिज्जन्यज्ञानव्यक्तेरपि साध्यवत्तया तन्निष्ठात्यन्ताभावीयविषयतासंबन्धावच्छिन्नप्रतियोगितानिरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकतायाः तदविषयीभूतघटादिनिष्ठतद्व्यक्तित्वादौ प्रसिद्धत्वेन तच्छून्यत्वस्य भगवत्समवेतभेदप्रतियोगितायामक्षतत्वात् । एवं कालिकसंबन्धेन गगनादेरवृत्तितामते महाकालभेदस्य कालिकसंबन्धेन साध्यतायां महाकालत्वादिहेतौ कालिकसंबन्धघटितव्यापकतावच्छेदकीभूतमहाकालभेदत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य महाकालत्वरूपस्य स्वरूपसंबन्धेन हेतुसमानाधिकरणस्य व्यधिकरणधर्मावच्छिन्नप्रयियोगिताकत्वाभावात् अव्याप्तिः । साध्यवन्निष्ठाभावीयकालिकसंबन्धावच्छिन्नप्रतियोगितानिरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकताया गगनत्वादौ प्रसिद्धिः । वस्तुतः कालिकसंबन्धेन गगनादेःवृत्तित्वेऽपि न क्षतिः । कालिकसंबन्धावच्छिन्नप्रतियोगिताकगवाद्यभावस्य मन्दुराद्यवच्छेदककाले सत्त्वेन गोत्वादावेव तादृशावच्छेदकताप्रसिद्धेः । यदि च कालिकसंबन्धावच्छिन्नमहाकालभेदनिष्ठप्रतियोगित्वावच्छिन्नप्रतियोगिताकाभावस्यापि दैशिकसंबन्धेन महाकालभेदानधिकरणीभूतमहाकालावच्छेदेन महाकालवृत्तितया महाकालभेदनिष्ठप्रतियोगितायाः तादृशावच्छेदकताशून्यत्वं दुर्घटमिति । एवमभावपदस्य भावभिन्नपरतया महाकालत्वरूपाभावस्य पूर्वोक्तभगवत्समवेतत्वरूपाभावस्य च भावरूपतया लक्षणघटकत्वासंभवेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया एव

लक्षणघटकतया नोक्तदूषणद्वयमपीति विभाव्यते; तदापि विषयतासंबन्धेन पृथिवीसमवेतत्वादेः साध्यतायां पृथिवीसमवेतविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादिहेतौ विषयतासंबन्धघटितव्यापकतावच्छेदकीभूतपृथिवीसमवेतत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपसंबन्धेन हेतुसमानाधिकरणस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावादव्याप्तिर्दुर्वारा। तत्र च ब्रूमः—साध्यवति विशेषणतासंबन्धेन वर्तमानो योऽभावः तदीयस्वावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं व्यापकतावच्छेदकत्वम्। स्वपदं—व्यापकतावच्छेदकत्वेनाभिमतप्रतियोगितापरम्। वह्निमान् धूमादित्यादौ समवायेन घटत्वेन द्रव्यत्वं नास्तीति सिद्धाभावो लक्षणघटकः। कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगाद्यात्मकाभावस्य विशेषणतासंबन्धेन हेतुसमानाधिकरणत्वात् वारणम्। व्यापकतावच्छेदकत्वेनाभिमतप्रतियोगितायां संबन्धविशेषावच्छिन्नत्वं न निवेशनीयम्। प्रयोजनाभावात्। साध्यवति विशेषणतासंबन्धेन वर्तमानो योऽभावः तदीयविशेषणतासंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतविशेषणतासंबन्धावच्छिन्नप्रतियोगितावच्छेदकविशेषणतासंबन्धेन यत्समानाधिकरणा यावन्तोऽभावाः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका इति वा विवक्षणीयम्। एवं च प्रतियोगिसामानाधिकरण्यघटितलक्षणे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगममन्तरेणापि सर्वत्र वाच्यत्वाद्यभावमादायैव लक्षणसंभवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिरिति दोषः प्रसज्यते। लक्षणघटकीभूताभावप्रतियोगितायां व्यापकताघटकसंबन्धावच्छिन्नत्वस्य प्रयोजनान्तरविरहेणानिवेशादिति। एवं नन्वेवमपीत्यादिद्वितीयलक्षणावतरणिकायां भट्टाचार्येण प्रतिपादयिष्यमाणा व्यभिचारिणि समनियताभावैक्यपक्षमादाय धूमाद्यभावानां वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यमादाय प्रसक्तातिव्याप्तिरपि अत्र न प्रसरति। तत्तद्व्यभिचारनिरूपकाधिकरणान्यत्वाद्यवच्छिन्नप्रतियोगि-

ताकानां यावदन्तर्गतानामभावानां प्रतियोगिसामानाधिकरण्यविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहेण अस्मदुक्तपरिष्कारेऽतिव्याप्तेरप्रसक्तेः। एतेन लक्षणस्य लक्षणान्तरादूषकत्वात् नायमाक्षेप इति कैश्चिदुक्तं प्रत्युक्तम्। व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमपक्षे निर्दुष्टस्य प्रकृतोपयुक्तस्य च लक्षणस्य संभवे तदुपेक्ष्य कथंचित् सदोषं लक्षणमादाय सर्वज्ञेन तार्किकशिरोमणिना तादृशाभावखण्डनपरग्रन्थावतरणासंभवादिति। अत्र प्रतिभाति—एतादृशलक्षणकरणे इदं वाच्यं ज्ञेयत्वात् वह्निमान् धूमादित्यादौ सर्वत्र वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नवाच्यत्वाद्यभावानामपि यावदन्तर्गततया लक्षणघटकत्वापत्तिः। अथ वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादाय दोषो द्वितीयलक्षणावतरणिकायां भट्टाचार्येणापि एवं सर्वत्रेत्यादियथाश्रुतलक्षक्षणे वक्ष्यते इति नायमिदानीमुद्भावनीयः इति चेत्; भ्रान्तोऽसि तत्र तादृशाभावानादायैव लक्षणसमन्वयसंभवात् प्रकृतानुपयोगमात्रं प्रतिपाद्यते। इदानीन्तु यावदन्तर्गतानां तेषां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् असंभव इति। यदि पुनः तादृशाभाववारणाय वैशिष्ट्यव्यासज्यवृतिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्यते; नायमसंभवः; भट्टाचार्यस्य तु नैतन्निवेशसंभवः अनतिप्रयोजनकत्वादिति विभाव्यते; तदापि पर्वतान्यत्वेन प्रमेयं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगिताया अपि निरुक्तव्यापकतावच्छेदकाक्रान्ततया तन्निरूपकाभावस्य हेत्वधिकरणे पर्वतादौ वर्तमानस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् असंभव इत्यादिरीत्या सुदूरं परमालोचनीयम्।

येन येन संबन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्षणीयम्। अन्यथा इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ हेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावप्रतियोगिनः साध्यं प्रति विषयतासंबन्धे-

नापि व्यापकतया तेन संबन्धेन हेत्वधिकरणेश्वरेच्छाकृत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तेः। येन येनेत्युक्तौ च तथाविधसमवायेनातथात्वान्नातिव्याप्तिरिति लिखितं भट्टाचार्येण।

अत्र विचार्यते—विषयितासंबन्धस्य दर्शितस्थले व्यापकताघटकत्वसंभव एव हि तेन संबन्धेन प्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिः प्रसज्यते। तदेव न संभवति। तथा हि साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकभिन्नत्वं—व्यापकतावच्छेदकत्वमिति निष्कृष्टं प्राक्। तत्र च संबद्धत्वशरीरे व्यापकताघटकत्वेन अभिमतो यः संबन्धः स एव दर्शनीय इत्युक्तं भट्टाचार्येणैव प्राक्। इत्थं च इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ साध्यवति नित्यज्ञाने यद्विशिष्टसामान्यं विषयितासंबन्धेनासंबद्धं तादृशं स्वमेवाप्रसिद्धम्। सर्वस्यैव विषयितासंबन्धेन भगवज्ज्ञानसंबन्धित्वात्। अथ मास्तु येन येनेत्यस्य इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यत्र व्यावृत्तिः; तथापि स्वरूपसंबन्धेन जन्यत्वसाध्यके महाकालान्तर्भावेन व्यभिचारिणि कालत्वादिहेतौ आदिपदग्राह्ये तद्व्यावृत्तिः संभवत्येव। तत्र हेतुसमानाधिकरणजन्यज्ञानत्वाद्यभावप्रतियोगिनः साध्यं प्रति कालिकसंबन्धेनापि व्यापकतया तेन संबन्धेन हेत्वधिकरणमहाकाले प्रतियोगिसामानाधिकरण्यात्। तत्र हि कालिकसंबन्धेन गगनादेरवृत्तित्वपक्षे कालिकसंबन्धेन साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं गगनत्वादिकमेव प्रसिद्ध्यति। कालिकसंबन्धेन तादृशव्यक्त्यसंबद्धस्वविशिष्टसामान्यकं प्रसिद्ध्यतीति अतिव्याप्तिः प्रसज्यते। येन येनेत्युक्तौ च तथाविधस्वरूपसंबन्धेनातथात्वान्नातिव्याप्तिरिति चेत्; न हि वयं येन येनेत्यस्य निष्प्रयोजनतामाचक्ष्महे येन तदुत्तरं स्यात्; किन्तु इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यत्र विषयितासंबन्धस्य व्यापकताघटकत्वमादायातिव्याप्तिरिति यदभिहितं तदसंभवदुक्तिकमित्यत्रैवास्माकमाग्रहः।

ननु नित्यज्ञानमित्यत्रातिव्याप्तौ अनिर्भरादेव आदौ इत्यभिहितवान् भट्टाचार्य इति का अनुपपत्तिरिति चेत्; संभवत्येवं यदि कथञ्चिदपि नित्यज्ञानत्वसाध्यकेऽतिव्याप्तिः संभवदुक्तिका स्यात्। एवं खलु ग्रन्थकृतां फणितिरुपपादनीया यदेकधारीत्या प्रथममुद्भावितहेतौ दोषमुपपाद्य पश्चात् प्रकारान्तरेण तद्दोषवारणे सति आदिपदग्राह्यस्थालान्तरानुसरणमिति। न हि असंभवदुक्तिकदोषप्रसक्तिकल्पनं प्रथममुद्भाव्य पश्चात् संभवदुत्तरं स्थलान्तरं सूचयन्ति ग्रन्थकर्तारः; अन्यथा समवायेन वह्नेः साध्यत्वे वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणवह्न्यभावप्रतियोगिनः साध्यं प्रति संयोगादिसंबन्धेन व्यापकतयेत्येव किं नाभिदध्यात्। उक्तस्थले विषयतासंबन्धस्येव दर्शितस्थले संयोगसंबन्धस्यापि व्यापकताघटकतया संभवदुक्तिकत्वेऽपि क्षतिविरहात्; आदिपदग्राह्यस्थल एव येन येनेत्यस्य व्यावृत्तिसंभवात् तस्मात् इदं नित्यज्ञानमित्याद्यपरिचितस्थलविशेषमन्विष्यतो भट्टाचार्यस्य किञ्चिदाकूतमिति न जानीमहे। अथ जगत्प्रसिद्धव्यापकतावच्छेदकत्वस्य प्रकृतलक्षणघटकत्वाभिप्रायेण नित्यज्ञानत्वसाध्यकेत्यभिधानम् स्वपरिष्कृतव्यापकतावच्छेदकत्वस्य लक्षणघटकत्वाभिप्रायेण च जन्यत्वसाध्यकोक्तहेतुसंग्राहकादिपदाभिधानं संगमनीयम् प्रसिद्धव्यापकतावच्छेदकत्वन्तु साध्यवन्निष्ठाभावीयप्रतियोगितानवच्छेदकत्वम्। न चात्र कल्पेऽपि नित्यज्ञानत्ववन्निष्ठाभावीयविषयितासंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या विषयितासंबन्धस्य व्यापकताघटकत्वं दुर्वारमिति वाच्यम्। नित्यज्ञानेऽपि विषयितासंबन्धेन घटत्वेन पटो नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगिताया एव तादृश्याः प्रसिद्धत्वेन तस्य व्यापकताघटकत्वसंभवादिति चेत्; तर्हि नित्यज्ञाने नित्यज्ञानत्ववन्निष्ठप्रतियोगित्वेन विषयितासंबन्धेन घटो नास्तीत्यादिप्रतीतिसिद्धाभावीयप्रतियोगितामादाय नित्यज्ञानत्ववन्निष्ठप्रतियोगिताया अपि विषयितासंबन्धघटितव्यापकतावच्छेदकत्वानुपपत्तेः साध्यवन्निष्ठाभावी-

यप्रतियोगितानिरूपितावच्छेदकतायां सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्व-निवेशात् तादृशावच्छेदकताशून्यत्वरूपं व्यापकतावच्छेदकत्वं तस्याः सुलभमेवेति चेत्; तर्हि साध्यवन्निष्ठाभावीयविषयितासंबन्धावच्छिन्नप्रतियोगिता-निरूपितसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकत्वाप्रसिद्धिः।

अथ घटत्वपटत्वाभ्यां किमपि प्रमेयं विषयितासंबन्धेन नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितानिरूपितावच्छेकतैव तादृशी प्रसिद्धा; घटत्व-पटत्वोभयस्य प्रत्येकं तत्प्रतियोगितासमानाधिकरणत्वात् तत्प्रतियोगितावच्छेदकत्वाच्च। नन्वेवं सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वं न तत्प्रतियोगितावच्छेदकतायाः घटत्वपटत्वोभयत्वावच्छिन्नस्य सामानाधिकरण्यप्रत्यासत्त्यवच्छेदकत्वाभावादिति चेत्; किमिदं सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नावच्छेदकत्वम्। न तावत् सामानाधिकरण्यसंबन्धावच्छिन्नत्वम्। घटाभावीय-प्रतियोगितायां घटत्वस्य समवायेनैवावच्छेदकत्वेन तत्प्रतियोगितावच्छेदकतायाः सामानाधिकरण्यसंबन्धानवच्छिन्नतया व्यापकतालक्षणघटकत्वानुपपत्तेः। वह्न्यादिनिष्ठप्रतियोगितानिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकताकघटादिनिष्ठ-प्रतियोगिताया इव वह्न्यादिनिष्ठप्रतियोगितानिष्ठसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकताकघटादिनिष्ठप्रतियोगिताया अपि व्यधिकरणधर्मावच्छिन्नायाः प्रसिद्ध्या तदीयसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकताश्रयीभूतायाः वह्न्यादिनिष्ठप्रतियोगितायाः लक्षणघटकत्वानुपपत्तेश्च। किन्तु तत्प्रतियोगिताश्रयानुयोगिकत्वोपलक्षितसंबन्धावच्छिन्नत्वमेव सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वं तच्च घटत्वपटत्वोभयनिष्ठावच्छेदकतायामपि अक्षतम् घटत्वपटत्वोभयस्य समवायसंबन्धेन प्रतियोगितावच्छेदकत्वमित्यस्य व्यधिकरणधर्मावच्छिन्नाभावप्रारम्भो भट्टाचार्येणैव उक्तः। समवायसंबन्धे च तत्प्रतियोगिताश्रयीभूतप्रमेयानुयोगिकत्वस्याक्षतत्वात्। नन्वेवं सति वह्न्यभावप्रतियोगितानिष्ठसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकताकघटादिनिष्ठप्रति-

योगितायाः वह्न्यभावादिप्रतियोगितानिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकताकघटादिनिष्ठप्रतियोगितायाश्च वारणं शक्यम्। सामानाधिकरण्यसंबन्धे स्वरूपसंबन्धे च तत्प्रतियोगिताश्रयीभूतघटानुयोगिकत्वस्याक्षतत्वात्। किञ्चिन्निरूपितसामानाधिकरण्यस्वरूपसंबन्धयोः घटे सत्त्वादिति चेन्न; तत्प्रतियोगिताश्रयानुयोगिकत्वस्वाश्रयप्रतियोगिकत्वोभयोपलक्षितसंबन्धावच्छिन्नत्वस्य विवक्षितत्वात्। स्वम्—अवच्छेदकता। तथा च वह्न्यादिप्रतियोगिताप्रतियोगिकत्वपटाद्यनुयोगिकत्वयोरुभयोः कुत्रापि स्वरूपसंबन्धे अभावान्न उक्तदोषः। घटत्वपटत्वोभयनिष्ठा या अवच्छेदकता तदाश्रयीभूतप्रत्येकप्रतियोगित्वतत्प्रतियोगिताश्रयीभूतप्रमेयानुयोगित्वयोः एकत्र संबन्धे संभवेन तदवच्छिन्नप्रतियोगिताया व्यापकताघटकत्वोपपत्तिः। न च वह्निमान् धूमादित्यादौ साध्यवन्निष्ठो यो वह्न्यादिप्रतियोगितानिष्ठविषयितासंबन्धावच्छिन्नावच्छेदकताकज्ञानादिनिष्ठसंयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावः तत्प्रतियोगितानिरूपिता या तत्प्रतियोगिताश्रयीभूतज्ञानानुयोगिकत्वस्वाश्रयीभूतवह्न्यादिप्रतियोगिताप्रतियोगिकत्वोभयोपलक्षितविषयितासंबन्धावच्छिन्नावच्छेदकता तदाश्रयत्वात् वह्न्यदिप्रतियोगिताया लक्षणघटकत्वानुपपत्त्या तत्प्रतियोगिताश्रयानुयोगिकत्वस्वाश्रयप्रतियोगिकत्वोभयोपलक्षितविषयितासंबन्धावच्छिन्नावच्छेदकता तदाश्रयत्वात् वह्न्यादिप्रतियोगितायाः लक्षणघटकत्वानुपपत्त्या तत्प्रतियोगिताश्रयानुयोगिकत्वस्वाश्रयप्रतियोगिकत्वोभयोपलक्षितस्वरूपसंबन्धावच्छिन्नत्वमेव लक्षणे निवेश्यम्। तथा च घटत्वपटत्वोभयनिष्ठावच्छेदकतामादाय उपदर्शितस्थले प्रसिद्धिः घटत्वादे; स्वरूपसंबन्धाभावादिति वाच्यम्। तथापि घटत्वप्रकारकप्रमाविशेष्यतात्वपटत्वप्रकारकप्रमाविशेष्यतात्वाभ्यां विषयितासंबन्धेन किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकतामादायैव प्रसिद्ध्युपपादनसंभवादिति। मैवं—तद्रीत्या वह्न्यभावप्रतियोगित्वघटत्वप्रकारकप्रमाविशेष्यत्वत्वाभ्यां संयो-

गसंबन्धेन किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावीयसंयोगसंबन्धावच्छिन्न-प्रतियोगितानिरूपितनिरुक्तस्वरूपसंबन्धावच्छिन्नावच्छेदकताश्रयत्वेन वह्न्या-दिप्रतियोगिताया लक्षणघटकत्वानुपपत्तेः। नित्यज्ञानत्वाभावीयप्रतियोगित्व-घटत्वप्रकारकप्रमाविशेष्यत्वत्वाभ्यां विषयितासंबन्धेन किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावीयविषयितासंबन्धावच्छिन्नप्रतियोगितानिरूपितनिरुक्तस्व-रूपसंबन्धावच्छिन्नावच्छेदकताश्रयत्वेन नित्यज्ञानत्वादिनिष्ठप्रतियोगितायां विषयितासंबन्धघटितव्यापकतावच्छेदकत्वस्य तथापि दुरुपपादत्वाच्च। न च यथोपदर्शितप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वं व्यापकतावच्छेदकत्व-मिति विवक्षया नोक्तदोषद्वयम् उपदर्शितावच्छेदकताया उभयत्रैव पर्याप्ततया केवलप्रतियोगितायाः तत्पर्याप्त्यधिकरणत्वाभावादिति वाच्यम्। तथा सति वह्निमान् धूमादित्यादौ घटाद्यभावीयप्रतियोगिताया अपि लक्षणघटकत्वा-पत्तेः। तथा हि वह्न्यादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं यद्यपि घटा-भावीयप्रतियोगितायां वर्तते तथापि तादृशावच्छेदकतापर्याप्तिः न केवल-प्रतियोगितात्वविशिष्टे तथा सति वह्निमति प्रतियोगी नास्तीति बुद्ध्यापत्तेः। नापि घटादिनिष्ठप्रतियोगिताव्यक्तौ; स्वरूपतोऽवच्छेदकतापर्याप्तिस्स्वीक्रियते नातः प्रतियोगी नास्तीति बुद्ध्यापत्तिः। तादृशप्रतीत्या प्रतियोगितात्ववि-शिष्टे अवच्छेदकतापर्याप्त्यवगाहनात् इत्यपि युक्तम्। प्रतियोगितायाः स्वरूपतो भानाभावेन प्रतियोगितायाः स्वरूपतो अवच्छेदकत्वस्य भट्टा-चार्येणैव बहुशः प्रतिक्षेप्यत्वात् किन्तु घटाद्यभावीयप्रतियोगिताविशिष्टे घटादिनिष्ठप्रतियोगितात्वविशिष्टे तत्तत्प्रतियोगिताव्यक्तित्वविशिष्टे तादृशा-वच्छेदकतायाः पर्याप्तिः घटाभावप्रतियोगी नास्ति घटनिष्ठप्रतियो-गितावान्नास्ति तत्तत्प्रतियोगितावान्नास्ति इत्येव प्रतीतेः। तथा च घटा-भावीयत्वाद्यन्तर्भावेनैव तादृशावच्छेदकतायाः पर्याप्त्या घटादिनिष्ठायाः प्रतियोगिताव्यक्तेः तत्पर्याप्त्यनधिकरणत्वेन तादृशप्रतियोगिताया अपि

लक्षणघटकत्वापत्तौ तन्निरूपकाभावस्य यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्याभावादसंभव इति। अथ तादृशावच्छेदकतापर्याप्त्यनधिकरणस्वप्रतियोगितात्वविशिष्टका यावन्तोऽभावा इति विवक्षणीयम्। स्वपदं लक्षणघटकत्वेनाभिमताभावपरम्। अतो न घटादिनिष्ठप्रतियोगिताया लक्षणघटकत्वापत्तिः। घटाभावीयप्रतियोगितात्वविशिष्टस्य तादृशावच्छेदकतापर्याप्त्यधिकरणत्वादिति चेदस्तु तथा; एवमपि एतादृशव्यापकतावच्छेदकताया स्वयं दूषितत्वेन स्वपरिष्कृतव्यापकतावच्छेदकत्वनिवेशपक्षे येन येनेत्यस्य व्यावृत्त्यलाभात्। न च तत्कल्पे आदिपदग्राह्यजन्यत्वसाध्यककालत्वहेतौ व्यापकताघटककालिकसंबन्धेन प्रतियोगिसामानाधिकरण्यमादाय दोषवारणाय येन येनेत्यस्य व्यावृत्तिरुक्तैवेति वाच्यम्। तत्रापि व्यावृत्तेः विचारासहत्वात्। तथा हि तत्र महाकालाविषयकयावज्जन्यविषयकयत्किञ्चित्प्रमाव्यक्त्यभावोऽपि विषयतासंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकतया लक्षणघटकः। तस्य च महाकाले व्यापकताघटकविषयतासंबन्धेन प्रतियोगिसामानाधिकरण्यम् कालिकसंबन्धस्तु तत्प्रतियोगिनिष्ठव्यापकताघटको न भवति। तत्प्रमाव्यक्तेः कालिकसंबन्धेन स्वसमानकालीनजन्यासंबद्धत्वात्। एतेन यद्धर्मावच्छिन्नवति येन संबन्धेन यद्धर्मावच्छिन्नसत्वं तद्धर्मावच्छिन्ननिरूपिततत्संबन्धघटितव्यापकतावच्छेदकत्वं तद्धर्मस्येति तार्किकीं रीतिमनुरुध्य नित्यज्ञानत्वसाध्यकस्थलमुदाहृतम्। स्वपरिष्कृतव्यापकतावच्छेदकत्वनिवेशे तु स्थलान्तरगवेषणीयमित्यभिप्रायेणादिपदं प्रयुक्तमिति नासङ्गतिरित्यपि परास्तम्। तादृशस्थलान्तरानुकलनात् न हि स्वयमुपरितनपदपरिष्कृतवर्त्मना कथमपि असंभवदुक्तिकप्रयोजनकं येन येनेत्यादिरीतिमनुरुध्य केवलं निवेशयितुमुचितम् भट्टाचार्येण। यदि तु स्थलान्तरे वा तद्विशेषणं सार्थकं स्यात् तदा ग्रन्थस्य कथञ्चित् लौकिक-

रीत्यनुरोधितया सङ्गमनं युज्यते । तदेव तु नेक्षामहे । अत्र प्रतिभाति—तद्रूपाभाववदित्याकारिका तद्रूपाश्रयीभूतघटव्यक्त्यविषयणी तद्रूपाभाववत्त्वरूपसामान्यलक्षणजन्या तद्रूपाभाववत्त्वप्रकारेण तद्रूपाश्रयीभूतघटव्यक्तिभिन्ननिखिलजगद्विषयिणी तद्रूपाश्रयीभूतघटव्यक्त्यसमानकालीना च या काचित् जन्यज्ञानव्यक्तिः पक्षः तज्ज्ञानव्यक्तीतरभेदः साध्यं तज्ज्ञानव्यक्तिभगवज्ज्ञानान्यतरत्वं हेतुः तत्र भगवज्ज्ञानान्तर्भावेण व्यभिचारिणि हेतावतिव्याप्तिवारणाय येन येनेत्यावश्यकम् । तत्र हेतुसमानाधिकरणज्ञानव्यक्तीतरभेदाद्यभावप्रतियोगिनः साध्यं प्रति विषयतासंबन्धेनापि व्यापकत्वात् । विषयितासंबन्धेन साध्यवदसंबद्धस्वविशिष्टसामान्यकं तद्रूपाश्रयीभूतघटादिनिष्ठतद्व्यक्तित्वमेव प्रसिद्धम् । तादृशज्ञानव्यक्तेः तद्धटव्यक्त्यविषयकत्वात् एतदर्थमेव हि तद्रूपाश्रयीभूतघटव्यक्त्यविषयिणीत्यन्तं लक्षणघटकीभूतनिखिलाभावप्रतियोगिनामेव विषयितासंबन्धेन साध्यव्यापकत्वसंपत्तये सामान्यलक्षणाप्रत्त्यासत्तिजन्यत्वमात्रस्य तद्रूपाश्रयीभूतघटव्यक्तिभिन्ननिखिलजगद्विषयकत्वमभिहितम् । तादृशज्ञानव्यक्तेः तद्रूपाश्रयीभूतसमानसमानकालीनत्वे साध्यं प्रति तद्धटस्य कालिकसंबन्धेन व्यापकतया कालिकसंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य तद्धटाभावस्य भगवज्ज्ञानान्तर्भावेन व्यापकताघटककालिकसंबन्धेन प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिः प्रसज्यते । विषयितासंबन्धस्तु तद्धटनिष्ठव्यापकताघटको न भवति साध्यवत्त्वात् तज्ज्ञानव्यक्तौ विषयितासंबन्धेन तद्धटस्यासत्त्वात् । अतः तद्धटस्य कालिकसंबन्धेन साध्यव्यापकतावारणाय तद्रूपाश्रयीभूतघटव्यक्त्यसमानकालीनेत्युक्तम् । इत्थं च हेतुसमानाधिकरणानां निखिलानामेवाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन स्वप्रतियोगिनिष्ठव्यापकताघटकविषयितासंबन्धेन प्रतियोगिसमानाधिकरणत्वात् अतिव्याप्तिः । येन येनेत्युक्तौ च तद्व्यक्तीतरभेदाद्यभावानां तथाविधविशेषणताविशेषादिना

प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिरिति । इदं च भट्टाचार्यदर्शितस्थलसजातीयमेवातिव्याप्त्युपादानरीतिरपि तदीयोपपदानरीतिसजातीयैव । तथा हि भट्टाचार्येण निखिलविषयकस्य नित्यज्ञानस्य पक्षत्वमादृतम् । ये तु यत्किञ्चिद्घटमात्राविषयकनिखिलविषयकजन्यज्ञानस्य एवं तेन सर्वविषयिण्योः भगवदिच्छाकृत्यो व्यभिचारनिरूपकाधिकरणत्वमादृतम् । मया तु तादृशभगवज्ज्ञानस्य एवं विषयितासंबन्धेन प्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिप्रसक्तिरपि उभयत्र समा । तदिह लौकिकीं रीतिमनुरुध्य नित्यज्ञानत्वसाध्यकस्थलमुदाहृतम् । स्वपरिष्कृतव्यापकतावच्छेदकत्वनिवेशे तु सजातीयस्थलान्तरं गवेषणीयमित्यभिप्रायेणादिपदं प्रयुक्तवान् भट्टाचार्य इति सारम् ।

साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं यद्यत् स्वं तत्तदन्यत्वमेव व्यापकतावच्छेदकत्वमित्यभिहितं भाट्टाचार्येण ।

नन्वत्र साध्यवद्व्यक्तौ यत्किञ्चित्वविशेषणं व्यर्थम्; सामान्यतः साध्यवदसंबद्धस्यैव निवेशयितुमुचितत्वात् । वह्निमान् धूमादित्यादौ साध्यवदसंबद्धस्वविशिष्टसामान्यकं यद्यत्स्वं जलत्वप्रकारकप्रमाविशेष्यतात्वादि तद्भिन्नत्वस्य वह्न्यादिप्रतियोगितायां सत्त्वेन लक्षणसमन्वयात् । न च इदं वाच्यं ज्ञेयत्वादित्यत्र सामान्यतः साध्यवदसंबद्धस्वविशिष्टसामान्यकं स्वमप्रसिद्धम् । तत्र हि तादृशं स्वं घटत्वप्रकारकप्रमाविशेष्यतात्वादीति वक्तव्यम् । तच्च न संभवति । तद्विशिष्टस्य साध्यवदसंबद्धत्वाभावात् । यत्किञ्चित्पदोपादाने च तद्विशिष्टस्य पटाद्यसंबद्धत्वात् तादृशं स्वं घटत्वप्रकारकप्रमाविशेष्यतात्वादीति वाच्यम् । तत्र व्यापकतावच्छेदकत्वेनाभिमतो य स्वरूपादिः तेन संबन्धेन साध्यवदसंबद्धस्वविशिष्टसामान्यकस्य गगनत्वादेरेव प्रसिद्धत्वात् । मैवं—तथा सति घटत्वप्रकारकप्रमाविशेष्यत्वादिनिष्ठप्रतियोगिताया अपि तादृशगगनत्वादिभिन्नतया लक्षणघटकत्वापातात् । एवं वह्निमान् धूमादित्यादौ

पर्वतीयवह्न्याद्यभावानां लक्षणघटकत्वापत्तिवारणाय यत्किञ्चित्वनिवेशावश्यकत्वात् अन्यथा तदीयप्रतियोगिताविशिष्टस्य साध्यवदसंबद्धत्वाभावेन लक्षणघटकत्वापातात् । यत्किञ्चित्वनिवेशे तु तादृशप्रतियोगिताविशिष्टस्य तथाविधमहानसादियत्किञ्चिद्व्यक्त्यसंबद्धत्वात् न तदभावस्य लक्षणघटकतेति स्यादेतत् । स्वविशिष्टसामान्यकमित्यत्र सामान्यपदं व्यर्थम् । न चैवं वह्निमान् धूमादित्यत्र घटत्वाद्यवच्छिन्नवह्न्यादिनिष्ठप्रतियोगिताया लक्षणघटकत्वं न स्यात् तद्विशिष्टस्य पर्वतीयवह्नेः महानसादिरूपसाध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धत्वात् इति वाच्यम् । तादृशप्रतियोगिताया लक्षणाघटकत्वेऽपि क्षतिविरहात् । घटत्वाद्यवच्छिन्नद्रव्यत्वादिनिष्ठप्रतियोगितामादायैव लक्षणसंभवात् ; धूमवान् वह्नेरित्यादौ धूमत्वाद्यवच्छिन्नधूमादिनिष्ठप्रतियोगिताया लक्षणघटकत्वाभावेऽपि एकव्यक्तिभूतायोगोलकभेदादिप्रतियोगितामादायैवातिव्याप्तिवारणसंभवात् । ननु यथोक्तव्यापकतावच्छेदकत्वप्रवेश एव भट्टाचार्यस्य निर्भरः । न तु तद्घटकसामान्यपदप्रवेशावश्यकत्वेऽपि किन्त्वनावाश्यकलक्षणघटकताकानामपि वह्न्यादिप्रतियोगितानां ग्राहकतया संपातायातमुपरञ्जकविशेषणम् । वस्तुतः परित्याज्यमेव तत्प्रयोजनस्य भट्टाचार्येण स्वयमकथनाच्च ग्रन्थसन्दर्भविरोधः । न हि ग्रन्थकृल्लिखितां यावतामेव पदानां प्रयोजनमभिधातव्यमिति नियमोऽस्ति । किन्तु संभावितानां यत्पदस्य प्रयोजनं ग्रन्थकृल्लिखितम् तदेव तु यथाकथञ्चित् समर्थनीयमिति । मैवं—विचारासहत्वात् । तथा हि साधनसमानाधिकरणगोत्वाद्यभावस्येत्यादि दीधितिव्याख्यानानुपदं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमित्युक्त्या तदुपरि किञ्चिद्विचार्य तदुपरि अथेत्यादिना निरुक्तव्यापकतावच्छेदकतानिवेशे तु कपिसंयोगाभाववान् मेयत्वादित्यत्र स्वविशिष्टपदव्यावृत्तिवर्णनपरभाविदीधितिग्रन्थविरोधः । कपिसंयोगाभावनिष्ठप्रतियोगितायाः साध्यवन्निष्ठा-

भावप्रतियोगितावच्छेदकत्वात् प्रकृतव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशे प्रयोजनविरहादित्याशंक्य अत्र केचिदित्यादिना प्रकृतव्यापकताशरीरे प्रतियोगिवैयधिकरण्यविशेषणं सार्थकीकृत्य भाविदीधितिं समर्थयितुं केषांचित्मतमुपन्यस्य वस्तुतस्तु इत्यादिना तत्रास्वरसमभिधाय स्वयमन्यथा व्यापकतावच्छेदकत्वं निरुक्तवान् भट्टाचार्यः साध्यवत्यत्किञ्चिदित्यादिना। ततः च भाविदीधितिग्रन्थसमर्थनप्रयासप्रदर्शनेनानेन व्यापकतावच्छेदकत्वपरिष्कारेण निखिलभाविदीधितिग्रन्थविरोधिना अवश्यं भवितव्यम्। तच्च न घटते। यदि दीधितिग्रन्थसमर्थनाय अयं ग्रन्थः प्रवृत्तः तदा अव्यवहितपूर्वदीधितेः तदव्यवहितोत्तरदीधितेश्च विरोधात्। तथा हि कालो गोमान् गोत्वादित्यादौ गवाद्यभावस्य लक्षणघटकता दीधितौ दर्शयिष्यते। तच्च सामान्यपदाप्रवेशे विरुध्यते। गवाद्यभावीयप्रतियोगिताविशिष्टाया यत्किञ्चित्गोव्यक्तेः स्वानधिकरणीभूतायां साध्यवत्यत्किञ्चित्खण्डकालव्यक्तौ कालिकसंबन्धेनासंबद्धतया तादृशप्रतियोगिताया लक्षणघटकत्वासंभवादिति। न चैतद्दीधितिसमर्थनायैव सामान्यपदं लक्षणे निवेश्यमिति वाच्यम्। यदि केवलं दीधितिग्रन्थसमर्थनायैव प्रयोजनान्तरशून्यस्यापि विशेषणस्य लक्षणे प्रवेशनं भट्टाचार्यस्याभिप्रेतं स्यात् तर्हि कपिसंयोगाभाववान् मेयत्वादित्यादि दीधितिसमर्थनायैव व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशसंभवेन व्यापकताशरीरे प्रतियोगिवैयधिकरण्यवैयर्थ्यनिबन्धनभाविदीधितिविरोधशंकायां तत्सार्थक्यसंपादनेन तादृशदीधितिं समर्थयतां मन्मतोपन्यासस्य उन्मत्तप्रलापतुल्यत्वापत्तेः। अथ गोमान् गोत्वादित्यादौ गवाद्यभावस्य लक्षणघटकत्वाभावेऽपि गवादेरित्यादिपदग्राह्यप्रलयान्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यमादाय प्रसक्तदोषवारकतयैव तत्सार्थक्यं संभवतीति न तद्दीधितिविरोध इति चेत् तर्हि कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगात्मकाभावस्य लक्षणघट-

कत्वाभावेऽपि यावद्धेत्वधिकरणान्तर्भावेनेत्यस्य आदिपदग्राह्ये सत्तावान् द्रव्यत्वादित्यत्र सत्ताद्यभावमादाय प्रसक्तातिव्याप्तिवारकतयैव स्वविशिष्टपदसार्थक्यं संभवतीति तद्दीधितिविरोधपरिहाराय व्यापकताशरीरे प्रतियोगिवैयधिकरण्यसार्थक्योपपादनस्यानर्थक्यात्। अथ आदिपदग्राह्यस्थलान्तरे स्वविशिष्टपदव्यावृत्तिरास्ताम्। कपिसंयोगाभाववान् मेयत्वादिति दीधितेः का गतिरिति तदर्थं प्रतियोगिवैयधिकरण्यसार्थक्योपपादनमिति चेत्; तर्हि गोमान् गोत्वादित्यत्रापि आदिपदग्राह्यप्रलयान्यत्वाद्यभावमादाय यावद्धेत्वधिकरणान्तर्भावेन तस्य व्यावृत्तिरास्ताम्। गवादेरभावस्येत्यादिदीधितेः का गतिरिति तुल्यः पर्यनुयोगः। एवमन्यादृशा अपि शंकास्तुल्यपर्यनुयोगेन परिहार्याः। एवं सामान्यपदाप्रवेशे धूमवान् वह्नेरित्यादौ धूमादिनिष्ठप्रतियोगिताया लक्षणघटकत्वाभावेन धूमाद्यभावानां गोत्वाभावादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिशंकाया अनवतारेण तादृशशंकाया जलवृत्तित्वविशिष्टेत्यादिदीधितिग्रन्थोत्थापनासङ्गतिश्चेति। एवं सामान्यपदाप्रवेशे भट्टाचार्यग्रन्थसंदर्भा अपि परश्शता विरुध्यन्ते। अत्र केचित्—साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकभिन्नत्वरूपव्यापकतावच्छेदकत्वस्य वा निवेशनीयतया कपिसंयोगाभावादिनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकत्वनिर्वाहः इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादाय अव्याप्तिराशंकिता। अन्यथा पुनः सत्तावान् जातेरित्यादौ काले कालिकसंबन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नसत्ताद्यभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्ताव्याप्तेर्वारणाय स्वविशिष्टेति विशेषणमावश्यकम्। आदिपदग्राह्यमपि तादृशस्थलमेवेति बोध्यमिति भट्टाचार्यग्रन्थो दृश्यते। अत्र कपिसंयोगाभावनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकत्वनिर्वाह इत्यभिप्रेत्येत्यस्य अन्यथा पुनरित्यस्य न सम्यगर्थस्वरसपर्यालोचनायाम् एत-

दीधितिसमर्थनायैव साध्यवत्यत्किञ्चिदित्यादि व्यापकतावच्छेदकत्वनिरुक्तिः पागस्माभिः कृता वास्तविकन्तु व्यापकतावच्छेदकत्वमन्यदेव निर्वचनीयमास्ते इत्यवगम्यते। न च साध्यवत्यत्किञ्चिदित्यादि व्यापकतावच्छेदकशरीरे सामान्यपदाप्रवेशेऽपि कपिसंयोगाभावनिष्ठप्रतियोगिताया व्यापकतावच्छेदकत्वनिर्वाहात् सामान्यपदवैयर्थ्यमिति वाच्यम्। गवादेरभावस्येत्यादि दीधितिसमर्थनाय तदुपादानात्। न चैवं व्यापकतावच्छेदकत्वशरीरे प्रतियोगिवैयधिकरण्यप्रवेशप्रयासप्रतिपादनप्रयासः प्रागुक्तरीत्या व्यर्थ इति वाच्यम्। संभवतः प्रयोजनस्य परित्यागानौचित्यात्। अत्र च साध्यवत्यत्किञ्चिद्व्यापकतावच्छेदकत्वनिरुक्त्यस्वरसबीजन्तु दीधितिसमर्थनमात्रप्रयोजनकस्य प्रयोजनान्तरशून्यस्य सामान्येत्यस्य प्रकृतलक्षणे प्रवेशनीयत्वमेव। अतः तद्वैयर्थ्यप्रयुक्तदूषणं नेदानीमुद्भावनीयम् भट्टाचार्येणैव तस्य सूचितत्वात् प्रतियोगिवैयधिकरण्यघटितनिरुक्तव्यापकतावच्छेदकत्वास्वरसबीजन्तु गुरुधर्मस्यानवच्छेदकत्वनिबन्धनं तु भट्टाचार्येणैव प्रागुपदर्शितम्; निर्वचनीयव्यापकतावच्छेदकत्वं तु साध्यवन्निष्ठाभावीयवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नव्यधिकरणधर्मानवच्छिन्नप्रतियोगित्वान्यूनानतिरिक्तवृत्तिभिन्नत्वम्। वह्निमान् धूमादित्यादौ तादृशप्रतियोगिता घटत्वाद्यवच्छिन्ना घटादिनिष्ठा प्रतियोगिता तदन्यूनानतिरिक्तवृत्तिभिन्नत्वस्य घटत्वाद्यवच्छिन्नवह्न्यादिनिष्ठप्रतियोगितायां सत्त्वाल्लक्षणसमन्वयः। तत्र च एतत्क्षणान्यक्षणवृत्तित्वविशिष्टवह्नित्वावच्छिन्नाभावं तार्णातार्णदहनोभयत्वावच्छिन्नाभावं वह्नित्वेन वह्न्यभावमादाय वह्न्यादिप्रतियोगिताया व्यापकतावच्छेदकत्वासंभववारणाय वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नत्वं प्रतियोगिता विशेषणम्। घटत्वेन वह्न्यभावप्रतियोगिताया घटत्वेन किमपि प्रमेयं नास्ति घटत्वेन किमपि द्रव्यं नास्तीत्यादिप्रतीतिसिद्धाभावीयप्रतियोगितानतिरिक्तवृत्तित्वात् महानसीयवह्निर्नास्तीत्यादिप्रतीतिसिद्धाभावीयप्रतियोगित्वात न्यूनवृत्तित्वाच्च तद्दोष-

वारणाय अन्यूनेत्यनतिरिक्तवृत्तीति च; संयोगेन द्रव्यस्याव्याप्यवृत्तित्वे तु वह्निमान् धूमादित्यादौ घटत्वेन द्रव्यत्वाद्यभाव लक्षणघटकः। न च प्रथमतो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको घटत्वादिना वह्न्यभावादिरेवेत्यभिधानं भट्टाचार्यस्य विरुध्यत इति वाच्यम्। तस्य संयोगेन द्रव्यस्य व्याप्यवृत्तित्वमिति स्थूलदृष्ट्या उक्तत्वात्। अन्यथा तत्रैवकारेण समानाधिकरणधर्मावच्छिन्नवह्न्यभावव्यावृत्तिकथनवैयर्थ्यापत्तेः। इदानीं कपिसंयोगाभावनिष्ठप्रतियोगिताया व्यापकतावच्छेदकत्वं न निर्वहति तस्याः कपिसंयोगात्मकाभावीयतादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वादिति पर्यालोच्य अन्यथा पुनरित्यादिना प्रकारान्तरेण स्वविशिष्टपदव्यावृत्तिर्दर्शिता। अत्रैवं कालिकसंबन्धेन गवादेरव्याप्यवृत्तितया गवादिनिष्ठप्रतियोगिताया निरुक्तव्यापकतावच्छेदकत्वनिर्वाहेण गवादेरभावस्येत्यादि दीधितिसंदर्भविरोध इति का नो हानिः। न हि दीधितिसंदर्भसमर्थनायायं परिष्कारः; साध्यवत्यत्किञ्चिदित्यादिपरिष्कारस्यैव दीधितिसंदर्भसमर्थनपरत्वात्। परं तु एतत्परिष्कारेऽपि दीधितिकृता निवेशितानां विशेषणानां प्रयोजनत्वमुपपादनीयम्। अन्यथा पुनरित्यादिना भट्टाचार्येण स्वविशिष्टत्वव्यावृत्तिदानात् लिङ्गात्। तच्चोपपद्यत एव। गोमान् गोत्वादित्यादौ प्रलयान्यत्वाभावमादाय अतिव्याप्तेर्वारकतया हेत्वधिकरणावच्छेदेनेत्यस्य सत्तावान् जातेरित्यादौ सत्ताभावमादायातिव्याप्तेर्वारकतया स्वविशिष्टेत्यस्य च प्रयोजनत्वात्। नन्वत्रापि व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकम्। अन्यथा संबन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैवेत्यादिना भट्टाचार्योपदर्शितदूषणप्रसङ्गादिति चेन्न; प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन साध्यवन्निष्ठत्वनिवेशेनैव तद्दोषवारणसंभवेन प्रतियोगिवैयधिकरण्यनिवेशस्यानावश्यकत्वादित्याहुः। एतावता ग्रन्थसमर्थनमात्रप्रयोजनकसामान्यपदघटन-

मेव हि अन्यथा पुनरित्यादिसंदर्भसूचिते साध्यवत्यत्किञ्चिदित्यादिव्यापकतावच्छेदकत्वनिरुक्त्यनादरे बीजतया दर्शितम्। तच्च न संभवति; तथा सति सामान्यपदं परित्यज्य दर्शितव्यापकतावच्छेदकत्वस्यैव स्वीकर्तुमुचितत्वेन व्यापकतावच्छेदकत्वान्तरनिरुक्तेः अन्याय्यत्वात्। न च सामान्यपदपरित्यागे गवाद्यभावस्य लक्षणघटकत्वोपपादकदीधितिविरोध इति वाच्यम्; तस्य इदानीमप्रयोजकीकृतत्वात् अन्यथा व्यापकतावच्छेदकत्वान्तरनिरुक्त्यादरेऽपि अनिस्तारात्। अथ मास्तु व्यापकतावच्छेदकत्वान्तरनिरुक्तिरिति चेत्; तर्हि अन्यथा पुनरित्यादिना स्थलान्तरे स्वविशिष्टपदव्यावृत्तिदानगवेषणानुचिता। सामान्यपदानुपादानेऽपि कपिसंयोगाभावसाध्यके स्वविशिष्टपदव्यावृत्तेः सुवचत्वात्। तस्मात् स्वनिरुक्तव्यापकतावच्छेदकतायामपरितोषात् अन्यथा पुनरित्यादिग्रन्थो न प्रवृत्तः किन्तु व्यापकतावच्छेदकत्वान्तरनिरुक्त्यादरे कपिसंयोगाभावसाध्यके व्यावृत्त्यभावमाशंक्यैवेति वक्तव्यम्। तथा च सामान्यपदवैयर्थ्यप्रयुक्तदूषणं भट्टाचार्येण सूचितमिति शक्यत एव तदिदानीमुद्भावयितुं मयेति। वयं तु ब्रूमः; साध्यवत्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकभिन्नत्वमित्यत्र सामान्यपदप्रवेशनं लाघवायैव। तथा हि तथाविधसामान्यकभिन्नत्वं न तथाविधसामान्यकत्वावच्छिन्नप्रतियोगिताकैकभेदवत्त्वं स्वत्वस्य अनुगतानतिप्रसक्तस्याभावात्। किन्तु तादृशस्वविशिष्टसामान्यकं यद्यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वम्। अत एव यद्यत् स्वमित्यादि भट्टाचार्येणोक्तम्। तत्र च सामान्यपदाप्रवेशे वह्न्यादिप्रतियोगितादेरपि तथाविधस्वविशिष्टकतया तद्भेदा अपि निवेशनीयाः प्रसज्येरन्। निवेशनं च तेषां निष्प्रयोजनमिति पर्यालोच्य भट्टाचार्यः सामान्यपदं दत्तवान्। इदानीं वह्न्यादिप्रतियोगितादेरतादृशतया शैवालप्रतियोगिकत्वतत्तद्वह्नित्वाद्यवच्छिन्नप्रतियोगित्वादीनामेव च तादृशत्वेन तद्भेदा एव निवेश्यन्ते; न तु वह्न्यादिप्रतियोगिताभेदा

अपीति कतिपयभेदानिवेशनप्रयुक्तलाघवसंपादकं सामान्यपदं निवेशनीयम् । एवं च साध्यवत्यत्किञ्चिदित्यादिव्यापकतावच्छेदकत्वं समीचीनमेव । न चास्य समीचीनत्वेन अन्यथा पुनरित्यनेनात्रानिर्भरसूचनम् भट्टाचार्यस्यासङ्गतमिति वाच्यम् । अन्यथा पुनरित्यादिग्रन्थस्यात्रानिर्भरसूचकत्वानङ्गीकारात् प्रकारान्तरेण व्यापकतावच्छेदकत्वनिरुक्त्यैव कपिसंयोगाभाववान् मेयत्वादित्यत्राव्याप्तिवारणसंभवात् तद्वारणप्रयोजनकं स्वविशिष्टत्वविशेषणं व्यर्थमित्याशंकायां प्रकारान्तरेण व्यापकतावच्छेदकत्वनिरुक्तावपि तद्विशेषणसार्थक्योपपादनायैव अन्यथा पुनरित्यादिग्रन्थोत्थानादिति पुनः निर्व्लीकः पन्थाः ।

इति प्रथमस्वलक्षणम्

द्वितीयस्वलक्षणम्

द्वितीयस्वलक्षणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्यत्र प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यं निवेशयिष्यता धूमवान् वह्नेरित्यादौ लक्षणघटकानां यावतामेव अभावानां यथाकथञ्चित् प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमुपपाद्यातिव्याप्तिं पसञ्जयता भट्टाचार्येण स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाद्यभावस्य कालिकसंबन्धेन तादृशविषयत्वत्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगितासंबन्धेन तादृशविषयत्वत्वादिविशिष्टतादृशविषयत्वत्वाद्यभावेन च समं स्वरूपसंबन्धेन सामानाधिकरण्यसत्त्वात् अतिव्याप्तिरिति लिखितम् ।

तत्र विचार्यते—व्यभिचारिणि साध्याभावस्य विशेषणताविशेषेण किञ्चिद्विशिष्टस्वाभावनिष्ठतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादाय अतिव्याप्तिवारणाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्यनेन प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यस्य स्वयमेव पूर्वमेव विवक्षिततया दर्शितस्थले संयोगादिध्वंसस्य तादृशप्रमाविषयत्वत्वाद्यभावस्य च येन केनापि संबन्धेन प्रतियोगितावच्छेदकविशिष्टत्वेऽपि भावरूपत्वाभावेन यथोक्तधूमवत्त्वप्रमाविषयत्वाभावस्य प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्याभावात् कथमतिव्याप्तिरिति । न तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणप्रयोजनाभिधानप्रस्तावे ।

वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणमपेक्ष्य प्रतियोगितावच्छेदक एवाभावावृत्तित्वं निवेशनीयमिति क्वाचित्कःपाठो दृश्यते । तल्लक्षण एव भट्टाचार्यस्य निर्भरः; प्रतियोगितावच्छेदकावच्छिन्ने भावत्वनिवेशकल्पे किञ्चिद्विशिष्टस्य स्वस्य योऽभावः सामानाधिकरण्यसंबन्धेन तद्विशिष्टस्याभावो विशिष्टस्वसमनियतोऽपि स्वस्मादतिरिक्त एवेति निर्बन्धस्यावश्यकर्तव्यत्वात् अत्र तु तदनावश्यकत्वात् तथा च तादृशपक्षाभिप्रायक एवायं ग्रन्थः दर्शिताभावप्रतियोगितावच्छेदके धूमवत्त्वप्रकारकप्रमाविषयत्वके अभावावृत्तित्वस्याक्षतत्वात् । न च धूमवत्त्वप्रकारकप्रमाविषयत्वस्यापि दर्शितसंयोगादिध्वंसधूमवत्त्वप्रकारकप्रमाविषयत्वत्वाभावादौ कालिकविशेषणतानुयोगिताविशेषादिसंबन्धेन वृत्तित्वमक्षतमिति वाच्यम्; तथा सति सद्धेतुस्थलेऽभावप्रतियोगितावच्छेदकमात्रस्यैव ध्वंसात्मकाभावे कालिकसंबन्धेन वृत्तिमत्तया असंभववारणाय प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेनैव अभावावृत्तित्वस्य वाच्यतया धूमवत्त्वप्रकारकप्रमाविशेष्यत्वत्वे तादृशस्वरूपसंबन्धेनाभावावृत्तित्वस्याक्षतत्वात् । मैवं—यतोऽत्र कल्पे भट्टाचार्यस्य न निर्भरः; युक्त्यसहत्वात् । उत्तरग्रन्थस्वरसविरोधाच्च । युक्त्यसहत्वं कथमिति चेत्; उक्तयुक्त्या अभावनिरूपितवृत्तितायां प्रतियोगितावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्यावश्यं निवेशनीयतया वह्निमान् धूमादित्यादौ वह्नित्वेन घटाभावस्य समवायित्वेन वाच्यत्वाभावाभिन्नतया स्वरूपसंबन्धस्यापि तत्प्रतियोगितावच्छेदकताघटकत्वेन तत्संबन्धावच्छिन्नाया अभावनिरूपितवृत्तितायाः कथंचित् प्रसिद्धिसंभवेऽपि वह्नित्वेन वह्न्यभावस्यापि तत्र लक्षणघटकतया तत्प्रतियोगितावच्छेदकताघटकसमवायसंबन्धावच्छिन्नाया अभावादिनिरूपितवृत्तिताया अप्रसिद्ध्या अव्याप्त्यापत्तेः । न च प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव एतल्लक्षणे निविष्टतया संयोगेन द्रव्यस्याव्याप्यवृत्तित्वेन तत्र वह्न्यभावस्य लक्षणघटकतैव नास्ति; किन्तु द्रव्यत्वाभावत्वत्वेन

घटाभावादीनामेव तत्र लक्षणघटकता तत्प्रतियोगितावच्छेदकताघटकसंबन्धश्च स्वरूपसंबन्ध एवेति नाप्रसिद्धिः वह्न्यभावधूमाभावादीनां तत्र तत्र लक्षणघटकत्वोपवर्णनं तु भट्टाचार्यस्य प्रौढवादाभिप्रायकम् प्रकृतलक्षणे प्रतियोगिवैयधिकरण्याघटितव्यापकतानिवेशस्य तेनैव असकृदुपपादितत्वात् इति वाच्यम्; तथापि कालः सर्ववान् इत्यत्र महाकालपरिमाणाभावस्य कालिकसंबन्धेन हेतुसामानाधिकरण्यस्य प्रतियोगितावच्छेदकतावच्छेदकसमवायसंबन्धेनाभावनिरूपितवृत्तित्वाप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वात्। न च महाकालपरिमाणाभावस्य समवायवत् स्वरूपसंबन्धोऽपि प्रतियोगितावच्छेदकताघटकः पूर्वक्षणवृत्तित्वविशिष्टतदभावत्वस्य स्वरूपसंबन्धेनैव तत्प्रतियोगितावच्छेदकत्वात् तेन च संबन्धेनाभाववृत्तिता नाप्रसिद्धेति वाच्यम्। तथापि वह्निमान् धूमादित्यादौ कालिकसंबन्धेन हेतुसामानाधिकरण्यस्य समवायसंबन्धावच्छिन्नवाच्यत्वावच्छिन्नप्रतियोगिताकाभावस्यापि लक्षणघटकतया तस्य च प्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धावच्छिन्नाभावनिरूपितवृत्तित्ववदन्यप्रतियोगितावच्छेदकाप्रसिद्ध्या अव्याप्तेर्दुर्वारत्वात्। न च समवायसंबन्धावच्छिन्नवाच्यत्वावच्छिन्नप्रतियोगिताकाभावस्य समवायसंसर्गकवाच्यत्वप्रकारकप्रमाविशेष्यत्वाभावसमनियतत्वेन तदभिन्नतया तादृशप्रमाविशेष्यतात्वमपि तादृशप्रतियोगितावच्छेदकम् तच्च स्वरूपसंबन्धेनाभाववृत्ति तदवच्छिन्नसामानाधिकरण्यमपि पर्वताद्यन्तर्भावेण तादृशाभावेऽक्षतमिति को दोष इति वाच्यम्। एवमपि कालिकसंबन्धेन धूमसमानाधिकरणस्य समवायसंबन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य कालिकसंबन्धावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकताकस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया कालिकसंबन्धोऽपि द्रव्यत्वाभावप्रतियोगितावच्छेदकः तेन संबन्धेनाभाववृत्तिप्रतियोगितावच्छेदकाप्रसिद्धिः। सर्वस्यैव च ध्वंसात्मकाभावे कालिकसंबन्धेन वृत्तेः दर्शिताभावसमनैयत्यं द्रव्यत्वा-

भावस्य कथमिति चेत्; यतः कालिकसंबन्धेन द्रव्यत्ववान् ध्वंसः स्वरूपसंबन्धेन सर्वत्रैव द्रव्ये वर्तते; न गुणादौ; न च उत्पत्त्यनन्तरोत्पत्त्यनन्तरत्रिचतुरक्षणपर्यन्तं घटादौ पवमानपरमाणुसंयोगध्वंसस्यापि उत्पादासंभवात् तावत्क्षणावच्छेदेन तत्र दर्शिताभावसत्त्वात् न तस्य द्रव्यत्वाभावसमनैयत्यमिति वाच्यम्। तथापि कालिकसंबन्धेन चरमक्रियाध्वंसस्य साध्यतायां प्रलयमहाकालान्यतरत्वहेतौ कालिकसंबन्धेन हेतुसमानाधिकरणस्य कालिकसंबन्धावच्छिन्नचरमक्रियाध्वंसत्वावच्छिन्नप्रतियोगिताकाभावस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतभाववृत्तिरूपावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वेऽपि कालिकसंबन्धसंसर्गकचरमक्रियाध्वंसवत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्य तादृशस्य लक्षणघटकतया तस्य च कालिकसंबन्धावच्छिन्नचरमक्रियाध्वंसनिष्ठप्रतियोगितावच्छेदकताकभेदसमनियतत्वेन तदभिन्नतया कालिकसंबन्धस्यापि तत्प्रतियोगितावच्छेदकतावच्छेदकत्वेन तेन च संबन्धेनाभावावृत्तिप्रतियोगितावच्छेदकाप्रसिद्धिः तदेवमभावावृत्तित्वनिवेशपक्षस्य युक्त्यसहत्वं दर्शितम्। अथोत्तरग्रन्थस्वरसविरोधः कथमिति चेत्; इत्थम्; वस्तुतस्तु इत्यादिग्रन्थानन्तरं प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यमित्येव बहुशो लिखितम्। भट्टाचार्यो यद्यभावावृत्तित्वनिवेशपक्षमेव निरभरिष्यत् तर्हि अभावावृत्तिप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्येवालिखिष्यत्। तस्मात् वस्तुतस्तु इत्यादिग्रन्थः न वास्तविकः। किन्तु केनचित् कल्पितः। अत एव बहुपुस्तकेषु अयं ग्रन्थो न दृश्यते। तस्मात् संयोगादिध्वंसादिसामानाधिकरण्यमादायातिव्याप्त्युपपादनमसङ्गतमिति। स्थूलदृष्ट्या इदमभिहितम् निपुणतरविवेचनायां तु कालिकसंबन्धेन तादृशप्रतियोगितावच्छेदकविशिष्टवह्न्यात्मकभावसामानाधिकरण्यमादायैवातिव्याप्तिः उपपादनीयेति वाच्यम्। प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्य प्रतियोगितावच्छेदकसंबन्धेनैव प्राक् विवक्षिततया धूमवत्त्व-

प्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धेन वह्नेरवृत्तेः। न च धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्य धूमाभावसमनियतत्वेन तद्-भिन्नतया संयोगोऽपि तत्प्रतियोगितावच्छेदक इति तेन संबन्धेन वह्निसामा-नाधिकरण्यमादायातिव्याप्तिप्रसक्तिरिति वाच्यम्। अवच्छिन्नवृत्तिकत्वा-वच्छिन्नवृत्तिकान्यत्वरूपविरुद्धधर्माध्यासेन तयोर्भेदात्।

अत्र केचित्। विषयतायाः विषयस्वरूपतावादिप्राचीनमते अयो-गोलकत्वप्रकारकप्रमाविशेष्यत्वस्यायोगोलकस्वरूपत्वेन तस्य कालोपाधितया औचित्यावर्जनीयतया धूमप्रकारकप्रमाविशेष्यत्वाभावस्य कालिकसंबन्धेन स्व-प्रतियोगितावच्छेदकीभूतधूमप्रकारकप्रमाविशेष्यतात्वाभावस्य कालिकसंबन्धेन स्वप्रतियोगितावच्छेदकीभूतधूमप्रकारकप्रमाविशेष्यतात्वविशिष्टं यदयोगोलक-त्वप्रकारकप्रमाविशेष्यत्वं तेन स्वरूपसंबन्धेन सामानाधिकरण्यमयोगोल-कान्तर्भावेणाक्षतमिति अतिव्याप्तिप्रसक्तिरित्याहुः। तत्र च विषयितायाः कालोपाधित्वमस्ति न वेति न वयं निश्चेतुं प्रभवामः।

अन्ये तु अव्याप्यत्वस्य संबन्धतायाः दीधितिकृदभिप्रेततया धूम-प्रकारकप्रमाविशेष्यतात्वस्याव्याप्यत्वसंबन्धेन अयोगोलकत्वप्रकारकप्रमाविशे-ष्यत्वेऽपि सत्त्वात् तेन सामानाधिकरण्यमादायातिव्याप्तिप्रसक्तिरित्याहुः।

अत्र च अव्याप्यतायाः संबन्धतापक्षाश्रयणे यत्समानाधिकरणा इति विशेषणं स्वविशिष्टत्वविशेषणं व्यर्थम्। अतो नात्र लक्षणे तत्पक्षाश्रयणं युक्तम्; वयं तु ब्रूमः—अभावावृत्तित्वनिवेशपक्षे एव भट्टाचार्यस्य निर्भरः तत्पक्षे दर्शितनिर्बन्धाभावात्। न चैवं चरमक्रियाध्वंसस्य कालिकसंबन्धेन साध्यतायां प्रलयमहाकालान्यतरत्वहेतौ उक्तरीत्याव्याप्तिरिति वाच्यम्। स्वप्रतियोगितावच्छेदकघटकीभूतयत्किञ्चित्संबन्धावच्छिन्नाभावनिरूपितवृत्ति-ताशून्यत्वविवक्षयैव तादृशाव्याप्तिवारणात्। तत्र कालिकसंबन्धसंसर्गकचरम-क्रियाध्वंसप्रकारकप्रमाविशेष्यत्वाभावस्य स्वप्रतियोगितावच्छेदकतावच्छेदकी-

भूतो यो विशेषणतात्मकयत्किञ्चित्संबन्धः तदवच्छिन्नाभावनिरूपितवृत्तिताशून्यं यत् तादृशप्रकारकप्रमाविशेष्यतात्वरूपं प्रतियोगितावच्छेदकं तदवच्छिन्नसामानाधिकरण्यसत्त्वात् । एवं प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यमित्युत्तरग्रन्थस्वरसविरोधोऽपि कथंचित् परिहर्तुं शक्यत एव । प्रतियोगितावच्छेदकावच्छिन्ने भावत्वोक्त्या प्रतियोगितावच्छेदकेऽभावावृत्तित्वस्य लाभसंभवादित्यास्तां विस्तरः । अधिकमन्यत्र विवेचनीयम् ।

द्वितीयस्वलक्षणे साध्यतावच्छेदकसंबन्धादिना साध्यतावच्छेदकावच्छिन्नव्यापकत्वप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्ययोः निवेशे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थासङ्गतिं परिहृतवान् । तत्र च भक्षितेऽपि लशुने न शान्तो व्यधिरिति आक्षिपामः—तथा हि "अयमात्मा ज्ञानादि" त्यादौ संयोगसंबन्धावच्छिन्नात्मत्वत्वावच्छिन्नप्रतियोगिताकाभाव एव लक्षणघटकः तस्य च समवायसंबन्धावच्छिन्नाकाशत्वावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया समवायसंबन्धस्यापि तत्प्रतियोगितावच्छेदकत्वेन तत्संबन्धघटितसाध्यव्यापकतावच्छेदकीभूतात्मत्वावच्छिन्नप्रतियोगिताकत्वस्य तत्संबन्धघटितात्मत्वरूपप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यस्य च तत्र सत्वात् । एवम् इदं वाच्यं ज्ञेयत्वादित्यादौ संयोगसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभाव एव लक्षणघटकः तस्य च स्वरूपसंबन्धावच्छिन्नाकाशत्वावच्छिन्नप्रतियोगिताकाभावसमनैयत्यमादाय सर्वमुपपादनीयम् । एवं च प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थासङ्गतिर्दुर्वारैव । न च स्वीयतत्प्रतियोगितावच्छेदकसंबन्धेन तत्प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यस्य विवक्षितत्वात् नायं दोषः । दर्शितस्थले समवायसंबन्धावच्छिन्नायाः स्वरूपसंबन्धावच्छिन्नायाश्च आकाशनिष्ठतदवच्छेदकीभूताकाशत्वावच्छिन्नसामानाधिकरण्यस्य तादृशाभावयोरसंभवादिति वाच्यम् । तादृशविवक्षायाः प्रयोजनान्तरविरहेण केवलग्रन्थसङ्गमनायैव तथाविधविवक्षा-

दरे तथाविधव्यधिकरणधर्मावच्छिन्नप्रतियोगिताका इति स्वातन्त्र्येणाभाव-
विशेषणप्रक्षेपस्यैव उचितत्वेन यत्तत्वप्रवेशप्रयासवैफल्यात् अन्यथा विषयता-
संबन्धेन व्यापकत्वं तेनैव संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-
करण्यं विवक्षणीयमिति पूर्वकल्पेऽपि लक्षणघटकीभूतप्रतियोगितायामपि
विषयतासंबन्धावच्छिन्नत्वं प्रवेश्य संयोगसमवायादिरूपव्यधिकरणसंबन्धा-
वच्छिन्नप्रतियोगिताकाभाववारणसंभवेन सर्वत्र व्यधिकरणसंबन्धावच्छिन्नप्रति-
योगिताकाभावमादायैव लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्था-
सङ्गतिरित्यर्थकेन एतेन इत्यनेन तत्पक्षदूषणं भट्टाचार्यस्य विरुध्येत । न च
एतदस्वरसेनैव ज्ञेयत्वत्वादिना वाच्यत्वाभावस्सुलभः इत्येतादृशग्रन्थासङ्गतेश्चेति
दूषणान्तरमादृतमिति वाच्यम् । एवमपि स्वप्रतियोगितावच्छेदकावच्छिन्न-
व्यापकताघटकयावत्संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्य-
निवेशनरूपतत्पूर्वपक्षे दर्शितप्रतियोग्यवृतिश्चेत्यादिग्रन्थासङ्गतेरेव दूषणत्वे-
नाभिहिततया तत्रापि लक्षणघटकीभूतप्रतियोगितायां व्यापकताघटकसंब-
न्धावच्छिन्नत्वनिवेशेनैव व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभाववारण-
संभवेन तदसङ्गतेर्दुर्वारत्वात् । ननु लक्षणघटकीभूतप्रतियोगितायां व्याप-
कताघटकसंबन्धावच्छिन्नत्वनिवेशेऽपि उपदर्शित दोषो दुर्वार एव । तथा हि
विषयतासंबन्धावच्छिन्नात्मत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य संयोगसंबन्धा
वच्छिन्नात्मत्वप्रकारकप्रमात्वस्यापि तत्प्रतियोगितावच्छेदकत्वेन विषयता-
संबन्धस्यापि तत्प्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्संबन्धान्त-
र्गतविषयतासंबन्धेन आत्मत्वत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधि-
करण्यासंभवादव्याप्तिरिति वाच्यम् । तेन संबन्धेन आत्मत्वप्रकारकप्रमा-
त्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसत्त्वात् । न च तत्र
समवायविषयतयोरुभयोरपि स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटक-
तया तदुभयसंबन्धेनैकप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसंभवा-

दतिव्याप्तिरिति वाच्यम्। यतो न तादृशयावत्संबन्धेन एकप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विवक्षितम्। किन्तु तादृशयावत्संबन्धैः यथाकथंचित् प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमेव; तच्च न प्रकृते दुर्घटम् विषयासंबन्धेन आत्मत्वप्रकारकप्रमात्वरूपप्रतियोगितावच्छेदकावच्छिन्नेन समवायसंबन्धेन चात्मत्वत्वरूपप्रतियोगितावच्छेदकावच्छिन्नेन समं सामानाधिकरण्यस्य तत्र सत्त्वात्; अन्यथा वह्निमान् धूमादित्यादौ वह्निप्रकारकप्रमाविशेष्यतात्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य विशेष्यतासंबन्धावच्छिन्नवह्निप्रकारकप्रमात्वावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया स्वरूपविशेष्यतयोरुभयोरेव तत्प्रतियोगितावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वाच्च। द्रव्यत्वत्वेन घटाभावस्य वाच्यत्वत्वेन घटाभावसमनियतत्वेन तदभिन्नतया समवायस्वरूपसंबन्धयोरुभयोरेव तत्प्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकत्वाच्च तादृशयावत्संबन्धेन एकप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्य तत्तदभावेषु अनुपपत्त्या अनुपपत्तेः। तथा चायमात्मा ज्ञानादित्यादौ व्यधिकरणधर्मावच्छिन्नाभावस्वीकारमन्तरेणापि लक्षणसंगमनं युज्यत एव। एवमिदं वाच्यं ज्ञेयत्वादित्यादौ अनयैव रीत्या लक्षणसङ्गमनं योज्यम्। तस्मात् व्यापकताघटकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशपक्षदूषणं भट्टाचार्यस्य न विरुद्धमिति चेत्; भ्रान्तोऽसि यतः प्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकसंबन्धत्वेन संबन्धस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशः। तथा सति प्रथमस्वलक्षणे भट्टाचार्यदर्शितदोषप्रसङ्गात्। किन्तु साध्यतावच्छेदकावच्छिन्नवन्निष्ठात्यन्ताभावीययत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः ते सर्वेऽपि तेन तेन संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणा इत्येवं लक्षणं वाच्यम्। तत्र

यद्यत्संबन्धावच्छिन्नत्वं लक्षणघटकीभूतप्रतियोगितायामपि निवेश्यताम्। तत्र यद्यत्संबन्धपदेन व्यापकताघटकप्रतियोगितायां यद्यत्संबन्धावच्छिन्नेत्यत्र यत्संबन्धो ग्रहीतः स एव ग्राह्य इति वयं पर्यनुयुञ्ज्महे। तथा सति प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थित्यभावात्। तत्र हि साध्यवन्निष्ठाभावीयसमवायसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकं यदात्मत्वत्वं तदवच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावश्च न हेतुसमानाधिकरण इत्यादिरीत्या व्यधिकरणधर्मावच्छिन्नाभावस्वीकारस्य आवश्यकत्वात्। तस्मात् केवलग्रन्थासङ्गतिनिवारणाय लक्षणे किञ्चित्वविवक्षणमन्याय्यमिति प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिर्दुर्वारैव।

अथ द्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावभिन्नं प्रमेयत्वादित्यत्र लक्षणघटकीभूतानां यावतामेव समानाधिकरणधर्मावच्छिन्नाभावानां व्यभिचारनिरूपकाधिकरणीभूततादृशाभावमात्राधिकरणकत्वनियमेन तेषामधिकरणीभूततादृशाभावस्वरूपतया स्वविशिष्टतादृशाभावात्मकहेत्वधिकरणावच्छेदेन स्वात्मकाधिकरणीभूताभावप्रतियोगितावच्छेदकविशेष्यतासंबन्धेन प्रतियोगितावच्छेदकीभूतद्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः। न चाभावाधिकरणकाभावस्य अधिकरणाभावस्वरूपत्वं दीधितिकृतामसम्मतम्। तैः धूमाभावाधिकरणकस्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावस्वरूपताप्रतिक्षेपादिति वाच्यम्। तावता भावसाधारणस्यैव अभावाधिकरणकाभावस्य अधिकरणीभूताभावस्वरूपताया दीधितिकृदसम्मतत्वेनावगमात्। अभावमात्राधिकरणकाभावस्य तथात्वे बाधकाभावादिति। अधिकमन्यत्र विवेचनीयम्। तथा च दर्शितातिव्याप्तिवारणाय स्वावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नयद्यत्प्रतियोगिताका ये ये अभावाः तेषां प्रत्येकं तत्तदवच्छेदकावच्छिन्नसामानाधि-

करण्यमेव विवक्षणीयम् । दर्शितस्थले च द्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नविशेष्यता संबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्ना किन्तु साध्यप्रकारकप्रमाविशेष्यतात्वावच्छिन्नस्वरूपादिसंबन्धावच्छिन्नप्रतियोगितैव तादृशीति नातिव्याप्तिः । इत्थं चायमात्मा ज्ञानात् इदं वाच्यं ज्ञेयत्वादित्यादौ संयोगादिव्यधिकरणसंबन्धावच्छिन्नात्मत्वत्ववाच्यत्वत्वाद्यवच्छिन्नसमवायस्वरूपादिसंबन्धावच्छिन्नाकाशत्वावच्छिन्नप्रतियोगिता वा न लक्षणघटकीभवितुमर्हतीति व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वादर इति चेन्न ; एवं सति प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणवैयर्थ्यात् तद्धि धूमाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्याभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादायातिव्याप्तिवारणाय निवेशितम् । तच्च इदानीं न घटते । तत्र संयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगिताया अपि यद्यत्प्रतियोगितान्तर्गततया तदवच्छेदकीभूतसंयोगसंबन्धेन तदवच्छेदकावच्छिन्नसामानाधिकरण्याभावेन अतिव्याप्त्यप्रसक्तेः । न च संयोगेन द्रव्यस्याव्याप्यवृत्तितया न धूमत्वस्य संयोगसंबन्धघटितव्यापकतावच्छेदकत्वं प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्यैवात्र लक्षणे निवेशनीयत्वादिति न धूमत्वावच्छिन्नप्रतियोगिता यद्यत्प्रतियोगितापदेन उपादातुं शक्यते । किन्तु पूर्वक्षणवृत्तित्वविशिष्टतदभावत्वावच्छिन्नप्रतियोगितैवेति अतिव्याप्तिरिति वाच्यम् । तथा सति पूर्वक्षणवृत्तित्वविशिष्टतदभावत्वस्य वह्निनिष्ठधूमाभावीयस्वरूपसंबन्धावच्छिन्नप्रतियोगितावच्छेदकतया तदवच्छिन्नप्रतियोगिताया अपि लक्षणघटकत्वासंभवात् । तथा च धूमप्रकारकप्रमाविशेष्यत्वाभाव एव लक्षणघटको वाच्यः तेषां च किञ्चिद्विशिष्टस्वाभावनिष्ठप्रतियोगिता इव धूमप्रकारकप्रमाविशेष्यत्वादिनिष्ठप्रतियोगिता अपि यद्यत्प्रतियोगितान्तर्गता इति तदवच्छेदकावच्छिन्नसामानाधिकरण्यस्यायोगोलकान्तर्भावेन तादृशाभावानामसंभवात् नातिव्याप्तिः । एवं यद्यत्प्रतियोगितानिवेशे प्रथम-

स्वलक्षणदूषणवेलायां भट्टाचार्योपदर्शितरीत्या तादृशी या या प्रतियोगिता तत्तदवच्छेदकसंबन्धेन तत्तदवच्छेदकावच्छिन्नसामानाधिकरण्यं यत्र क्वचन यद्धेत्वधिकरणयावदन्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्ये तत्तत्प्रतियोगितानिरूपकाभावप्रवेशस्य अभावे यावत्त्वप्रवेशस्य यत्समानाधिकरणत्वस्वविशिष्टत्वयोश्च वैयर्थ्यप्रसङ्गः। अथ यथोपदर्शिताभावसार्थकव्यभिचारिण्यतिव्याप्तिवारणाय तादृशयद्यत्प्रतियोगिताकाः ये येऽभावाः तेषां तत्तदवच्छेदकसंबन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्येवोच्यते। स्वम्—अभावः। न तु प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्यत्रापि प्रतियोगितायाः तत्तद्व्यक्तित्वेन निवेश इति नोक्तदोषद्वयम्। तथा हि धूमवान् वह्नेरित्यादौ लक्षणघटकीभूतस्य धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाद्यभावस्य धूमवत्त्वप्रमाविशेष्यत्वाद्यभावनिष्ठप्रतियोगिताया अपि तादृशत्वेऽपि तदवच्छेदकीभूतस्वरूपसंबन्धेन किञ्चिद्विशिष्टस्वाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादायातिव्याप्तिवारणाय भावत्वविशेषणं सार्थकम्। एवं तादृशी या या प्रतियोगिता तत्तदवच्छेदकसंबन्धेन तत्तदवच्छेदकावच्छिन्नसामानाधिकरण्यं यत्र क्वचनेत्यादि दीधितिरिदानीं न संभवति। तदवच्छेदकावच्छिन्नसामानधिकरण्यमित्यस्माभिरनिवेशात् प्रतियोगितावच्छेदकावच्छिन्नेत्येवास्माभिर्निवेशात् प्रथमतो भावग्रहणाभावे तदुपपादनस्यावश्यकत्वात् लक्षणघटकपदार्थानां येन येन रूपेणास्माभिर्निवेशः कृतः तेन तेन रूपेणैव तन्निवेश्य इतरवैयर्थ्यस्योपपादनीयतया रूपान्तरेण तन्निवेशप्रयुक्तेतरवैयर्थ्यस्यादोषत्वात् दर्शितप्रमाभावभेदसार्थकव्यभिचारिण्यतिव्याप्तिरपीदानीं नास्ति। तत्र द्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताया अतादृशतया साध्यवत्त्वप्रकारकप्रमाविशेष्यतात्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगितायाश्च तदवच्छेदकीभूतस्वरूपसंबधेन तादृशाभावे प्रतियोगितावच्छेद-

कावच्छिन्नाभावसामानाधिकरण्यस्य हेत्वधिकरणीभूततादृशप्रमाभावान्तर्भावेनासत्त्वादिति चेन्न ; अधिकरणीभूतस्य द्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावस्य द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकीभूतद्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यतात्वमपि तदात्मकलक्षणघटकीभूतसाध्यवत्त्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितावच्छेदकमिति तादृशाभावे दर्शितस्वरूपसंबन्धेन द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यतात्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्य हेत्वधिकरणीभूततादृशप्रमान्तर्भावेनाक्षतत्वादतिव्याप्तेर्दुर्वारत्वात् ; एवं धूमवान् वह्नेरित्यादौ धूमप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगित्वायोगोलकासमवेतजातित्वावच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगित्वयोरपि तादृशयद्यत्प्रतियोगितान्तर्गतत्वेन तत्तन्निरूपकाभावानामयोगोलके तत्तदवच्छेदकविशेष्यतासमवायाभ्यां स्वप्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यादेवातिव्याप्तिवारणेन भावत्वविशेषणवैयर्थ्यं दुर्वारम् ।

अथ स्वावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः स्वीयतत्प्रतियोगितावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं यत् तत्प्रतियोगितावच्छेदकं रूपं तदवच्छिन्नेन समं तत्प्रतियोगितावच्छेदकसंबन्धेन समानाधिकरणा इति विवक्षणात् न दर्शितानुपपत्तिः । अत्र तत्प्रतियोगितावच्छेदकपदत्रयेण एकैव प्रतियोगिता धर्तव्येति एतावानेव नियमः न तु अभावविशेषणनिविष्टप्रतियोगितैव धर्तव्येत्यपि । तथा च दर्शितप्रमाभावभेदसाध्यकव्यभिचारिणि लक्षणघटकीभूतस्य साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वाद्यभावस्य तादृशप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविशेष्यतात्वादिकमेव न तु द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यतात्वादिकमिति नातिव्याप्तिः ।

धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाभावायोगोलकासमवेतजात्यभावादीनां तादृशप्रतियोगितावच्छेदकं पूर्वक्षणवृत्तित्वविशिष्टस्याभावत्वादिकमपीति तादृशप्रतियोगितावच्छेदकस्वरूपसंबन्धेन तदवच्छिन्नसामानाधिकरण्यमादायातिव्याप्तिवारणाय भावत्वविशेषणमपि सार्थकम्। नैवम्—एवमपि स्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नघटनिष्ठप्रतियोगिताकाभावभिन्नं मेयत्वादित्यादौ लक्षणघटकीभूतानां सर्वेषामेव समानाधिकरणधर्मावच्छिन्नाभावानां व्यभिचारनिरूपकाधिकरणीभूतस्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नघटनिष्ठ-प्रतियोगिताकाभावमात्राधिकरणकत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकं वाच्यत्वत्वमपि लक्षणघटकीभूताभावप्रतियोगितावच्छेदकं तस्य च वाच्यत्वत्वावच्छिन्नघटनिष्ठप्रतियोगितामादाय स्वीयतत्प्रतियोगितावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वमपि सूपपादमेव। तथा च तत्प्रतियोगितावच्छेदकीभूतवाच्यत्वत्वावच्छिन्नेन समं तत्प्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धेन सामानाधिकरण्यस्य सर्वेषामेवाभावानां सत्त्वादतिव्याप्तिः। अभावमात्राधिकरणकस्यापि अभावस्य अधिकरणीभूताभावस्वरूपत्वं नास्तीत्यभिप्रायकमेव एतल्लक्षणम् प्रथमस्वलक्षणे भट्टाचार्यस्य तथा व्यवहारदर्शनेऽपि द्वितीयस्वलक्षणे तददर्शनादिति चेत् तर्हि तद्रीत्यैव दर्शितप्रमाभावभेदसाध्यकव्यभिचारिण्यतिव्याप्तिवारणेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिविष्टप्रतियोगितावच्छेदके तत्प्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदकत्वस्य प्रतियोगितावच्छेदकसंबन्धेनेति निवेशस्य च व्यर्थतया प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिः दुरुपपादैव दर्शितरीत्या। अत्र ब्रूमः—धूमवान् वह्नेरित्यादौ धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्य निर्धूमनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तिताशून्यत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकीभूततादृशवृत्तिताशून्यत्वावच्छिन्नज्ञानेन साकं स्वसमनियतधूमप्रकारक-

प्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकीभूतविशेष्यतासंबन्धेनायोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य अयोगोलकनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तिताशून्यत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकीभूततादृशवृत्तिताशून्यत्वावच्छिन्नेन ज्ञानेन साकं स्वसमनियतायोगोलकान्यत्वप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकीभूतविशेष्यतासंबन्धेनायोगोलकासमवेतजातित्वावच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य प्रसिद्धावपि तस्यायोगोलकासमवेतत्वावच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकीभूतायोगोलकासमवेतत्वावच्छिन्नेन ज्ञानेन साकं स्वसमनियतायोगोलकासमवेतजातिप्रकारकप्रमात्वावच्छिन्नविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकीभूतविशेष्यतासंबन्धेन सत्त्वात् अतिव्याप्तिवारणाय स्वप्रतियोगितावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः स्वीयतत्प्रतियोगितावच्छेदकसंबन्धेन तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणा इत्यवश्यं विवक्षणीयम्। अत्र तत्प्रतियोगितापदद्वयम् एकविधप्रतियोगितापरम्। न तु पूर्वप्रतियोगितैव ग्राह्येत्यपि नियमः। एवं चायमात्मा ज्ञानात् इदं वाच्यं ज्ञेयत्वादित्यादौ संयोगसंबन्धावच्छिन्नात्मत्वत्ववाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य स्वसमनियतसमवायस्वरूपादिसंबन्धावच्छिन्नाकाशाभावप्रतियोगितावच्छेदकीभूतसमवायस्वरूपादिसंबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेऽपि तेषां दर्शितसामानाधिकरण्यासंभवेन व्यधिकरणधर्मावच्छिन्नाभावपरः। न च व्यधिकरणधर्मावच्छिन्नाभावाङ्गीकारेऽपि दर्शिताभावानां लक्षणघटकत्वानपायात् तेषां च दर्शितसामानाधिकरण्यासंभवात् अव्याप्तिरिति वाच्यम्। व्यधि-

करणधर्मावच्छिन्नाभावस्वीकारे दर्शिताभावानां वाच्यत्वत्वेन घटाभावसमनियतत्वेन तदभिन्नतया तत्प्रतियोगितावच्छेदकीभूतवाच्यत्वत्वावच्छिन्नसामानाधिकरण्यमादाय लक्षणसमन्वयात्। यदि चैवमपि अयमात्मा ज्ञानात् इदं वाच्यं ज्ञेयत्वादित्यादौ कालिकसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपसंबन्धावच्छिन्नकालत्वत्वावच्छिन्नप्रतियोगिताकाभावसमनियतत्वेन तदभिन्नतया स्वीयकालत्वनिष्ठप्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धघटितव्यापकतावच्छेदकीभूतवाच्यत्वत्वावच्छिन्नप्रतियोगिताकस्य यथोक्तस्यापि लक्षणघटकतया तस्य च स्वीययत्प्रतियोगितावच्छेदकसंबन्धेन तत्प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याप्रसिद्ध्याऽव्याप्तिरित्युच्येत; तदा स्वावच्छेदकसंबन्धघटितसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः इत्येव निवेश्यम्। स्वं—प्रतियोगिता। कालिकसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिता स्वरूपसंबन्धावच्छिन्नकालत्वत्वावच्छिन्नप्रतियोगिता वा न तादृशीति न दर्शिताव्याप्तिः। इत्थं चायमात्मा ज्ञानात् इदं वाच्यं ज्ञेयत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नप्रतियोगितयैव तादृश्या भवितव्यमिति व्यक्तमिदानीं प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थोत्थितिः। धूमवान् वह्नेरित्यादौ धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धेन तदवच्छेदकीभूततादृशाभावत्वावच्छिन्नसामानाधिकरण्यमादायातिव्याप्तिवारणाय भावत्वविशेषणमपि नानुपपन्नम्; किन्तु समाधानान्तरं मृग्यम्।

इति द्वितीयस्वलक्षणम्

ननु पारिभाषिकमेवाव्यभिचरितत्वम्, तथाहि—यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका[1] यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वम् ।

सर्वत्र वाच्यत्वाद्यभावस्य तथात्वाद्यावत्त्वोपादानम्; अत एव "भूतत्वमूर्तत्वोभयवान् मूर्तत्वा" दित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्य अतथात्वात् नातिप्रसङ्गः । साधनसमानाधिकरणगोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य वा अतथात्वात् "**साध्यतावच्छेदके**" त्यादि ।

येन सम्बन्धेन हेतुस्तेनैव सम्बन्धेन तदधिकरणत्वं बोध्यम् । तेन आत्मत्वे साध्ये समवायेन हेतोः ज्ञानस्य विषयतयाधिकरणे घटादौ वर्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः । एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः ।

रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव; प्रलये परमाणौ उत्पत्तिकाले चावयविनि तत्सत्वात् । न च प्रतियोगिवत् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम्, मानाभावात् । अत एव "अन्तरा श्यामे [2]रक्तं रूपं नास्ती"ति प्रत्ययः । न चैष रक्तिमध्वंसाद्यवगाही, पूर्वापररक्तिमध्वंसप्रागभाववति मध्ये रक्तेऽपि तथा प्रत्ययप्रसङ्गात् ।

तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यम्; तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरण-

[1] अत्र व्यापकतावच्छेदकप्रतियोगिताका इत्यत्र व्यापकताया अवच्छेदो ययेति बहुव्रीहौ कप्रत्ययः तेन प्रतियोगितया सममवच्छेदिकापदस्य समासे कोपधत्वेऽपि पुंवद्भावः—ज.

[2] न च गुणे शुक्लादयः पुंसीत्यनुशासनात् रक्तो नास्तीत्येव प्रयोगो युक्तः इति वाच्यम्; वस्त्वन्तरविशेषणतानापन्नस्यैव शुक्लादिशब्दस्य पुंस्त्वानुशासनात्; अत एव शुक्लं रूपमिति प्रयोगः मणिकृतैव वक्ष्यते इति ध्येयम्—ज.

श्रीरस्तु

तत्त्वचिन्तामणौ चतुर्दशलक्षणी

अथ "इदं वाच्यं ज्ञेयत्वा" दित्यत्र समवायितया वाच्यत्वाभावो घट एव [1]प्रसिद्धः, व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात्। न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं हि व्यभिचारः, न च वाच्यत्वाभावस्तादृशो घट इति चेत्; तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः, तथा चाप्रसिद्धिः।

दीधितिः

"समवायितये"ति। वाच्यत्वं यथा न समवायि, तथाऽग्रे वक्ष्यते; घटादिसमवायितयेत्यर्थ इत्यप्याहुः। प्रमेयसाध्यके च भावत्वेन अभावानामभावत्वेन भावानां वह्नित्वेन निर्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्यां च प्रमेयमात्रस्याभावः सुलभः।

इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम्

---

[1] प्रसिद्ध एवेति योजना—स्व.